॥ श्री गणेशाय नमः ॥

श्रीमद्वामन-जयादित्यविरचिता
पाणिनीयाष्टाध्यायीसूत्रवृत्तिः

काशिका-४

(सप्तम-अष्टमाध्यायौ)



प्रधानसम्पादकः

आचार्य राधावल्लभत्रिपाठी,

कुलपतिः, राष्ट्रियसंस्कृतसंस्थानम्

सम्पादकमण्डलिः

निर्देशकः- आचार्य रामानुजदेवनाथः

डा. सि. एस्. एस्. नरसिंहमूर्तिः

डा. चन्द्रशेखरभट्टः

श्री सि.हेच्. कृष्णानन्तपद्मनाभः

डा. मधुकेश्वरभट्टः

कु. सुगुण एन्.

विषयानुक्रमणिका

क्र.सं	विषयाः	सूत्राङ्काः
सप्तमाध्याये		
	प्रथमे पादे	
०१	अङ्गाधिकारप्रकरणम्	७.१.१
	द्वितीये पादे	
०२	वृद्धिप्रकरणम्	७.२.१
०३	इट्निषेधप्रकरणम्	७.२.८
०४	इडागमप्रकरणम्	७.२.३५
०५	विभक्तावादेशप्रकरणम्	७.२.८४
	तृतीये पादे	
०५	उत्तरपदवृद्धिप्रकरणम्	७.३.१०
०६	पुगाद्यागमप्रकरणम्	७.३.३६
०७	विविधादेशप्रकरणम्	७.३.४१
०८	गुणप्रकरणम्	७.३.८२
०९	सार्वधातुकोद्देश्यकविधयः	७.३.८७
	चतुर्थे पादे	
१०	ह्रस्वविधयः	७.४.१
११	अभ्यासोद्देश्यकविधयः	७.४.५८
	अष्टमाध्याये	
	प्रथमे पादे	
१२	द्विरुक्तिप्रकरणम्	८.१.१
	द्वितीये पादे	
१३	असिद्धत्वप्रकरणम्	८.२.१
१४	स्वरिताद्यादेशविधयः	८.२.४
१५	लोपविधयः	८.२.२३
१६	निष्ठादेशप्रकरणम्	८.२.४२
१७	प्लुतविधयः	८.२.८२
	तृतीये पादे	
१८	रुप्रकरणम्	८.३.१

क्र.सं	विषयाः	सूत्राङ्काः
१९	अपदाधिकरः	८.३.३८
२०	मूर्धन्यविधयः	८.३.६३
२१	समासे मूर्धन्यविधिः	८.३.८०
	चतुर्थे पादे	
२२	णत्वप्रकरणम्	८.४.१
२३	श्चुत्वादिविधयः	८.४.४०
२४	द्वित्वप्रकरणम्	८.४.४६
२५	जश्त्वादिविधयः	८.४.५५

॥ श्री गणेशाय नमः ॥

पाणिनीयाष्टाध्यायीसूत्रवृत्तिः

काशिका

अथ सप्तमाध्याये

प्रथमः पादः

३१७७. युवोरनाकौ ॥ १ ॥ (१२४७)

यु, वु- इत्येतयोरुत्सृष्टविशेषणयोरनुनासिकयणोः प्रत्यययोर्ग्रहणम्, तयोः स्थाने यथासङ्ख्यम् अन, अक - इत्येतावादेशौ भवतः । योरनः, वोरकः । नन्द्यादिभ्यो (३.१.१३४) ल्युः - नन्दनः । रमणः । सायमादिभ्यष्ट्युट्युलौ तुट् च (४.३.२३) - सायन्तनः । चिरन्तनः। ण्वुल्तृचौ-कारकः । हारकः । 'वासुदेवार्जुनाभ्यां वुन्' (४.३.९८) - वासुदेवकः । अर्जुनकः ।

अनुनासिकयणोरिति किम्? 'ऊर्णाया युस्', (५.२.१२३) ऊर्णायुः । 'भुजिमृड्भ्यां युक्त्युकौ' (उणादि. ३०८) - भुज्युः, मृत्युरिति । एवमादीनां हि यणोऽनुनासिकत्वं न प्रातिज्ञायते, 'प्रतिज्ञानुनासिक्याः पाणिनीयाः' (व्या.प. १२१) ।

इह 'युवोः' इति निर्देशाद् द्वन्द्वैकवद्भावपक्षे 'अनित्यमागमशासनम्' (व्या.प. ९९) इति नुम् न क्रियते ।

नपुंसकलिङ्गता वा 'लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य' (चा.प. ७३) इति न भवति। इतरेतरपक्षे तु छान्दसत्वाद् वर्णलोपो द्रष्टव्यः ॥

युवोश्चेद् द्वित्वनिर्देशो द्वित्वे यण् तु प्रसज्यते ।
अथ चेदेकवद्भावः कथं पुंवद्भवेदयम् ॥
द्वित्वे नैगमिको लोप एकत्वे नुमनित्यता ।
अशिष्यत्वाद्धि लिङ्गस्य पुंस्त्वं वेह समाश्रितम् ॥

३१७८. आयनेयीनीयियः फढखच्छघां प्रत्ययादीनाम् ॥ २ ॥ (४७५)

आयन्, एय्, ईन्, ईय्, इय्-इत्येते आदेशा भवन्ति यथासंख्यं फ, ढ, ख, छ, घ-इत्येतेषां प्रत्यायादीनाम् । 'फ' इत्येतस्यायनादेशो भवति-'नडादिभ्यः फक्' , (४.१.९९) नाडायनः,

चारायणः । ढस्य एयादेशो भवति-'स्त्रीभ्यो ढक्' ,(४.१.१३०) सौपर्येणः, वैनतेयः । खस्य ईनादेशो भवति -'कुलात्खः' ,(४.१.१३९) आढ्यकुलीनः, श्रोत्रियकुलीनः । छस्य ईयादेशो भवति - 'वृद्धच्छः', (४.२.११४) गार्गीयः, वात्सीयः । 'घ' इत्येतस्येयादेशो भवति - 'क्षत्त्राद्घः' (४.१.१३८), क्षत्त्रियः ।

प्रत्ययग्रहणं किम्? फक्कति । ढौकते । खनति । छिनत्ति । घूर्णते । आदिग्रहणं किम्? ऊरुदघ्नम् । जानुदघ्नम् ।

एते आयन्नादयः प्रत्ययोपदेशकाल एव भवन्ति । कृतेष्वेतेषु प्रत्ययाद्युदात्तत्वं भवति । तथा च 'घच्छौ च' (४.४.११७) इति घचश्चित्करणमर्थवद्भवति । [म.भा.]

शङ्खः, षण्ढः-इत्येवमादीनां हि 'उणादयो बहुलम्' (३.३.१) इति बहुलवचनादादेशा न भवन्ति । 'ऋतेरीयङ् इति' (३.१.२९) वा वचनं ज्ञापकम्-धातुप्रत्ययानामादेशाभावस्य ।

'एजेः खश्', (३.२.२८) 'पदरुजविशस्पृशो घञ्' -(३.३.१६) इत्येवमादिषु तु इत्संज्ञया भवितव्यम् । तद्धितेषु हि खकारघकारयोरादेशवचनमवकाशवदितीत्संज्ञां बाधितुं नोत्सहते । आयन्नीनोर्नकारस्येत्संज्ञायां प्राप्तायां प्रतिविधातव्यम्, नित्कार्यं हि सम्भवति ॥

३१७९. झोऽन्तः ॥ ३ ॥ (२१६९)

प्रत्ययग्रहणमनुवर्त्तते, आदिग्रहणं निवृत्तम् । प्रत्ययावयवस्य झस्य 'अन्त' इत्ययमादेशो भवति । कुर्वन्ति । सुन्वन्ति । चिन्वन्ति । 'अद्य श्वो विजनिष्यमाणाः पतिभिः सह शयान्तै (वासि गृ.१३.२४) । 'जृविशिभ्यां झच्' (उणादि. ४१३)-जरन्तः, वेशन्तः ।

'प्रत्ययस्य' इत्येव-उज्झितुम् । उज्झितव्यम् ।

अस्मिन्नप्यन्तादेशे कृते प्रत्ययाद्युदात्तत्वं भवति । तथा च-झचश्नित्करणमर्थवद्भवति॥

३१८०. अदभ्यस्तात् ॥ ४ ॥ (२४७९)

अभ्यस्तादङ्गादुत्तरस्य झकारस्य 'अत्' इत्ययमादेशो भवति । ददति, ददतु । दधति, दधतु । जक्षति, जक्षतु । जाग्रति, जाग्रतु ।

अन्तादेशापवादोऽयम्, जुसादेशेन तु बाध्यते - अददुः, अदधुः, अजागरुः । अत्राप्यादेशे कृते प्रत्ययाद्युदात्तत्वं भवति ॥

३१८१. आत्मनेपदेष्वनतः ॥ ५ ॥ (२२५८)

आत्मनेपदेषु यो झकारस्तस्यानकारान्तादङ्गादुत्तरस्य 'अत्' इत्ययमादेशो भवति । चिन्वते । चिन्वताम् । अचिन्वत । पुनते । लुनते । लुनताम् । अलुनत ।

आत्मनेपदेष्विति किम्? चिन्वन्ति, लुनन्ति । अनत इति किम्? च्यवन्ते । प्लवन्ते । नित्यत्वादत्र विकरणे कृते झोऽन्तादेशेन भवितव्यमित्यदादेशो न भवति । अनकारान्तेनाङ्गेन झकारविशेषणं किम्? इह मा भूत्-'अद्य श्वो विजनिष्यमाणाः पतिभिः सह शयान्तै' (वासि. गृ. १३.२४) ॥

३१८२. शीङो रुट् ॥ ६ ॥ (२४४२)

शीङोऽङ्गादुत्तरस्य झादेशस्यातो रुडागमो भवति । शेरते । शेरताम् । अशेरत ।

रुडयं परादिः क्रियते, स यदि झकारस्यैव स्यात्, अदादेशो न स्यादिति, अत एवायमादेशस्यागमो विधीयते ।

सानुबन्धग्रहणमयङ्लुगर्थम् । तेनेह न भवति - व्यतिशेश्यते ॥

३१८३. वेत्तेर्विभाषा ॥ ७ ॥ (२७०१)

वेत्तेरङ्गादुत्तरस्य झादेशस्यातो विभाषा रुडागमो भवति । संविद्रते, संविदते । संविद्रताम्, संविदताम् । समविद्रत, समविदत ।

वेत्तिरिति लुग्विकरणस्य ग्रहणम्, किम्? इह मा भूत्-विन्ते, विन्दाते, विन्दते इति ॥

३१७४. बहुलं छन्दसि ॥ ८ ॥ (३५५७)

छन्दसि विषये बहुलं रुडागमो भवति । देवा अदुह्र । 'गन्धर्वा अप्सरसो अदुह्र' (मै. ४.२.१३) । दुहेर्लङि झकारस्यादादेशे कृते रुट् । 'लोपस्त आत्मनेपदेषु' (७.१.४१) इति तकारलोपः । न च भवति-अदुहत ।

बहुलवचनादन्यत्रापि भवति - अदर्श्रन्नस्य केतवः (ऋ. १.५०.३) । 'ऋदृशोऽङि गुणः' (७.४.१६) इत्येतदपि बहुलवचनादेवात्र न भवति ॥

३१८५. अतो भिस ऐस् ॥ ९ ॥ (२०३)

अकारान्तादङ्गादुत्तरस्य भिस ऐसित्ययमादेशो भवति । वृक्षैः । प्लक्षैः । अतिजरसैः । जरामतिक्रान्तैरिति विगृह्य समासे कृते ह्रस्वत्वे च भिस ऐसादेशो भवति । 'एकदेशविकृतमनन्यवद्भवति' (व्या.प. १६) इति जरशब्दस्य जरसादेशः ।

'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' (३.१.१४) इति परिभाषेयमनित्या 'कष्टाय क्रमणे' (व्या.प. १२) इति निर्देशात् ।

अत इति किम्? अग्निभिः । वायुभिः । तपरकरणां किम्? खट्वाभिः । मालाभिः ॥

एत्वं भिसि परत्वाच्चेदत एस् क्व भविष्यति ।

कृतेऽप्येत्वे भौतपूर्व्यादैस्तु नित्यस्तथा सति ॥ (म. भा.)

'अतः' इत्यधिकारः - 'जसः शी' (७.१.१७) इति यावत् ॥

३१८६. बहुलं छन्दसि ॥ १० ॥ (३५५८)

छन्दसि विषये बहुलमैसादेशो भवति । अत इत्युक्तम्, अनतोऽपि भवति-नद्यैरिति । अतो न भवति - देवेभिः सर्वेभिः प्रोक्तमिति ॥

३१८७. नेदमदसोरकोः ॥ ११ ॥ (३४९)

इदम्, अदस्-इत्येतयोरककारयोर्भिस ऐस्न भवति । एभिः । अमीभिः ।

अकोरिति किम्? इमकैः । अमुकैः ।

अकोरित्येतदेव प्रतिषेधवचनं 'तन्मध्यपतितस्तद्ग्रहणेन गृह्यते' (व्या.प. २१) इति ।

'इदमदसोः कात्' इति नोक्तम्, विपरीतोऽपि नियमः सम्भाव्येत-इदमदसोरेव कादिति । ततश्चेह न स्यात्-सर्वकैः, विश्वकैः । इह च स्यादेव-एभिः, अमीभिः । प्रतिषेधकरणं विपरीतनियमनिवृत्त्यर्थम् ॥

३१८८. टाङसिङसामिनात्स्याः ॥ १२ ॥ (२०१)

अकारान्तादङ्गादुत्तरेषां टाङसिङसाम् इन, आत्, स्य-इत्येते आदेशा भवन्ति यथासंख्यम्। 'टा' इत्येतस्येनादेशो भवति-वृक्षेण, प्लक्षेण । 'ङसि' इत्येतस्य आत्-वृक्षात्, प्लक्षात् । 'ङस्' इत्येतस्य स्यादेशो भवति - वृक्षस्य, प्लक्षस्य ।

अत इति किम्? सख्या । पत्या । अतिजरसिना, अतिजरसादिति केचिदिच्छन्ति ।

यथा तु भाष्ये, तथा नैतदिष्यत इति लक्ष्यते ॥

३१८९. ङेर्यः ॥ १३ ॥ (२०४)

'ङेः' इति चतुर्थ्येकवचनस्य ग्रहणम् । अकारान्तादङ्गादुतरस्य 'ङे' इत्येतस्य 'य' इत्ययमादेशो भवति । वृक्षाय । प्लक्षाय ।

अत इति किम्? सख्ये, पत्ये ।

'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' (व्या.प. १२) इति परिभाषेयमनित्या, तेन दीर्घो भवति ॥

३१९०. सर्वनाम्नः स्मै ॥ १४ ॥ (२१५)

अकारान्तात्सर्वनाम्न उत्तरस्य ङेः 'स्मै' इत्ययमादेशो भवति । सर्वस्मै । विश्वस्मै । यस्मै । कस्मै । तस्मै ।

'अतः' इत्येव-भवते ।

अथी अत्रास्मै-इत्यन्वादेशेऽशादेशे (२.४.३२) एकादेशः प्राप्नोति? तत्रान्तरङ्गत्वादेकादेशात्पूर्वं स्मैभावः क्रियते, पश्चादेकादेश इति ॥

३१९१. ङसिङ्योः स्मात्स्मिनौ ॥ १५ ॥ (२१६)

ङसि, ङि-इत्येतयोरकारान्तात् सर्वनाम्न उत्तरयोः स्मात्, स्मिन्-इत्येतावादेशौ भवतः । ङसीत्येतस्य 'स्मात्' -सर्वस्मात्, विश्वस्मात्, यस्मात्, कस्मात् । ङीत्येतस्य 'स्मिन्' - सर्वस्मिन्, विश्वस्मिन्, यस्मिन्, तस्मिन्, अन्यस्मिन् ।

अत इत्येव - भवतः । भवति । सर्वनाम्न इत्येव - वृक्षात् । वृक्षे ॥

३१९२. पूर्वादिभ्यो नवभ्यो वा ॥ १६ ॥ (२२१)

पूर्वादिभ्यो नवभ्यः सर्वनाम्न उत्तरयोर्ङसिङ्योः स्मात्, स्मिन्-इत्येतावादेशौ वा भवतः । पूर्वस्मात्, पूर्वात् । पूर्वस्मिन्, पूर्वे । परस्मात्, परात् । परस्मिन्, परे । परस्मात्, परात् । परस्मिन्, परे । अवरस्मात्, अवरात् । अवरस्मिन्, अवरे । दक्षिणस्मात्, दक्षिणात् । दक्षिणस्मिन्, दक्षिणे । उत्तरस्मात्, उत्तरात् । उत्तरस्मिन्, उत्तरे । अपरस्मात्, अपरात् । अपरस्मिन्, अपरे । अधरस्मात्, अधरात् । अधरस्मिन्, अधरे । स्वस्मात्, स्वात् । स्वस्मिन्, स्वे । अन्तरस्मात्, अन्तरात् । अन्तरस्मिन्, अन्तरे ।

नवभ्यः इति किम्? त्यस्मात् । त्यस्मिन् ॥

३१९३. जसः शी ॥ १७ ॥ (२१४)

अकारान्तात्सर्वनाम्न उत्तरस्य जसः 'शी' इत्ययमादेशो भवति । सर्वे । विश्वे । ये । के। ते ।

दीर्घोच्चारणमुत्तरार्थम् - त्रपुणी । जतुनी ॥

३१९४. औङ आपः ॥ १८ ॥ (२८७)

आबन्तादङ्गदुत्तरस्यौङः 'शी' इत्ययमादेशो भवति । खट्वे तिष्ठतः । खटवे पश्य । बहुराजे । कारीषगन्ध्ये ।

ङकारः सामान्यग्रहणार्थः - औटोऽपि ग्रहणं यथा स्यात् ।

औकारोऽयं शीविधौ ङिद्गृहीतो ङिच्चास्माकं नास्ति कोऽयं प्रकारः ।

सामान्यार्थः, तस्य चासञ्चनेऽस्मिन्ङित्कार्यं ते श्यां प्रसक्तं स दोषः ॥

ङित्त्वे विद्याद्वर्णनिर्देशमात्रं वर्णे यत्स्यात्तच्च विद्यात्तदादौ ।

वर्णश्चायं तेन ङित्त्वेऽप्यदोषो निर्देशोऽयं पूर्वसूत्रेण वा स्यात् ॥(म.भा.१-२)

३१९५. नपुंसकाच्च ॥ १९ ॥ (३१०)

नपुंसकादङ्गादुत्तरस्य औङः 'शी' इत्येयमादेशो भवति । कुण्डे तिष्ठतः । कुण्डे पश्य । यस्येतिलोपः (६.४.१४८) प्राप्तः ।

श्यां प्रतिषेधो वक्तव्यः (म. भा.) । इति न भवति - दधिनी, मधुनी, त्रपुणी, जतुनी ॥

३१९६. जश्शसोः शिः ॥ २० ॥ (३१२)

नपुंसकादङ्गादुत्तरयोर्जश्शसोः 'शि' इत्ययमादेशो भवति । कुण्डानि तिष्ठन्ति। कुण्डानि पश्य । दधीनि । मधूनि । त्रपूणि । जतूनि ।

जसा सहचरितस्य शसो ग्रहणादिह न भवति - कुण्डशो ददाति । वनशः प्रविशन्तीति ॥

३१९७. अष्टाभ्य औश् ॥ २१ ॥ (२८७)

'अष्टाभ्यः' इति कृताकारोऽष्टन्-शब्दो गृह्यते । तस्मादुत्तरयोर्जश्शसोः 'औश्' इत्ययमादेशो भवति । अष्टौ तिष्ठन्ति । अष्टौ पश्य ।

कृताकारस्य ग्रहणं किम्? अष्ट तिष्ठन्ति । अष्ट पश्य । एतदेव कृतात्वस्य ग्रहणं ज्ञापकम् -'अष्टन आ विभक्तौ' (७.२.८४) इति आत्त्वविकल्पस्य ।

'षड्भ्यो लुक्' (७.१.२२) इत्यस्यायमपवादः, नाप्राप्ते अस्मिन्निदमारभ्यते ।

यस्तु 'सुपो धातुप्रातिपदिकयोः' (२.४.७१) इति, तस्मिन्प्राप्ते चाप्राप्ते चेति स न बाध्यते - अष्टपुत्रः, अष्टभार्य इति ।

तदन्तग्रहणमत्रेष्यते - परमाष्टौ, उत्तमाष्टौ ।

'प्रियाष्टानः' इत्यत्रात्वस्याभावादौश्त्वं न भवति ॥

३१९८. षड्भ्यो लुक् ॥ २२ ॥ (२६१)

षट्संज्ञकेभ्य उत्तरयोर्जश्शसोर्लुग्भवति । षट् तिष्ठन्ति । षट् पश्य । पञ्च । सप्त । नव। दश ।

षट्प्रधानात्तदन्तादपि भवति - परमषट् । उत्तमषट् ।

यत्र तूपसर्जनं षट्, ततो न भवति - प्रियषषः, प्रियपञ्चान इति ॥

३१९९. स्वमोर्नपुंसकात् ॥ २३ ॥ (३१९)

सु, अम्-इत्येतयोर्नपुसकादुत्तरयोर्लुग्भवति । दधि तिष्ठति । दधि पश्य । मधु तिष्ठति। मधु पश्य । त्रपु -२ । जतु - २ ।

तद्ब्राह्मणकुलमित्यत्र लुका त्यदाद्यत्वं बाध्यते; पूर्वविप्रतिषेधेन, नित्यत्वाद्वा । लुको हि निमित्तम् 'अतोऽम्' (७.१.२४) इति लक्षणान्तरेण विहन्यते, न पुनस्त्यदाद्यत्वेनैव । यस्य च लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यं भवति ॥

३२००. अतोऽम् ॥ २४ ॥ (३०९)

अकारान्तान्नपुंसकाद् उत्तरयोः स्वमोः 'अम्' इत्ययमादेशो भवति । कुण्डं तिष्ठति । कुण्डं पश्य । वनम्-२ । पीठम् - २ ।

मकारः कस्मान्न क्रियते? दीर्घत्वं (७.१.१०२) प्राप्नोति ॥

३२०१. अद्ड् डतरादिभ्यः पञ्चभ्यः ॥ २५ ॥ (३१५)

डतरादिभ्यः परयोः स्वमोरद्ड् इत्ययमादेशो भवति । कतरत्तिष्ठति । कतरत्पश्य। कतमत्तिष्ठति । कतमत्पश्य । इतरत् । अन्यतरत् । अन्यत् ।

पञ्चभ्य इति किम्? नेमं पश्य । डित्करणं किम्? कतरत् तिष्ठतीत्यत्र पूर्वसवर्णदीर्घो मा भूत् ।

इह तु कतरत्पश्येति स्थानिवद्भावादमि पूर्वत्वेनापि सिद्ध्यति । एवं तर्हि तकारादेश एव कस्मान्न विधीयते? हे कतरदिति सम्बुद्धेर्लोपो मा भूत् ।

अपृक्तश्चेदमो दोषो निवृत्ते डतरादिषु ।

अद्डित्त्वाडुतरादीनां न लोपो नापि दीर्घता ॥

३२०२. नेतराच्छन्दसि ॥ २६ ॥ (३५५९)

इतरशब्दादुत्तरयोः स्वमोश्छन्दसि विषये अद्ङादेशो न भवति । 'मृतंमितरमितरमण्डमजयत' (मै. १.६.१२) । वार्त्रघ्नमितरम् । छन्दसीति किम्? इतरत्काष्ठम्। इतरत्कुण्ड्यम् ।

'अतोऽम्' (७.१.२४) - इत्यस्मादनन्तरमितराच्छन्दसीति वक्तव्यम्? 'नेतराच्छन्दसि' इति वचनं योगविभागार्थम् ।

एकतराद्धि सर्वत्र छन्दसि भाषायां प्रतिषेध इष्यते (म. भा. ७.१.२६ वा.१)। एकतरं तिष्ठति । एकतरं पश्येति ॥

३२०३. युष्मदस्मद्भ्यां ङसोऽश् ॥ २७ ॥ (३९९)

युष्मदस्मद् - इत्येताभ्यामुत्तरस्य ङसः 'अश्' -इत्ययमादेशो भवति । तव स्वम् । मम स्वम् ।

शित्करणं सर्वादेशार्थम्; अन्यथा ह्यादेशव्यपदेशप्रक्लृप्त्यर्थमादेरेव स्यात्, ततश्च 'योऽचि' (७.२.८९) इत्येतन्न स्यात् ॥

३२९४. ङे प्रथमयोरम् ॥ २८ ॥ (३८२)

'ङे' इत्यविभक्तिकोऽयं निर्देशः । 'ङे' इत्येतस्य प्रथमयोश्च विभक्त्योः = प्रथमाद्वितीययोर्युष्मदस्मद्भ्यामुत्तरयोः 'अम्' इत्ययमादेशो भवति । तुभ्यं दीयते । मह्यं दीयते।

प्रथमयोः - त्वम्, अहम् । युवाम्, आवाम् । यूयम्, वयम् । त्वाम्, माम् । युवाम्, आवाम् ॥

३२०५. शसो न ॥ २८ ॥ (३९१)

युष्मदस्मद्भ्यामुत्तरस्य शसो नकारादेशो भवति । युष्मान् ब्राह्मणान् । अस्मान् ब्राह्मणान् । युष्मान् ब्राह्मणीः । अस्मान् ब्राह्मणीः । युष्मान् कुलानि । अस्मान्कुलानि ।

'तस्माच्छसो नः पुंसि' इति सिद्धे स्त्रीनपुंसकार्थं वचनम् । अलिङ्गे वा युष्मदस्मदी ॥

३२०६. भ्यसो भ्यम् ॥ ३० ॥ (३९५)

युष्मदस्मद्भ्यामुत्तरस्य भ्यसः 'भ्यम्' इत्ययमादेशो भवति । युष्मभ्यं दीयते। अस्मभ्यं दीयते । भ्यमादेशे कृते शेषेलोपे च 'बहुवचने झल्येत्' (७.३.१०३) इत्येवं प्राप्नोति, तद् 'अङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्य' (व्या.प. ३८) इति न भवति ।

केचित् पुनरभ्यमादेशमेत्वनिवृत्त्यर्थं कुर्वन्ति । येषां तु शेषेलोपष्टिलोपः, तेषामभ्यमादेश एव । उदात्तनिवृत्तिस्वरश्चादेरेव भवति ॥

३२०७. पञ्चम्या अत् ॥ ३१ ॥ (३९७)

पञ्चम्या भ्यसो युष्मदस्मद्भ्यामुत्तरस्य 'अत्' इत्ययमादेशो भवति । युष्मद् गच्छन्ति। अस्मद् गच्छन्ति ॥

३२०८. एकवचनस्य च ॥ ३२ ॥ (३९६)

पञ्चम्या एकवचनस्य युष्मदस्मद्भ्यामुत्तरस्य 'अत्' इत्ययमादेशो भवति । त्वद् गच्छन्ति । मद् गच्छन्ति ॥

३२०९. साम आकम् ॥ ३३ ॥ (४००)

'साम' इति षष्ठीबहुवचनमागतसुट्कं गृह्यते । तस्य युष्मदस्मद्भ्यामुत्तरस्य 'आकम्' इत्ययमादेशो भवति । युष्माकम् । अस्माकम् ।

अथ किमर्थमागतसुट्को गृह्यते, न ह्यादेशविधानकाले सुड् विद्यते? तस्यैव तु भाविनः सुटो निवृत्त्यर्थम् । आदेशे कृते हि शेषेलोपे युष्मदस्मदोरकारान्तत्वात्सुट् प्राप्नोति, स स्थान्यन्तर्भूतत्वान्निवर्तते ।

दीर्घोच्चारणं सवर्णदीर्घार्थम् । अकमि तु सति ह्रस्वकरणे तद्विधानसामर्थ्यदेव सवर्णदीर्घत्वं न प्राप्नोति । तत्सामर्थ्यमेत्वं प्रति भविष्यतीति अकारकरणमेत्वनिवृत्त्यर्थमिति 'अतो गुणे' (६.१.८७) पररूपत्वं स्यात् ॥

३२१०. आत औ णलः ॥ ३४ ॥ (२३७१)

आकारान्तादङ्गादुत्तरस्य णल औकारादेशो भवति । पपौ । तस्थौ । जग्लौ । मम्लौ ।

अत्रौत्वमेकादेशः, स्थानिवद्भावः, द्विर्वचनम् - इत्यनेन क्रमेण कार्यणि क्रियन्ते (म. भा.)। एकादेशादनवकाशत्वादौत्वं द्विर्वचनादपि परत्वादेकादेश इति ॥

३२११. तुह्योस्तातङाशिष्यन्यतरस्याम् ॥ ३५ ॥ (२१९७)

तु, हि - इत्येतयोराशिषि विषये तातङादेशो भवत्यन्यतरस्याम् । जीवताद्भवान् । जीवतात्त्वम् । जीवतु भवान् । जीव त्वम् ।

ङित्करणं गुणवृद्धिप्रतिषेधार्थमिति सर्वादेशस्तातङ् भवति । ङित्त्वाच्चास्य स्थानिवद्भावाद्यत्पित्त्वं प्राप्नोति, तन्निवर्त्तते; ङिच्च पिन्न भवति । तेन 'ब्रुव ईट्' (७.३.९३) इति ब्रूताद्भवान् - इतीण्न भवति ।

आशिषीति किम्? ग्रामं गच्छतु भवान् । गच्छ त्वम् ।

तातङि ङित्त्वं संक्रमकृत्स्यादन्त्यविधिश्चेत्तच्च तथा न ।
हेरधिकारे हेरधिकारो लोपविधौ तु ज्ञापकमाह ॥
तातङो ङित्त्वसामर्थ्यान्नायमन्त्यविधिः स्मृतः ।
न तद्वदनङादीनां तेन तेऽन्त्यविकारजाः ॥

३२१२. विदे शतुर्वसुः ॥ ३६ ॥ (३१०५)

'विदे ज्ञाने' -इत्येतस्माद्धातोरुत्तरस्य शतुर्वसुरादेशो भवति । विद्वान्, विद्वांसौ, विद्वांसः ।

स्थानिवद्भावादुगित्कार्ये सिद्धे वसोरुकारकरणम् 'वसोः सम्प्रसारणम्' (६.४.१३१) इत्यत्र क्वसोरपि सामान्यग्रहणार्थम् । 'एकानुबन्धकग्रहणे न द्व्यनुबन्धकस्य' (व्या.प. ४२) इत्येतदपि न भवति; तथा सत्युकारकरणमनर्थकं स्यात् ।

अन्यतरस्यांग्रहणं केचिदनुवर्त्तयन्ति । विदन्, विदन्तौ, विदन्तः ॥

३२१३. समासेऽनञ्पूर्वे क्वो ल्यप् ॥ ३७ ॥ (३३३२)

समासेऽनञ्पूर्वे 'क्त्वा' इत्येतस्य 'ल्यप्' इत्ययमादेशो भवति । प्रकृत्य । प्रहृत्य । पार्श्वतःकृत्य । नानाकृत्य । द्विधाकृत्य ।

समास इति किम्? कृत्वा । हृत्वा । अनञ्पूर्व इति किम्? अकृत्वा । अहृत्वा । परमकृत्वा । उत्तमकृत्वा ।

'अनञ्' इति हि नञोऽन्यदनञ् नञ्सदृशमव्ययं परिगृह्यते । तेन नञ् अनव्ययं चानञ् न भवति । स्नात्वाकालकादिषु मयूरव्यंसकादिषु निपातनाल्ल्यबादेशो न भवति ।

अथ वा - 'समासे' इति निर्धारणे सप्तमी । तेन क्त्वान्तः समास एव परिगृह्यते । स च 'येन विधिस्तदन्तस्य' (व्या.प.३) इत्यनेन तदन्तविधिना, न तु 'कृद्ग्रहणे

गतिकारकपूर्वस्यापि' (व्या.प. १२६) इति । तथा च 'अनञ्पूर्वे' इत्युच्यते । गतिकारकपूर्वस्यैव तु ग्रहणे सति नञ्पूर्वस्य प्रसङ्ग एव नास्ति, नञ्न गतिः, न च कारकमिति (म. भा.) ।

प्रधाय, प्रस्थायेत्यादिषु हिप्रभृतीन् 'अन्तरङ्गानपि विधीन्बहिरङ्गो ल्यब्बाधत एव' (व्या.प.) - इति ज्ञापितमेतत् ॥

३२१४. कत्वापि छन्दसि ॥ ३८ ॥ (३५६०)

समासेऽनञ्पूर्वे 'क्त्वा' इत्येतस्य 'क्त्वा' इत्ययमादेशो भवति, अपिशब्दाल्ल्यबपि भवति छन्दसि विषये । 'कृष्णं वासो यजमानं परिधापयित्वा' (काठं सं ६.८) 'प्रत्यञ्चमर्कं प्रत्यर्पयित्वा' (अ.वे. २.१२.५५) ल्यबपि भवति - 'उद्धृत्य जुहोति' (काठ, सं. ६.८) ।

'वा छन्दशि' इति नोक्तम्, सर्वोपाधिव्यभिचारार्थम् । तेनासमासे ल्यब्भवति -अर्च्य तान् देवान् गतः ।

छन्दोऽधिकारः 'आज्जसेरसुक्' (७.१.५०) इति यावत् ॥

३२१५. सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः ॥ ३९ ॥ (३५३१)

छन्दसि विषये सुपां स्थाने - सु, लुक्, पूर्वसवर्ण, आ, आत्, शे, या, डा, ड्या, याच्, आल्-इत्येते आदेशा भवन्ति ।

सु-'अनृक्षरा ऋजवः सन्तु पन्थाः' (ऋ. १०.८४.२३) पन्थान इति प्राप्ते ।

सुपां सुपो भवन्तीति वक्तव्यम् (ऋ. १०.८५.२३) । धुरि दक्षिणायाः (ऋ. १.१६४.१९) । दक्षिणायामिति प्राप्ते ।

तिङां तिङो भवन्तीति वक्तव्यम् (म. भा. ७.१.३९) । चषालं ये अश्वयूपाय तति । (ऋ. १.१.६१६) । तक्षन्तीति प्राप्ते ।

लुक्-'अर्द्रे चर्मन्' , (तै.सं. १.५.९.३) । लोहिते चर्मन् । चर्मणीति प्राप्ते । हविर्द्धाने यत्सुन्वन्ति तत्सामिधेनीरन्वाह । यस्मिन्सुन्वन्ति तस्मिन्सामिधेनीरिति प्राप्ते ।

पूर्वसवर्णः- 'धीति' (ऋ. १.१६४.८) । मती । 'सुष्टुती' (ऋ. २.३२.४) । धीत्या, मत्या, सुष्टुत्या इति प्राप्ते ।

आ-उभा [द्वा] यन्तारा (तै.सं. ४.३.९.३) । उभौ यन्तारौ इति प्राप्ते ।

आत्-न ताद् ब्राह्मणाद् [ब्राह्मणान्] निन्दामि । तान् ब्राह्मणानिति प्राप्ते ।

शे-'न युष्मे बाजबन्धवः' (ऋ. ८.६८.१९) । 'अस्मे इन्द्राबृहस्पती' (ऋ. ४.४९.४) । यूयं वयमिति प्राप्ते । यूयादेशः, वयादेशश्च छान्दसत्वान्न भवति ।

या-'उरुया' (मै. ३.७.८) । धृष्णुया । उरुणा, धृष्णुनेति प्राप्ते ।

डा-'नाभा॑ पृथिव्याम्' (अ.वे. ७.६१.१) । नाभौ पृथिव्यामिति प्राप्ते ।

ड्या-'अ॒नु॒ष्ट्व॒यो॒ च्य॒व॒या॒त॒त्' (मै. ४.१३.४.२५) । अनुष्टुभेति प्राप्ते ।

याच्-'साध॒या' (ऋ. १०.६६.१२) साध्विति सोर्लुकि प्राप्ते ।

आल्-'वसन्ता यजेत' (मै.२.३.४) । वसन्त इति प्राप्ते ।

इयाडियाजीकाराणामुपसंख्यानम् (म. भा. ७.१.३९ वा.१) । इया-'उर्वि॒या' [परिख्यन्] परि॑धानम् (ऋ. १.९७.२) । दार्विया । उरुणा, दारुणेति प्राप्ते । डियाच्-सु॒क्षे॒त्रि॒या ॥ सुगात्रिया । सुक्षेत्रिणा, सुगात्रिणेति प्राप्ते । ईकारः - 'दृति॑ं न शुष्कं सर॒सी शयानाम्' (ऋ. ७.१०.३.२) । सरसि शयानमिति प्राप्ते ।

आङ्याजयारामुपसंख्यानम् (वा.२) । आङ् - प्रबा॒हव॑ (ऋ. २.२८.२) । प्रबाहुनेति प्राप्ते । अयाच्-'स्वप्नया स॑चसु॒जन॑म्' (अ. ७.७.८) । स्वप्नेनेति प्राप्ते । आयर्- सिन्धु॑मिव नवया (ऋ. १.९७.८) । नावेति प्राप्ते ॥

३२१६. अमो मश् ॥ ४० ॥ (३५६२)

'अम्' इति मिबादेशो गृह्यते । तस्य छन्दसि विषये मशादेशो भवति । 'वधी॑ं वृत्रम्' (ऋ. १.१६५.८) । क्रमीं वृक्षस्य शाखाम् । लुङि 'बहुलं छन्दस्यमाङ्योगेऽपि' (६.४.७५) इत्यडागमाभावः ।

शित्करणं सर्वादेशार्थम् । मकारस्यापि हि मकारवचनमनुस्वारनिवृत्त्यर्थं स्यात् ॥

२३१७. लोपस्त आत्मनेपदेषु ॥ ४१ ॥ (३५६३)

आत्मनेपदेषु यस्तकारस्तस्य छन्दसि विषये लोपो भवति । 'द॒वा अ॒दु॒ह्र' (मै. ४.२.१) । गन्धर्वाप्सरसो अदुह्र । अदुहतेति प्राप्ते । 'दु॒ह्राम॒श्विभ्यं॒ पया॑ अ॒घ्न्येयम्' (ऋ. १.६४.२७) । दुग्धामिति प्राप्ते । 'दक्षिणतः शये' । शेत इति प्राप्ते ।

अपीत्यधिकारान्न भवति - तत्र आत्मानमनृतं कुरुते ।

आत्मनेपदेष्विति किम्? 'वत्सं दुहन्ति कलशं चतुर्बिलम्' (तै. ब्रा. ३.७.४.१६) ॥

३२१८. ध्वमो ध्वात् ॥ ४२ ॥ (३५६४)

छन्दसि विषये ध्वमो ध्वादित्ययमादेशो भवति । 'अ॒न्त॑र॒र्व॑ष्मा॑णं॒ वारयध्वात्' (मै. ३.४.१३) । वारयध्वमिति प्राप्ते ॥

३२१९. यजध्वैनमिति च ॥ ४३ ॥ (३५६५)

'यजध्वम्' इत्येतस्य एनमित्येतस्मिन्परतो मकारलोपो निपात्यते वकारस्य च यकारश्छन्दसि विषये । 'यजध्वैनम् प्रियमेधाः' (ऋ. ८.२.३७) । यजध्वमेनमिति प्राप्ते ।

३२२०. तस्य तात् ॥ ४४ ॥ (३५६६)

तशब्दस्य लोण्मध्यमपुरुषबहुवचनस्य स्थाने 'तात्' इत्ययमादेशो भवति । 'गात्रंगात्रमस्य नुनं कृणुतात्' (मै. ४.३.४.२५) । कृणुतेति प्राप्ते । 'ऊवध्यगोहं पर्थिवं खनतात्' (मै. ४.१३.४.२५) । खनतेति प्राप्ते । 'अस्नारक्षः ससजतात्' (मै. ४.१३.४.२५) । संसृजतेति प्राप्ते । सूर्यं चक्षुर्गमयतात्' (४.१३.४.२४) । गमयतेति प्राप्ते ॥

३२२१. तप्तनप्तनथनाश्च ॥ ४५ ॥ (३५६७)

'तस्य' इति वर्त्तते । छन्दसि विषये तस्य स्थाने तप्, तनप्, तन, थन-इत्येते आदेशा भवन्ति । तप्-'शृणोत ग्रावाणः' । शृणुतेति प्राप्ते । 'सुनोत' (ऋ. ७.३२.८) । सुनुतेति प्राप्ते । तनप्-'संवरत्रा दधातन' (ऋ. १०.१०१.५) । धत्तेति प्राप्ते । तन - 'जुष्टन' (ऋ. ४.३.६.७) । जुषतेति प्राप्ते । छान्दसत्वात् श्लुः । थन - 'यदिष्ठन' (ऋ. १०.६३.६) । यदिच्छतेति प्राप्ते ।

पित्करणमङित्त्वार्थम् ॥

३२२२. इदन्तो मसि ॥ ४६ ॥ (३५६८)

छन्दसि विषये मसित्ययं शब्द इकारान्तो भवति । मसः सकारान्तस्य इकारागमो भवति, स च तस्यान्तो भवति । तद्ग्रहणेन गृह्यत इत्यर्थः । 'पुनस्त्वोदुदीपयामसि' (अ. वे. १२.२.५) । दीपयाम इति प्राप्ते । 'शलभं भञ्जयामसि' (पै. २.२०.४) । भञ्जयाम् इति प्राप्ते । 'त्वयि रात्रिं वासयामसि' (शौ. १९.४७.९) । वासयाम इति प्राप्ते ॥

३२२३. क्त्वो यक् ॥ ४७ ॥ (३५६९)

'क्त्वा' इत्येतस्य यगागमो भवति छन्दसि विषये । 'दत्त्वाय (ऋ. १०.८५.१३) सविता धियः' । दत्त्वेति प्राप्ते ।

'क्त्वापि छन्दसि' (७.१.३८) इत्यस्यानन्तरमिदं कस्मान्नोच्यते? 'समासे' इति तत्रानुवर्त्तते ॥

३२२४. इष्ट्वीनमिति च ॥ ४८ ॥ (३५७०)

'इष्ट्वीनम्' -इत्ययं शब्दो न्निपात्यते छन्दसि विषये । यजेः क्त्वाप्रत्ययान्तस्य ईनमादेशोऽन्त्यस्य निपात्यते । 'इष्ट्वीनं देवान्' (आश्व. सू.पृ. २०४) । इष्ट्वा देवानिति प्राप्ते।

पीत्वीनमित्यपीष्यते । चकारस्यानुक्तसमुच्चयार्थत्वात्सिद्धम् ॥

३२२५. स्नात्व्यादयश्च ॥ ४९ ॥ (३५७१)

'स्नात्वी' -इत्येवमादयः शब्दा निपात्यन्ते छन्दसि विषये । स्नत्वी मलादिव (मै. सं. ३.११.१०) । स्नात्वेति प्राप्ते । 'पीत्वी सोमस्य वावृधे' (ऋ. ३.४०.७) । पीत्वेति प्राप्ते ।

प्रकारार्थोऽयमादिशब्दः ॥

३२२६. आज्जसेरसुक् ॥ ५० ॥ (३५७२)

अवर्णान्तादङ्गादुत्तरस्य जसेरसुगागमो भवति छन्दसि विषये । 'ब्राह्मणासः पितरः सोम्यसः (ऋ. ६.७५.१०) । ब्राह्मणाः सोम्या इति प्राप्ते ।

'ये पूर्वसो य उपरासः' (ऋ. १०.१५.२) - इत्यत्र परत्वादसुकि पुनः प्रसङ्गविज्ञानाच्छीभावः प्राप्तः, 'सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव' (व्या.प. ४०) इति न भवति ॥

३२२७. अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि ॥ ५१ ॥ (२६६२)

'छन्दसि' इत्यतः प्रभृति निवृत्तम् । अश्व, क्षीर, वृष, लवण - इत्येतेषामङ्गानामात्मप्रीतिविषये क्यचि परतोऽसुगागमो भवति । अश्वस्यति वडवा । क्षीरस्यति माणवकः । वृषस्यति गौः । लवणस्यत्युष्ट्रः ।

आत्मप्रीताविति किम्? अश्वीयति । क्षीरीयति । वृषीयति । लवणीयति ।

अश्ववृषयोर्मैथुनेच्छायामिति वक्तव्यम् (म.भा. ७.१.५१. वा. १) ।

क्षीरलवणयोर्लालसायामिति वक्तव्यम् (वा.२) । तृष्णातिरेकः = लालसा । अन्यत्रात्मप्रीतावपि न भवति ।

अपर आह - सुग्वक्तव्यः (म. भा.) । दधिस्यति, मधुस्यति - इत्येवमाद्यर्थम् ॥

३२२८. आमि सर्वनाम्नः सुट् ॥ ५२ ॥ (२१७)

'आत्' इति वर्त्तते । अवर्णात्सर्वनाम्न उत्तरस्यामः सुडागमो भवति । सर्वेषाम् । विश्वेषाम् । येषाम् । तेषाम् । सर्वासाम् । यासाम् । तासाम् । आदित्येव - भवताम् ।

'आमि' इति षष्ठीबहुवचनं गृह्यते, न 'डेराम्नद्याम्नीभ्यः (८.३.१६) इति, तस्य हि परत्वादाड्याट्स्याटो भवन्ति । यश्च 'किमेत्तिङव्ययघादामुः' (५.४.११), 'आम् च लिटि' (३.१.३५); न तौ सर्वनाम्नः स्तः । सानुबन्धकाविति वा, तौ न गृह्येते ।

'आमि' इति सप्तमीनिर्देश उत्तरार्थः । इह तु 'सर्वनाम्नः' इति पञ्चमीनिर्देशात् 'तस्मादित्युत्तरस्य' (१.१.६७) इति षष्ठीप्रक्लृप्तिर्भविष्यति ॥

३२२९. त्रेस्त्रयः ॥ ५३ ॥ (२६४)

'त्रि' इत्येतस्य आमि परे 'त्रय' इत्ययमादेशो भवति । त्रयाणाम् ।

त्रीणामित्यपि छन्दसीष्यते - त्रीणामपि समुद्राणामिति ॥

३२३०. ह्रस्वनद्यापो नुट् ॥ ५४ ॥ (२७८)

ह्रस्वान्तान्नद्यन्तादाबन्ताच्चोत्ताच्चोत्तरस्यमो नुडागमो भवति । ह्रस्वान्तात्तावत् - वृक्षाणाम् । प्लक्षाणाम् । अग्नीनाम् । वायूनाम् । कर्तॄणाम् । नद्यन्तात् - कुमारीणाम् । किशोरीणाम् । गौरीणाम् । शर्ङ्गरवीणाम् । लक्ष्मीणाम् । ब्रह्मबन्धूनाम् । वीरबन्धूनाम् । मालानाम् । बहुराजानाम् । कारीषगन्ध्यानाम् ॥

३२३१. षट्चतुर्भ्यश्च ॥ ५५ ॥ (३३८)

षट्संज्ञकेभ्यश्चतुः शब्दाच्चोत्तरस्यामो नुगाडमो भवति । षण्णाम् । पञ्चानाम् । सप्तानाम् । नवानाम् । दशानाम् । चतुर्णाम् ।

रेफान्तायाः संख्यायाः षट्संज्ञा न विहिताः 'षड्भ्यो लुक्' (७.१.२२) इति लुग्मा भूत् । बहुवचननिर्देशादत्र संख्याप्रधानस्य ग्रहणं भवति - परमषण्णाम् । परमसप्तानाम् । परमचतुर्णाम्।

उपसर्जनीभूतायास्तु संख्याया न भवति - प्रियषषाम्, प्रियपञ्चानाम्, प्रियचतुरामिति ॥

३२३२. श्रीग्रामण्योश्छन्दसि ॥ ५६ ॥ (३५७३)

श्री, ग्रामणी - इत्येतयोश्छन्दसि विषये आमो नुडागमो भवति । श्रीणामुदारो धुरुणो रयीणाम् (ऋ. १०.४५.५) 'अप्यत्र सूतग्रामणीनाम्' (का. २८.३) ।

श्रीशब्दस्य 'वामि' (१.४.५) इति विकल्पेन नदीसंज्ञा, तत्र नित्यार्थं वचनम् ।

सूतग्रामणीनामिति - यदा सूताश्च ग्रामण्यश्च सूतग्रामण्यो भवन्ति, तदर्थमिदं वचनम्। यद तु सूतश्च ग्रामणीश्च सूतग्रामणि, सूतग्रामणि च सूतग्रामणि च सूतग्रामणि चेति सूतग्रामणीनामिति, तदा 'ह्रस्वात्' (७.१.५४) इत्येव सिद्धम् ॥

३२३३. गोः पादान्ते ॥ ५७ ॥ (३५७४)

'गो' इत्येतस्माद्दक्पादान्ते वर्त्तमानादुत्तरस्यामो नुडागमो भवति । व्रिह्मा हि त्वा॒ सत्प॑र्त शूर॒गोन॑म् (ऋ. १०.४७.२) ।

पादान्त इति किम्? 'गवां गोत्रमुदसृजो यदङ्गिरः॒ (ऋ. २.२३.१८) । 'सर्वे विधयश्छन्दसि विकल्प्यन्ते' (पु. प. ३५) इति पादान्तेऽपि क्वचिन्न भवति । हन्तारं शत्रूणां कृधि विराजं गोपतिं गवाम्' (ऋ. १०.१६६.१) ।

३२३४. इदितो नुम् धातोः ॥ ५८ ॥ (२२६२)

इदितो धातुर्नुमागमो भवति । कुडि-कुण्डिता, कुण्डितुम्, कुण्डितव्यम्, कुण्डा । हुडि - हुण्डिता, हुण्डितुम्, हुण्डितव्यम्, हुण्डा ।

इदित इति किम्? पचति । पठति ।

अयं धातूपदेशावस्थायामेव नुमागमो भवति (म.भा.) - कुण्डा, हुण्डेति; 'गुरोश्च हलः' (३.३.१०३) इत्यकारप्रत्ययो यथा स्यात् । तथा हि-'धिन्विकृण्व्योर च' (३.१.८०) इति प्रत्ययविधावेव नुमनुषक्तयोर्ग्रहणम् ।

धातुग्रहणं चेह क्रियते - धातूपदेशकाल एव नुमागमो यथा स्यादित्येवमर्थम्। तासिसिचोरिदित्कार्यं नास्ति-इत्युच्चारणार्थो निरनुनासिक इकारः पठ्यते । अमंस्तेत्येवमादौ हि 'हनः सिच्' (१.२.२४) इति कित्त्वविधानसामर्थ्यान्नकारलोपो न भवति ।

मन्ता-इत्यत्रापि 'असिद्धवदत्रा भात्' (६.४.२२) इति टिलोपस्या-सिद्धत्वान्नलोपो न भवति।

इह कस्मान्न भवति - भेक्ता, छेत्तेति? 'इरितां समुदायस्येत्संज्ञा' (४.२.५७) इतीदित्त्वं नास्ति ।

अवयवशोऽपीत्संज्ञायां सत्याम् 'गोः पादान्ते' (७.१.४७) इत्यतोऽन्त-ग्रहणमनुवर्त्तयितव्यम् । तेनान्तेदितो धातवो गृह्यन्ते ॥

३२३५. शे मुचादीनाम् ॥ ५९ ॥ (२५४२)

शे प्रत्यये परतो मुचादीनां नुमागमो भवति । मुच्लृ-मुञ्चति । लृप्लृ-लुम्पति । विद्लृ-विन्दति । लिपि-लिम्पति । सिच्-सिञ्चति । कृती-कृन्तति । खिद-खिन्दति । पिश-पिंशति ।

शे तृम्फादीनामुपसंख्यानं कर्त्तव्यम् (म. भा. ७.१.४९ वा १) । के पुनस्तृम्फादयः? 'तृफ तृम्फ तृप्तौ' (धा.प. १३०८-९) । 'दृफ दृम्फ उत्क्लेशे' (धा.पा. १३१४-१५), 'गुफ गुम्फ ग्रन्थे' (धा.पा. १३१८-१९); 'उभ उम्भ पूरणे' (धा. पा. १३२०-२१), 'शुभ शुम्भ शोभार्थे' (धा.पा. १३२२-२३) - इत्यत्र ये सानुषङ्गास्तृम्फादयः, तेषाम् 'अनिदितां हल उपधायाः क्ङिति' (६.४.२४) इत्यनुनासिकलोपे कृते नुम्विधीयते, स च विधानसामर्थ्यान्न लुप्यते-तृम्फति, दृम्फति, गुम्फति, उम्भति, शुम्भति । ये तु निरनुषङ्गाः, तेषां तृफति, दृफति, गुफति, उभति, शुभतीत्येवं भवति ॥

३२३६. मस्जिनशोर्झलि ॥ ६० ॥ (२५१७)

मस्जि, नशि-इत्येतयोरङ्गयोर्झलादौ प्रत्यये नुमागमो भवति । मङ्क्ता, मङ्क्तुम्, मङ्क्तव्यम् । नंष्टा, नंष्टुम्, नंष्टव्यम् ।

झलीति किम्? मज्जनम् । नशनम् ।

'मस्जेरन्त्यात्पूर्वं नुममिच्छन्त्यनुषङ्गादिलोपार्थम्' (म. भा. ८.२.२१) । मग्नः । मग्नवान् ॥

३२३७. रधिजभोरचि ॥ ६१ ॥ (२३०२)

रधि, जभि-इत्येतयोरजादौ प्रत्यये नुमागमो भवति । रन्धयति । रन्धकः । साधुरन्धी। रन्धंरन्धम् । रन्धो वर्त्तते । जम्भयति । जम्भकः । साधुजम्भी । जम्भं जम्भम् । जम्भो वर्त्तते । परापि सती वृद्धिर्नुमा बाध्यते; नित्यत्वात् ।

अचीति किम्? रद्धा । जभ्यम् ॥

३२३८. नेट्यलिटि रधेः ॥ ६२ ॥ (२५१६)

इडादावलिटि प्रत्यये परे रधेर्नुमागमो न भवति । रधिता । रधितुम् । रधितव्यम् ।

इटीति किम्? रन्धनम्, रन्धकः । अलिटीति किम्? ररन्धिव, ररन्धिम ।

नुमि कृते संयोगान्तत्वाद् 'असंयोगाल्लिट् कित्' (१.२.५) इति कित्त्वं नास्तीति नलोपो न भवति ।

अथ क्वसौ कथं भवितव्यम्? रेधिवानिति । कथम्? एत्वाभ्यासलोपयोः कृतयोरिडागमः क्रियते, ततो नुमागमः, तस्यौपदेशिककित्त्वाश्रयो लोपः ।

अथ इटि लिटीत्येवं नियमः कस्मान्न क्रियते - लिट्येवेटि नान्यत्रेति? विपरीतमप्यवधारणं सम्भाव्येत - इट्येव लिटि नान्यत्रेति । तथा हि सति ररन्धेत्यत्र न स्यात्, रधितेत्यत्र च स्यादेव ॥

३२३९. रभेरशब्लिटोः ॥ ६३ ॥ (२५८१)

रभेरङ्गस्य शब्लिङ्वर्जितेऽजादौ प्रत्यये परतो नुमागमो भवति । आरम्भयति । आरम्भकः । साध्वारम्भी । आरम्भमारम्भम् । आरम्भो वर्त्तते ।

अशब्लिटोरिति किम्? आरभते । अरेभे ।

अचीत्येव-आरब्धा ॥

३२४०. लभेश्च ॥ ६४ ॥ (२५८२)

लभेश्चाजादौ प्रत्यये शब्लिङ्वर्जिते नुमागमो भवति । लम्भयति । लम्भकः । साधुलम्भी। लम्भंलम्भम् । लम्भो वर्त्तते ।

अशब्लिटोरित्येव - लभते । लेभे । अचीत्येव-लब्धा ।

लभेश्च पृथग्योकरणमुत्तरार्थम् ॥

३२४१. आङो यि ॥ ६५ ॥ (२८४५)

आङः उत्तरस्य लभेर्यकारादि प्रत्ययविषये नुमागमो भवति । आलम्भ्या गौः । आलम्भ्या वडवा ।

प्राक्प्रत्ययोत्पत्तेर्नुमि कृते विहतमदुपधत्वामिति 'ऋहलोर्ण्यत्' (३.१.१२४) इति ण्यत्प्रत्ययः, तत्र कृदुत्तरपदप्रकृतिस्वरत्वेनान्तस्वरितत्वं भवति । यति तु पुनरुत्तरपदाद्युदात्तत्वं स्यात् ।

आङः इति किम्? लभ्यम् ।

कथम् - 'अग्निष्टोम आलभ्य' इति? 'सर्वे विधयश्छन्दसि विकल्प्यन्ते' (पु. प. ३५)

अथ वा - आलभ्य इत्यत्र नुमि कृतेऽनुषङ्गलोपः क्रियते ॥

३२४२. उपात्प्रशंसायाम् ॥ ६६ ॥ (२८४६)

उपादुत्तरस्य लभेः प्रशंसायां गम्यमानायां यकारादिप्रत्ययविषये नुमागमो भवति । उपलम्भ्या भवता विद्या । उपलम्भ्यानि धनानि । ण्यत्प्रत्ययान्तत्वा-दन्तस्वरितत्वमेव ।

प्रशंसायामिति किम्? उपलभ्यमस्माद् वृषलात्किञ्चित् । पोरदुपधत्वाद्यत्प्रत्ययान्तमिदम् ॥

३२४३. उपसर्गात्खल्घञोः ॥ ६७ ॥ (३३०६)

उपसर्गादुत्तरस्य लभेः खल्घञोः परतो नुमागमो भवति । ईषत्प्रलम्भः । सुप्रलम्भः । दुष्प्रलम्भः । घञि - प्रलम्भः, विप्रलम्भः ।

सिद्धे सत्यारम्भो नियमार्थः - उपसर्गादेव लभेः खल्घञोः परतो नुमागमो भवति, नान्यत्र । ईषल्लभः । लाभो वर्त्तते ॥

३२४४. न सुदुर्भ्यां केवलाभ्याम् ॥ ६८ ॥ (३३०७)

सु, दुर्-इत्येताभ्यां केवलाभ्यामन्योपसर्गरहिताभ्यामुपसृष्टस्य लभेः खल्घञोः परतो नुमागमो न भवति । सुदुर्लभम् । सुलभम् । दुर्लभम् । घञि-सुलाभः, दुर्लाभः ।

'सुदुर्भ्याम्' इति तृतीयां मत्वा केवलग्रहणं क्रियते । पञ्चम्यां हि व्यवहितत्वादेवाप्रसङ्गः ।

अतिसुलभमित्यत्र कर्मप्रवचनीयत्वादतेः केवल एव सुशब्द उपसर्ग इति भवति प्रतिषेधः। यदा त्वतिशब्दो न कर्मप्रवचनीयः, तदा नुम्भवत्येव - अतिसुलम्भ इति ।

पञ्चमीनिर्देशपक्षेऽप्येवमर्थं केवलग्रहणं कर्त्तव्यम् ॥

३२४५. विभाषा चिण्णमुलोः ॥ ६९ ॥ (२७६५)

चिण्, णमुल्-इत्येतयोर्विभाषा लभेर्नुम्भवति । अलाभि, अलम्भि । लाभंलाभाम् । लम्भंलम्भम् ।

व्यवस्थितविभाषा चेयम्, तेनानुपसृष्टस्य विकल्पः । उपसृष्टस्य नित्यं नुम्भवति - प्रालम्भि, प्रलम्भम् ॥

३२४६. उगिदचां सर्वनामस्थानेऽधातोः ॥ ७० ॥ (३६१)

उगितामङ्गानां धातुवर्जितानामञ्चतेश्च सर्वनामस्थाने परतो नुमागमो भवति। भवतु-भवान्, भवन्तौ, भवन्तः । ईयसुन्-श्रेयान्, श्रेयांसौ, श्रेयांसः । शतृ-पचन्, पचन्तौ, पचन्तः । अञ्चतेः-प्राङ्, प्राञ्चौ, प्राञ्चः ।

उगिदचामिति किम्? दृषत्, दृषदौ, दृषदः । सर्वनामस्थान इति किम्? भवतः पश्य । श्रेयसः पश्य ।

अञ्चतिग्रहणं नियमार्थम्-धातोरन्यस्य मा भूत् । उखास्रत् । पर्णध्वत् ।

अधातोरिति किम्? अधातुभूतपूर्वस्य यथा स्यात् । गोमन्तमिच्छति गोमत्यति, गोमत्यतेरप्रत्ययः - गोमान् । अत्र हि धातुत्वादञ्चतिग्रहणान्न स्यात् ॥

३२४७. युजेरसमासे ॥ ७१ ॥ (३७६)

युजेरसमासे सर्वनामस्थाने परतो नुमागमो भवति । युङ्, युञ्जौ, युञ्जः ।

असमासे इति किम्? अश्वयुक्, अश्वयुजौ, अश्वयुजः ।

'युजेः' इतीकारनिर्देशाद् 'युज समाधौ' (धा.पा. ११७८) इत्यस्य ग्रहणं न भवति - युजमापन्ना ऋषयः ॥

३२४८. नपुंसकस्य झलचः ॥ ७२ ॥ (३१४)

नपुंसकस्य झलन्तस्याजन्तस्य च सर्वनामस्थाने परतो नुमागमो भवति । उदश्विन्ति । शकृन्ति । यशांसि । पयांसि । अजन्तस्य - कुण्डानि । वनानि । त्रपूणि । जतूनि ।

नपुंसकस्येति किम्? अग्निचिद् ब्राह्मणः । झलच इति किम्? बहुपुरि । बहुधुरि । विमलदिवि । चत्वारि । अहानि ।

उगितो झलन्तस्य नपुंसकस्य परत्वादनेनैव नुम्भवति । श्रेयांसि, भूयांसि, कुर्वन्ति, कृषन्ति, ब्राह्मणकुलानि ।

बहूर्जि प्रतिषेधो वक्तव्यः (म. भा. ७.१.७२. वा. ४) । बहूर्जि ब्राह्मणकुलानि ।

अन्त्यात्पूर्वं नुममेक इच्छन्ति (म. भा.) । बहूञ्जि ब्राह्मणकुलानि ॥

३२४९. इकोऽचि विभक्तौ ॥ ७३ ॥ (३२०)

इगन्तस्य नपुंसकस्याङ्गस्याजादौ नुमागमो भवति । त्रपुणी । जतुनी । तुम्बुरुणी । त्रपुणे । जतुने । तुम्बुरुणे ।

इक इति किम्? कुण्डे । पीठे ।

अचीति किम्? उत्तरार्थम् । यद्येवम्, तत्रैव कर्त्तव्यम् ? इह तु करणस्य एतत्प्रयोजनम् - हे त्रपो इत्यत्र नुम् मा भूदिति, 'न ङिसम्बुद्ध्योः' (८.२.८) इति नलोपप्रतिषेधः स्यात् ।

ननु च 'न लुमताङ्गस्य' (१.१.६३) इति प्रत्ययलक्षणे प्रतिषिद्धे विभक्तिरेव नास्ति? एतदेवाज्ग्रहणं ज्ञापकम्-प्रत्ययलक्षणप्रतिषेधोऽत्र् न भवतीति । तथा च - सम्बुद्धिगुणः क्रियते ।

विभक्ताविति किम्? तौम्बुरवं चूर्णम् ।

इकोऽचि व्यञ्जने मा भूदस्तु लोपः स्वतः कथम्?

स्वरो वै श्रूयमाणेऽपि लुप्ते किं न भविष्यति? (म. भा.)

रायात्वं तिसृभावश्च व्यवधानान्नुमा अपि ।

नुड् वाच्य, उत्तरार्थं तु इह किञ्चित्त्रपो इति ॥ (म. भा.)

३२५०. तृतीयादिषु भाषितपुंस्कं पुंवद् गालवस्य ॥ ७४ ॥ (३२१)

तृतीयादिषु विभक्तिष्वजादिषु भाषितपुंस्कमिगन्तं नपुंसकं गालवस्याचार्यस्य मतेन पुंवद्भवति । यथा पुंसि ह्रस्वनुमौ न भवतः, तद्वदत्रापि न भवत इत्यर्थः । ग्रामणीर्ब्राह्मणः, ग्रामणि ब्राह्मणकुलम् । ग्रामण्या ब्राह्मणकुलेन, ग्रामणिना ब्राह्मणकुलेन । ग्रामण्ये ब्राह्मणकुलाय, ग्रामणिने ब्राह्मणकुलाय । ग्रामण्यो ब्राह्मणकुलात्, ग्रामणिनो ब्राह्मणकुलात् । ग्रामण्यो ब्राह्मणकुलस्य, ग्रामणिनो ब्राह्मणकुलस्य । ग्रामण्योर्ब्राह्मणकुलयोः, ग्रामणिनोर्ब्राह्मणकुलयोः । ग्रामण्यां ब्राह्मणकुलानाम्-'नुमचिर' (८.२.२४) इति पूर्वविप्रतिषेधेन नुट्, ग्रामणीनां ब्राह्मणकुलानाम् । ग्रामण्यां ब्राह्मणकुले, ग्रामणिनि ब्राह्मणकुले ।

शुचिर्ब्राह्मणः, शुचि ब्राह्मणकुलम् । शुचिना ब्राह्मणकुलेन । शुचये ब्राह्मणकुलाय, शुचिने ब्राह्मणकुलाय । शुचेर्ब्राह्मणकुलात्, शुचिनो ब्राह्मणकुलात् । शुचेर्ब्राह्मणकुलस्य, शुचिनो ब्राह्मणकुलस्य । शुच्योर्ब्राह्मणकुलयोः शुचिनोर्ब्राह्मणकुलयोः । शुचौ ब्राह्मणकुले, शुचिनि ब्राह्मणकुले ।

तृतीयादिष्विति किम्? ग्रामणिनी ब्राह्मणकुले । शुचिनी ब्राह्मणकुले । भाषितपुंस्कमिति किम्? त्रपुणे, जतुने ।

इह कस्मान्न भवति - पीलुर्वृक्षः पीलु, फलम् - पीलुने फलायेति? समानायामाकृतौ यद्भाषितपुंस्कं तुल्ये प्रवृत्तिनिमित्ते तस्य पुंवद्भावः (म. भा.) । इह तु वृक्षाकृतिः प्रवृत्तिनिमित्तं पुंसि शब्दस्य, फलाकृतिर्नपुंसके । तदेतदेवं कथं भवति - भाषितपुंस्कमिति ? भाषितः पुमान्यस्मिन्नर्थे=प्रवृत्तिनिमित्ते स भाषितपुंस्कशब्देनोच्यते, तद्योगादभिधेयमपि यद् नपुंसकं तदपि भाषितपुंस्कम् । तस्य प्रतिपादकं यच्छब्दरूपं तदपि भाषितपुंस्कमिति ।

इक इत्येव - कीलालपा ब्राह्मणः । कीलालपं ब्राह्मणकुलम् । कीलालपेन ब्राह्मणकुलेन।

अचीत्येव - ग्रामणिभ्यां ब्राह्मणकुलाभ्याम् ॥

३२५१. अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः ॥ ७५ ॥ (३२२)

अस्थि, दधि, सक्थि, अक्षि-इत्येतेषां नपुंसकानां तृतीयादिष्वजादिषु विभक्तिषु परतोऽनङित्ययमादेशो भवति, स चोदात्तो भवति । अस्थ्ना, अस्थ्ने । दध्ना, दध्ने । सक्थ्ना, सक्थ्ने । अक्ष्णा, अक्ष्णे ।

अस्थ्यादय आद्युदात्ताः, तेषामनङादेशः स्थानिवद्भावादनुदात्तः स्यादित्युदात्तवचनम् । तत्र भसंज्ञायामल्लोपे कृते उदात्तनिवृत्तिस्वरेण विभक्तिरुदात्ता भवति ।

एतैरस्थ्यादिभिर्नपुंसकैरनपुंसकस्याप्यङ्गस्य तदन्तग्रहणमिष्यते । प्रियास्थ्ना ब्राह्मणेन, प्रियदध्ना ।

तृतीयादिष्विति किम्? अस्थिनी, दधिनी ।

अचीत्येव - अस्थिभ्याम्, दधिभ्याम् ।

३२५२. छन्दस्यपि दृश्यते ॥ ७६ ॥ (३५७५)

अस्थिदधिसक्थ्यक्ष्णामनङ् छन्दस्यपि दृश्यते । यतो विहितस्ततोऽन्यत्रापि दृश्यते ।

'अचि' इत्युक्तम्, अनजादावपि दृश्यते- 'इन्द्रो दधीचो अस्थभिः (ऋ १.४४.१३) । 'भद्रं पश्येमाक्षभिः' (वा.सं. २५.२१) ।

'तृतीयादिषु' इत्युक्तम्, अतृतीयादिष्वपि दृश्यते - अस्थान्युत्कृत्य जुहोति ।

'विभक्तौ' इत्युक्तम्, अविभक्तावपि दृश्यते - अक्षण्वता लाङ्गलेन । 'अस्थन्वन्तं॑ यदनस्था बिभर्ति' (ऋ. १.१६४.४) ॥

३२५३. ई च द्विवचने ॥ ७७ ॥ (३५७६)

द्विवचने परतश्छन्दसि विषयेऽस्थ्यादीनामीकारादेशो भवति, स चोदात्तः । अक्षि ते इन्द्र पिङ्गले कपेरिव । 'अक्षीभ्यं॑ त नासिकाभ्याम्' (ऋ. १०.१६३.१) । अक्षी - इत्यत्र नुम्परत्वादीकारेण बाध्यते, तत्र कृते 'सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव' (व्या.प. ४०) इति पुनर्नुम्न क्रियते ॥

३२५४. नाभ्यस्ताच्छतुः ॥ ७८ ॥ (४२७)

अभ्यस्तादङ्गादुत्तरस्य शतुर्नुम्न भवति । ददत्, ददतौ, ददतः । दधत्, दधतौ, दधतः। जक्षत्, जक्षतौ, जक्षतः । जाग्रत्, जाग्रतौ, जाग्रतः ।

शतुरनन्तर ईकारो न विहित इति व्यवहितस्यापि नुमः प्रतिषेधो विज्ञायते ॥

३२५५. वा नपुंसकस्य ॥ ७९ ॥ (४४४)

अभ्यस्तादङ्गादुतरो यः शतृप्रत्ययस्तदन्तस्य नपुंसकस्य वा नुमागमो भवति। ददति ददन्ति कुलानि । दधति दधन्ति कुलानि । जक्षति जक्षन्ति कुलानि । जाग्रति, जाग्रन्ति कुलानि ॥

३२५६. आच्छीनद्योर्नुम् ॥ ८० ॥ (४४५)

अवर्णान्तादङ्गदुत्तरस्य शतुर्वा नुमागमो भवति शीनद्योः परतः । तुदती कुले, तुदन्ती कुले । तुदती ब्राह्मणी, तुदन्ती ब्राह्मणी याती कुले, यान्ती कुले । याती ब्राह्मणी, यान्ती ब्राह्मणी। करिष्यती कुले, करिष्यन्ती कुले । करिष्यती ब्राह्मणी, करिष्यन्ती ब्राह्मणी ।

अत्रान्तरङ्गत्वादेकादेशे कृते व्यपवर्गाभावादवर्णान्तादङ्गादुत्तरस्य शतुरिति न युज्यते वक्तुम्, 'उभयत आश्रये नान्तादिवत्' (व्या.प. ५१) इत्यन्तादिवद्भावोऽपि नास्ति, भूतपूर्वगत्याश्रयणे वा-अदती, घ्नतीत्येवमादिष्वतिप्रसङ्ग इति? अत्र समाधिं केचिदाहुः - शतुरवयवे शतृशब्दो वर्त्तते, अवर्णान्तादङ्गादुत्तरो यः शत्रवयव इति।

अपरे पुनराहुः - 'आत्' इत्येतेन शीनद्यावेव विशेष्येते, अवर्णान्तादङ्गादुत्तरे ये शीनद्यौ तयोः परतः शत्रन्तस्य नुम्भवतीति । तत्र येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यादिति तकारेणैव व्यवधानमाश्रयिष्यते ।

आदिति किम्? कुर्वती । सुन्वती । शीनद्योरिति किम्? तुदताम् । नुदताम् ॥

३२५७. शप्श्यनोर्नित्यम् ॥ ८१ ॥ (४४६)

शप्, श्यन्-इत्येतयोः शतुः शीनद्योः परतो नित्यं नुमागमो भवति । पचन्ती कुले, पचन्ती ब्राह्मणी । दीव्यन्ती कुले, दीव्यन्ती ब्राह्मणी । सीव्यन्ती कुले, सीव्यन्ती ब्राह्मणी ।

नित्यग्रहणम् 'वा' इत्यस्याधिकारस्य निवृत्त्यर्थम् । इहारम्भसामर्थ्यान्नित्यमुत्तरत्र विकल्प एवेत्याशङ्क्येत ॥

३२५८. सावनडुहः ॥ ८२ ॥ (३३२)

सौ परतोऽनडुहोऽङ्गस्य नुमागमो भवति । अनड्वान् । हे अनड्वन् ।

अत्र केचित् 'आत्' -इत्यधिकारादाममोः कृतयोर्नुमं कुर्वन्ति । तेन नुमाऽमामौ न बाध्येते, आमम्भ्यां च नुमिति ।

अपरे तु - सत्यपि सामान्यविशेषत्वे आममोर्नुमश्च समावेशमिच्छन्ति, न बाध्यबाधकभावम्, यथा- चिचीषत्यादिषु दीर्घत्वद्विर्वचनयोरिति ॥

३२५९. दृक्स्ववस्स्वतवसां छन्दसि ॥ ८३ ॥ (३५७७)

दृक्, स्ववस्, स्वतवस्-इत्येतेषां सौ परतो नुमागमो भवति छन्दसि विषये। ईदृङ् । तादृङ् । यादृङ् । सदृङ् । स्ववान् । स्वतवान्पायुरग्ने ॥

३२६०. दिव औत् ॥ ८४ ॥

'दिव्' -इत्येतस्य सौ परतः 'औत्' इत्येवमादेशो भवति । द्यौः ।

दिविति प्रातिपदिकमस्ति निरनुबन्धकम् । धातुस्तु सानुबन्धकः, स इह न गृह्यते- अक्षद्यूः ॥

३२६१. पथिमथ्यृभुक्षामात् ॥ ८५ ॥ (३६५)

पथिन्, मथिन्, ऋभुक्षिन् - इत्येतेषामङ्गानां सौ परत आकार आदेशो भवति । पन्थाः। मन्थाः । ऋभुक्षाः । स्थानिन्यनुनासिकेऽपि अकारोऽनुनासिको न भवति । भाव्यमानेन सवर्णानां ग्रहणं न भवतीति शुद्धो ह्ययमुच्चार्यते ॥

३२६२. इतोऽत्सर्वनामस्थाने ॥ ८६ ॥ (३६६)

पथ्यादीनामिकारस्य स्थाने अकारादेशो भवति सर्वनामस्थाने परतः । पन्थाः, पन्थानौ, पन्थानः, पन्थानम्, पन्थानौ । मन्थाः, मन्थानौ, मन्थानः, मन्थानम्, मन्थानौ । ऋभुक्षाः, ऋभुक्षाणौ, ऋभुक्षाणः, ऋभुक्षाणम्, ऋभुक्षाणौ ।

'आत्' इति वर्त्तमाने पुनरद्वचनं षपूर्वार्थम् । ऋभुक्षणमित्यत्र 'वा षपूर्वस्य निगमे' (६.४.९) इति दीर्घविकल्पः ॥

३२६३. थो न्थः ॥ ८७ ॥ (६३७)

पथिमथोस्थकारस्य स्थाने 'न्थ' -इत्ययमादेशो भवति सर्वनामस्थाने परतः। पन्थाः, पन्थानौ, पन्थानः । मन्थाः, मन्थानौ, मन्थानः ।

३२६४. भस्य टेर्लोपः ॥ ८८ ॥ (३६८)

पथ्यादीनां भसंज्ञकानां टेर्लोपो भवति । पथः, पथा, पथे । मथः, मथा, मथे। ऋभुक्षः, ऋभुक्षा, ऋभुक्षे ।

'सर्वनामस्थाने' इत्यनुवर्त्तमानमपि विरोधादिह न सम्बद्ध्यते ॥

३२६५. पुंसोऽसुङ् ॥ ८९ ॥ (४३६)

'पुंस्' इत्येतस्य सर्वनामस्थाने परतोऽसुडित्ययमादेशो भवति । पुमान् । पुंमासौ । पुमांसः ।

इह परमपुमानिति प्रागेव च प्रत्ययोत्पत्तेः समासान्तोदात्तत्वमुत्पन्नायां विभक्तौ असुञित्यनिष्टः स्वरः प्राप्नोति? तदर्थमसुङि उपदेशिवद्वचनं कर्त्तव्यम् (म. भा.)। तेन परमपुमानित्यन्तोदात्तो भवति । पुमानित्ययं पुनराद्युदात्त एव ॥

३२६६. गोतो णित् ॥ ९० ॥ (२८४)

गोशब्दात्परं सर्वनामस्थानं णिद्भवति । णित्कार्यं तत्र भवतीत्यर्थः । गौः, गावौ, गावः ।

तपरकरणं किम्? चित्रगुः । शबलगुः ।

कथं हे चित्रगो, हे शवलगव इति? 'अङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्य' (व्या.प.३४) इति सम्बुद्धिजसोर्गुणे कृते णित्त्वं न भवति ।

अथ वा - 'गोतः' इति सम्बन्धलक्षणा षष्ठी, गोतः सम्बन्धि यत्सर्वनामस्थानमिति । यच्च तदर्थस्यैकत्वादिषु सर्वनामस्थानं तद् गोः सर्वनामस्थानमित्युच्यते । चित्रगुशब्दात्तु सर्वनामस्थानं तदन्यपदार्थस्यैकत्वादीनाह ।

तपरकरणं तु निर्देशार्थमेव ।

केचित् 'ओतो णित्' इति पठन्ति । द्योशब्दादपि यत्सर्वनामस्थानं विद्यते तदर्थम् । द्यौः, द्यावौ, द्यावः । 'गोतः' इत्येतदेव तपरकरणनिर्देशादोकारान्तोपलक्षणं द्रष्टव्यम् । वर्णनिर्देशेषु हि तपरकरणं प्रसिद्धम् ॥

३२६७. णलुत्तमो वा ॥ ९१ ॥ (२२८३)

उत्तमो णल्वा णिद् भवति । णित्कार्यं तत्र वा भवतीत्यर्थः । अहं चकार, अहं चकर । अहं पपाच, अहं पपच ॥

३२६८. सख्युरसम्बुद्धौ ॥ ९२ ॥ (२५३)

असम्बुद्धौ यः सखिशब्दः तस्मात्परं सर्वनामस्थानं णिद्वद्भवति । सखायौ । सखायः । असम्बुद्धाविति किम्? हे सखे ॥

३२८८. अनङ् सौ ॥ ९३ ॥ (३४८)

सखिशब्दस्य सौ परतोऽनङित्ययमादेशो भवति, स चेत्सुशब्दः सम्बुद्धिर्न भवति । सखा। असम्बुद्धाविति किम्? हे सखे ॥

३२७०. ऋदुशनस्पुरुदंसोऽनेहसां च ॥ ९४ ॥(२७६)

ऋकारान्तानामङ्गानाम्, उशनस्, पुरुदंसस्, अनेहस्-इत्येतेषां चासम्बुद्धौ सौ परतोऽनङादेशो भवति । कर्त्ता । हर्त्ता । माता । पिता । भ्राता । उशना । पुरुदंसा । अनेहा ।

असम्बुद्धावित्येव - हे कर्त्तः । हे मातः । हे पितः । हे पुरुदंसः । हे अनेहः । हे उशनः।

उशनसः सम्बुद्धावपि पक्षेऽनङ् इष्यते - हे उशनन् ।

'न ङिसम्बुद्ध्योः' (८.२.८) इति नलोपप्रतिषेधोऽपि पक्ष इष्यते - हे उशन । तथा चोक्तम्-

सम्बोधने तूशनसस्त्रिरूपं सान्तं तथा नान्तमथाप्यदन्तम् ।
माध्यन्दिनिर्वष्टि गुणं त्विगन्ते नपुंसके व्याघ्रपदां वरिष्ठः ॥ इति ।

तपरकरणमसन्देहार्थम् ॥

३२७१. तृज्वत्क्रोष्टुः ॥ ९५ ॥ (२७४)

क्रोष्टुशब्दस्तुन्प्रत्ययान्तः संज्ञाशब्दः सर्वनामस्थानेऽसम्बुद्धौ परतः तृज्वद्भवति। तृजन्तस्य यद्रूपं तदस्य भवतीत्यर्थः ।

रूपातिदेशोऽयम् । प्रत्यासत्तेश्च क्रुशेरेव तृजन्तस्य यद्रूपं तदतिदिश्यते । तच्च 'क्रोष्टृ' इत्येतदन्तोदात्तम् । क्रोष्टा, क्रोष्टारौ, क्रोष्टारः । क्रोष्टारम्, क्रोष्टारौ ।

'सर्वनामस्थाने' इत्येव-क्रोष्टून् । 'असम्बुद्धौ' इत्येव - हे क्रोष्टो ॥

३२७२. स्त्रियां च ॥ ९६ ॥ (३०५)

असर्वनामस्थानार्थमारम्भः । स्त्रियां च क्रोष्टुशब्दस्य तृज्वद् भवति । क्रोष्ट्री । क्रोष्ट्रीभ्याम्, क्रोष्ट्रीभिः ।

क्रोष्टुशब्दं केचिद् गौरादिषु पठन्ति, ते ङीषि प्रत्यये तृज्वद्भावं कुर्वन्ति । तेषां पञ्चभिः क्रोष्ट्रीभिः क्रीतैः - पञ्चक्रोष्टृभी रथैरिति स्त्रीशब्दस्य लुकि कृते न सिद्ध्यति, तत्र प्रतिविधेयम् ।

ये तु गौरादिषु न पठन्ति, तेषां स्त्रियामित्यर्थनिर्देशः - स्त्रियां वर्त्तमानः क्रोष्टुशब्दः तृज्वद्भवति । कृतेऽतिदेशे, 'ऋन्नेभ्यो ङीप्' (४.१.५) इति ङीप्प्रत्ययः । तत्र 'उदात्तयणो हल्पूर्वात्' (६.१.१७४) इत्यन्तोदात एवं क्रोष्ट्रीशब्दो भवति ॥

३२७३. विभाषा तृतीयादिष्वचि ॥ ९७ ॥ (२७८)

तृतीयादिषु विभक्तिष्वजादिषु क्रोष्टुर्विभाषा तृज्वद्भवति । क्रोष्ट्रा, क्रोष्टुना । क्रोष्ट्रे, क्रोष्टवे । क्रोष्टुः, क्रोष्टोः -२ । क्रोष्टरि, क्रोष्टौ । क्रोष्ट्रोः, क्रोष्ट्वोः-२ ।

तृतीयादिष्विति किम्? क्रोष्टून् । अचीति किम्? क्रोष्टुभ्याम् । क्रोष्टुभिः ।

तृज्वद्भावात्पूर्वविप्रतिषेधेन नुम्नुटौ भवतः (म. भा. ७.१.९७ वा. १०,११) । प्रियक्रोष्टुनेऽरण्याय । हतक्रोष्टुने वृषलकुलाय । नुट् - क्रोष्टूनाम् ॥

३२७४. चतुरनडुहोरामुदात्तः ॥ ९८ ॥ (३३१)

चतुर्, अनडुह्-इत्येतयोः सर्वनामस्थाने परत आमागमो भवति, स चोदात्तः । चत्वारः । अनड्वान्, अनड्वाहौ, अनड्वाहः, अनड्वाहम् ।

तदन्तविधिरत्रेष्यते । प्रियचत्वाः, प्रियचत्वारौ, प्रियचत्वारः । प्रियानड्वान्, प्रियानड्वाहौ, प्रियानड्वाहः ।

अनडुहः स्त्रियां वेति वक्तव्यम् (म. भा. ७.१.९८ वा.१) । अनुडुही, अनड्वाही । गौरादिपाठात् (४.१.४१) सिद्धम् ॥

३२७५. अम्सम्बुद्धौ ॥ ९९ ॥ (३३३)

सम्बुद्धौ परतश्चतुरनडुहोरमागमो भवति । पूर्वस्यायमपवादः । हे प्रियचत्वः । हे प्रियानड्वन् ॥

३२७६. ऋत इद्धातोः ॥ १०० ॥ (२३९०)

ऋकारान्तस्य धातोरङ्गस्य इकारादेशो भवति । किरति । गिरति । आस्तीर्णम् । विशीर्णम् ।

धातोरिति किम्? मातॄणाम् । पितॄणाम् ।

लाक्षणिकस्याप्यत्र ग्रहणमिष्यते । चिकीर्षतीत्यत्रापि यथा स्यादिति धातुग्रहणं क्रियते ॥

३५७७. उपधायाश्च ॥ १०१ ॥ (२५७१)

उपधायाश्च ऋकारस्य इकारादेशो भवति । कीर्त्तयति, कीर्त्तयतः, कीर्त्तयन्ति ॥

३२७८. उदोष्ठ्यपूर्वस्य ॥ १०२ ॥ (२४९४)

ओष्ठ्यः पूर्वो यस्माद् ऋकारादसावोष्ठ्यपूर्वस्तदन्तस्य धातोरङ्गस्य उकारादेशो भवति। पूर्त्ताः पिण्डाः । पुपूर्षति । मुमूर्षति । सुस्वूर्षति ।

दन्त्यौष्ठ्यपूर्वोऽप्योष्ठ्यपूर्वो भवतीति अत्रापि भवति - वुवूर्षति ऋत्विजम्, प्रावुवूर्षति कम्बलम् । ओष्ठ्यो ह्यत्र प्रत्यासत्तेरङ्गावयव एव गृह्यते, तेन 'ऋ गतौ' (धा.पा. १४९७) इत्यस्य सम्पूर्वस्य समीर्णमिति भवति ।

इत्वोत्त्वाभ्यां गुणवृद्धी भवतो विप्रतिषेधेन (म. भा.) । आस्तरणम्, आस्तारकः । निपरणम्, निपारकः । निगरणम्, निगारकः ॥

३२७९. बहुलं छन्दसि ॥ १०३ ॥ (२५७८)

छन्दसि विषये ऋकारान्तस्य धातोरङ्गस्य बहुलमुकारादेशो भवति । 'ओष्ठ्यपूर्वस्य' इत्युक्तम्, अनोष्ठ्यपूर्वस्यापि भवति - 'मित्रावरुणौ ततुरिः (ऋ. १.१४५.३) । 'दूरे ह्यध्वा जगुरिः' (ऋ. १०.१०८.१) । ओष्ठ्यपूर्वस्यापि न भवति - पप्रितमम्, वव्रितमम् । क्वचिद् भवति - 'पपुरिः' (ऋ. १.४६.४) ॥

॥ इत्युपाध्यायश्रीवामनकृतायां काशिकावृत्तौ

सप्तमाध्यायस्य प्रथमः पादः ॥

अथ सप्तमाध्यायस्य

द्वितीयपादः

३२८०. सिचि वृद्धिः परस्मैपदेषु ॥ १ ॥

परस्मैपदपरे सिचि परत इगन्तस्याङ्गस्य वृद्धिर्भवति । अचैषीत् । अनैषीत्। अलावीत्। अपावीत् । अकार्षीत् । अहार्षीत् । अन्तरङ्गमपि गुणमेषां वृद्धिर्वचनाद् बाधते । न्यनुवीद्, न्यधुवीद् इत्यत्र कुटादित्वात् ङित्त्वे सति प्रतिषिद्धायां वृद्धावुवङादेशः क्रियते । परस्मैपदेष्विति किम्? अच्योष्ट, अप्लोष्ट ॥

३२८१. अतो ल्रान्तस्य ॥ २ ॥

रेफलकारौ यावतः समीपौ तदन्तस्याङ्गस्य अत एव स्थाने वृद्धिर्भवति परस्मैपदपरे सिचि । क्षर-अक्षारीत् । त्सर-अत्सारीत् । ज्वल-अज्वालीत् । ह्मल-अह्मालीत् । अतो हलादेर्लघोरिति विकल्पस्यायमपवादः । अत इति किम्? न्यखोरीत् । न्यमीलीत् । ल्रान्तस्येति किम्? मा भवानटीत् । मा भवानशीत् । अन्तग्रहणं किम्? अवभ्रीत् । अश्वल्लीत् । अत्र यौ रेफलकारावङ्गस्यान्तौ न तावतः समीपौ ॥

३२८२. वदव्रजहलन्तस्याचः ॥ ३ ॥

वदव्रजोर्हलन्तानां चाङ्गानामचः स्थाने वृद्धिर्भवति सिचि परस्मैपदे परतः । अवादीत् । अव्राजीत् । विकल्पबाधनार्थं वदिव्रजिग्रहणम् । हलन्तानाम्-अपाक्षीत्। अभैत्सीत् । अच्छैत्सीत्। अरौत्सीत् । अत्र योगविभागे सति हलन्तग्रहणमन्तरेणापि सिद्ध्यति । कथम्? वदिव्रजोरित्यत्र प्रथमयोगे अत इति स्थानी अनुवर्त्तते । ततो यदच इति सूत्रम्, तत्राङ्गेनाञ्विशेष्यते । अङ्गस्याचः सिचि परतो वृद्धिर्भवति । तदेतद्धल्ग्रहणं हल्समुदायपरिग्रहार्थम् । इहापि स्यात्-अराङ्क्षीत्, असाङ्क्षीत्। अन्यथा हि येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यादित्येकेन वर्णेन व्यवधाने स्यादनेकेन हला न स्यात् । उदवोढामुदवोढमित्यत्र वहेः सिचि ढत्वसलोपादीनां पूर्वत्रासिद्धमित्यसिद्धत्वात् पूर्वं हलन्तलक्षणा वृद्धिः क्रियते, पश्चाद् ढलोपनिमित्तमोत्त्वम् । तत्र कृते पुनर्वृद्धिर्न भवति, कृतत्वात् । यत्र त्वकृता वृद्धिरोकारस्यैव तत्र भवति - सोढामित्रस्यापंत्यं सौढामित्रिरिति ॥

३२८३. नेटि ॥ ४ ॥

इडादौ सिचि हलन्तस्याङ्गस्य वृद्धिर्न भवति । अदेवीत् । असेवीत् । अकोषीत् । अमोषीत् । हलन्तस्येत्येव - अलावीत् । ननु च एतदप्यन्तरङ्गत्वाद् गुणावादेशयोः कृतयोर्हलन्तं भवति? नैतदेवम् । अन्तरङ्गमपि गुणं वचनारम्भसामर्थ्यात् सिचि वृद्धिर्बाधते इत्युक्तम् ॥

३२८४. हृम्यन्तक्षणश्वसजागृणिश्व्येदिताम् ॥ ५ ॥

हकारान्तानां मकारान्तानां यकारान्तानामङ्गानाम्, क्षण, श्वस, जागृ, णि, श्वि इत्येतेषामेदिताम् च इडादौ सिचि परस्मैपदे परतो वृद्धिर्न भवति । ग्रह-अग्रहीत्। स्यम्-अस्यमीत् । व्यय-अव्ययीत् । टुवम्-अवमीत् । क्षण-अक्षणीत् । श्वस्-अश्वसीत् । जागृ-अजागरीत् । पि-औनचीत्, ऐलयीत् । स्वि-अस्वयीत् । एदिताम् - रगे, अरगीत् । कखे-अकखीत् । हृम्यन्तक्षणश्वसामेदितां च अतो हलादेर्लघोरिति विकल्पे प्राप्ते प्रतिषेधः । जागृणिश्वीनां तु सिचि वृद्धिः प्राप्ता, सा च नेटीति न प्रतिषिद्ध्यते । न चान्तरङ्गत्वादत्र पूर्वं गुणो भवति । सिचि वृद्धेरनवकाशत्वात् । यदि पूर्वं गुणः स्यादिह णिश्विग्रहणमनर्थकं स्यात्, गुणायादेशयोः कृतयोर्यकारान्तत्वादेव प्रतिषेधस्य सिद्धत्वात् । तस्मादिदमेव णिश्विग्रहणं ज्ञापकं न सिच्यन्तरङ्गमस्तीति । अथ जागृग्रहणं किमर्थम्, जाग्रोऽविचिण्णल्ङित्सु इति जागर्तेर्गुणो वृद्धेरपवादो विधीयते । स यथा अचो ञ्णितीति वृद्धिं बाधते तथा सिचि वृद्धिमपि बाधिष्यते? नैतदस्ति, कृते गुणेऽतोल्रान्तस्येति या वृद्धिः प्राप्नोति सा प्रतिषिद्ध्यते । अथ गुणविधानसामर्थ्यादुत्तरकालभाविन्यपि वृद्धिर्बाध्यते । यथा जागरयतीत्यत्रात उपाधाया इत्यपि वृद्धिर्न भवति तथा चिण्णलोः प्रतिषेधोऽर्थवान् भवति इति श्क्यमिह जागृग्रहणमकर्त्तुम्? तत्तु क्रियते विस्पष्टार्थम् ॥

३२८५. ऊर्णोतेर्विभाषा ॥ ६ ॥

ऊर्णोतेरिडादौ सिचि परस्मैपदपरे परतो विभाषा वृद्धिर्न भवति । प्रौर्णावीत्, प्रौर्णवीत् । विभाषोर्णोरित्यङित्त्वपक्षे वृद्धिविकल्पोऽयम् । ङित्त्वपक्षे तु गुणवृद्ध्योरभावे उवङ् भवति - प्रौर्णुवीत् ॥

३२८६. अतो हलादेर्लघोः ॥ ७ ॥

हलादेरङ्गस्य लघोरकारस्य इडादौ सिचि परस्मैपदपरे परतो विभाषा वृद्धिर्न भवति । अकणीत् । अकाणीत्, अरणीत् , अराणीत् । अत इति किम्? अदेवीत्, असेवीत् । न्यकुटीत्,

न्यपुटीत् इत्यत्रात इत्यस्मिन्नसति स्थानिनिदर्देशार्थमच इत्येतदनुवर्त्तयितव्यम् । तत्र अज् लक्षणा वृद्धिरिग्लक्षणा न भवतीति "क्ङिति च'' इति प्रतिषेधो न स्यात् । हलादेरिति किम्? मा भवानशीत् । मा भवानटीत् । लघोरिति किम्? अतक्षीत् । अक्षरीत् । अथेह कस्मान्न भवति- अचकासीदिति? येन नाव्यवधनं तेन व्यवहितेऽपि वचनप्रामाण्यादिति हला व्यवधानमाश्रितं न पुनरचापि व्यवधानमिति वृद्धिर्न भवति । अथ पुनरेकेन वर्णेन व्यवधानमाश्रीयते, न पुनरनेकेनेति कल्पने शक्यमकर्तुं लघोरिति, अतक्षीदित्यत्रानेकेन व्यवधानमिति न भविष्यति? तत् क्रियते विस्पष्टार्थम् । इटीत्येव-अपाक्षीत् ॥

३२८७. नेड् वशि कृति ॥ ८ ॥

वशादौ कृति प्रत्यये परत इडागमो न भवति । वरमनादौ प्रयोजनम् । ईशिता, ईशितुम् - ईश्वरः । दीपिता, दीपितुम्-दीप्रः । भसिता, भसितुम्-भस्म। याचिता, याचितुम्-याच्ञा । वरमनादावित्युदाहरणप्रदर्शनार्थं न परिगणनम् । तेन "ञमन्ताड्डः'' इत्येवमादावपि हि प्रतिषेधो भवति । अथ तत्र "उणादयो बहुलम्'' इति समाधीयते? संभवोदाहरणप्रदर्शनमेतत् । कृतीति किम्? रुरुदिव, रुरुदिम ॥

३२८८. तितुत्रतथसिसुसरकसेषु च ॥ ९ ॥

ति, तु, त्र, त, थ, सि, सु, सर, क, स-इत्येतेषु कृत्सु इडागमो न भवति। तीति क्तिन् क्तिचोः सामान्यग्रहणम् । क्तिच्-तनिता, तनितुम्-तन्तिः । क्तिन्-दीपिता, दीपितुम् - दीप्तिः। तु - "सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन्''। सचिता, सचितुम् - सक्तुः । त्र - "दाम्नीशसयुयुजेति'' ष्ट्रन् । पतिता, पतितुम् - पत्त्रं वाहनम् । उणादिष्वपि सर्वधातुभ्यः ष्ट्रन्। तनिता, तनितुम् - तन्त्रम् । त - "हसिमृगृण्वमिदमितमिलूपूधुर्विभ्यस्तन्'' । हसिता, हसितुम् - हस्तः । लविता, लवितुम् - लोतः । पविता, पवितुम् - पोतः । धूर्विता, धूर्वितुम् - धूर्तः । औणादिकस्यैव तशब्दस्य ग्रहणमिष्यते न पुनः क्तस्य । हसितमित्येव हि तत्र भवति। थ - "हनिकुषिनीरमिकाशिभ्यः क्थन्'' । कोषिता, कोषितुम्-कुष्ठम् । काशिता, काशितुम्-काष्ठम् । सि "प्लुषिशुषिकुषिभ्यः किसः'' -कोषिता, कोषितुम्-कुक्षिः ॥ "सुक् च इषेः'' -एषिता, एषितुम्-इक्षुः । सर-"अशेः क्सरन्'' -अशिता, अशितुम्-अक्षरम् । क-"इण्भीकापाशल्यतिमर्चिभ्यः कन्' ' -शलिता, शलितुम्-शल्कः । स-"वृतृदिहनिक्रमिकयुमुचिभ्यः सः''॥ वदिता । वदितुम्-वत्सः ॥ तितुत्रतथेष्वग्रहादीनामिति वक्तव्यम् । ग्रहादयो ग्रहप्रकाराः,येषामिट् क्तिनि दृश्यते-निगृहीतिः, उपस्निहितिः, निकुचितिः, निपठितिः । कृतित्येव-रोदिति, स्वपिति ॥

३२८९. एकाच उपदेशेऽनुदात्तात् ॥ १० ॥

उपदेशे य एकाच् धातुरनुदात्तश्च तस्मादिडागमो न भवति । प्रकृत्याश्रयोऽयं प्रतिषेधः । के पुनरुपदेशेऽनुदात्ताः? ये तथा गणे पठ्यन्ते त एव विस्पष्टार्थमनिट्कारिकासु प्रविभक्ताः प्रदर्श्यन्ते-

अनिट्स्वरान्तो भवतीति दृश्यतामिमांस्तु सेटः प्रवदन्ति तद्विदः ।

अदन्तमृदन्तमृतां च वृङ्वृञौ श्विडीङिवर्णोष्वथ शीङ्श्रिञावपि ॥

गणस्थमूदन्तमुतां च रुस्नुवौ क्षुवन्तथोर्णोतिमथो युणुक्ष्णवः ॥

इति स्वरान्ता निपुणं समुच्चितास्ततो हलन्तानपि सन्निबोधत ॥

द्वय एव धातवः-स्वरान्ता व्यञ्जनान्ताश्च, तत्र सर्वे स्वरान्ता एकाचोऽनुदात्ता अदन्तादीन् वर्जयित्वा । दाता । नेता । चेता । स्तोता । कर्त्ता । हर्त्ता । अदन्तादय उदात्ताः - आवधिष्ट । ऋदन्तम्-तरिता, तरीता । ऋतां च वृङ्वृञौ-निर्वरिता, निर्वरीता । प्रवरिता, प्रवरीता । श्विडीङिवर्णोष्वथ शीङ्श्रिञावपि - श्वयिता । उड्डयिता । शयिता । श्रयिता । गणस्थमूदन्तम्-लविता । पविता । उतां च रुस्नुवौ क्षुवन्तथोर्णोतिमथो युणुक्ष्णवः - रविता । प्रस्नविता । क्षविता । प्रोर्णाविता । वाच्य ऊर्णोर्णुवद्भावो यङ्प्रसिद्धिः प्रयोजनमित्यतिदेशादेकाच् त्वमूर्णोतेरस्तीति उदात्त उपदिश्यते । यविता । नविता । क्ष्णविता ॥

इति स्वरान्ता निपुणं समुच्चिताः ततो हलन्तानपि सन्निबोधन । शकिस्तु कान्तेष्वनिडेक इष्यते घसिश्च सान्तेषु वसिः प्रसारणी ॥

घसिः प्रकृत्यन्तरमस्ति-घस्ता । वसिः प्रसारणी-वस्ता । प्रसारणीति किम्? वसिता वस्त्राणाम् । वस निवास इत्यस्य यजादित्वात् सम्प्रसारणं विहितं, न तु वस आच्छादन इत्यस्य ॥

रभिस्तु भान्तेष्वथ मैथुने यभिस्ततस्तृतीयो लभिरेव नेतरे ।

आरब्धा । यब्धा । लब्धा ॥

यमिर्यमन्तेष्वनिडेक इष्यते रमिश्च यश्च श्यनि पठ्यते मनिः ।

नमिश्चतुर्थो हनिरेव पञ्चमो गमिश्च षष्ठः प्रतिषेधवाचिनाम् ॥

यन्ता । रन्ता । मन्ता । श्यनीति किम्? मनुतेर्मनितेत्येव भवति । नन्ता । हन्ता। गन्ता ॥

दिहिर्दुहिर्मेहतिरोहती वहिर्नमिस्तु षष्ठो दहतिस्तथा लिहिः ।

इमेऽनिटोऽष्टाविह मुक्तसंशया गणेषु हान्ताः प्रविभज्य कीर्त्तिताः ॥

देग्धा । दोग्धा । मेढा । आरोढा । वोढा । नद्धा । दग्धा । लेढा । मुक्तसंशया इति किम्? तन्त्रान्तरे चत्वारोऽपरे पठ्यन्ते-सहिमुहिरिहिलुहयः । तत्र सहेर्विकल्प स्तकारादौ ।

मुहिरपि रधादौ पठ्यते । तेन तौ ससंशयौ सविकल्पौ । इतरौ तु धातुषु न पठ्येते । कैश्चिदभ्युपगम्येते इति स्वरूपेणैव ससंशयौ ।

दिशिं दृशिं दशिमथो मृशिं स्पृशिं रिशिं रुशिं क्रोशतिमष्टमं विशिम् ।

लिशं च शान्ताननिटः पुराणगाः पठन्ति पाठेषु दशैव नेतरान् ॥

देष्टा । द्रष्टा । दंष्टा । आम्रष्टा । आमर्ष्टा । स्प्रष्टा । स्पर्ष्टा । ऋदुपधानामुदात्तोपदेशानां मृजिदृशी वर्जयित्वा अनुदात्तस्य चर्दुपधस्यान्यतरस्यामिति रमागमविकल्पः । रेष्टा। रोष्टा । क्रोष्टा । प्रवेष्टा । लेष्टा ।

रुधिः सराधिर्युधिबन्धिसाधयः क्रुधिक्षुधी शुध्यतिबुध्यती व्यधिः ।

इमे तु धान्ता दश येऽनिटो मतास्ततः परं सिद्ध्यतिरेव नेतरे ॥

रोद्धा । राद्धा । योद्धा । बन्द्धा । साद्धा । क्रोद्धा । क्षोद्धा । शोद्धा । बोद्धा । व्यद्धा । सेद्धा । बुद्ध्यतिसिद्ध्यत्योः श्यना निर्देशादन्यविकरणयोबुधिसिद्ध्योरिड् भवत्येव । बोधिता । सेधिता । निष्ठायामपि प्रतिषेधाभावाद् बुधितं सिधितमित्येव भवति ॥

शिषिं पिषिं शुष्यतिपुष्यती त्विषिं विषिं श्लिषिं तुष्यतिदुष्यती द्विषिम् ।

इमान् दशैवोपदिशन्त्यनिड्विधौ गणेषु षान्तान् कृषिकर्षती तथा ॥

शेष्टा । पेष्टा । शोष्टा । पोष्टा । त्वेष्टा । वेष्टा । श्लेष्टा । तोष्टा । दोष्टा । द्वेष्टा। आक्रष्टा । आकर्ष्टा । कृषेस्तौदादिकस्य भौवादिकस्य च कृषिकर्षती इति निर्द्देशः ।

तपिं तिपिं चापिमथो वपिं स्वपिं लिपिं लुपिं तृप्यतिदृप्यती सृपिम् ।

स्वरेण नीचेन शपिं छुपिं क्षिपिं प्रतीहि पान्तान् पठितांस्त्रयोदश ॥

तप्ता । तेप्ता । आप्ता । वप्ता । स्वप्ता । लेप्ता । लोप्ता । तृप्यतिदृप्यत्योरनुदात्तत्वममागमार्थमेव । इट् च तयो रधादिपाठाद्विकल्पेन भवति । त्रप्ता । तर्प्ता । तर्पिता । द्रप्ता । दर्प्ता । दर्पिता । तुदादिषु तु यौ तृपिदृपी तावुदात्तावेव । त्रप्ता । तर्प्ता । शप्ता । छोप्ता । क्षेप्ता ॥

अदिं हदिं स्कन्दिमिदिच्छिदिक्षुदीन् शदिं सदिं स्विद्यतिपद्यती खिदिम् ।

तुदिं नुदिं विद्यति विन्त इत्यपि प्रतीहि दान्तान् दश पञ्च चानिटः ॥

अत्ता । हत्ता । स्कन्ता । भेत्ता । छेत्ता । क्षोत्ता । शत्ता । सत्ता । स्वेत्ता । स्विद्यतीति श्यना निर्द्देशो त्रिष्विदा इत्यस्य निवृत्त्यर्थः । उदात्त एवायम् । पत्ता । खेत्ता। तोत्ता । नोत्ता । वेत्ता । विद्यति विन्त इत्यपि श्यना श्नमा च निर्द्देशोऽन्यविकरणनिवृत्त्यर्थः । वेत्तिविन्दती उदात्तावेव । वेदिता विद्यानाम् । वेदिता धनस्य॥

पचिं वचिं विचिरिचिरञ्जिपृच्छतीन् निजिं सिचिं मुचिभजिभञ्जिभृज्जतीन्।

त्यजिं यजिं युजिरुजिसञ्जिमज्जतीन् भुजिं स्वजिं सृजिम्रजी विद्ध्य-निटस्वरान्॥

पक्ता । वक्ता । विवेक्ता । रेक्ता । रङ्क्ता । प्रष्टा । निर्णेक्ता । सेक्ता । मोक्ता । भक्ता । भङ्क्ता । भ्रष्टा । भर्ष्टा । त्यक्ता । यष्टा । योक्ता । रोक्ता । सङ्क्ता । मङ्क्ता भोक्ता । परिष्वक्ता। स्रष्टा । मार्ष्टा । मृजिरयमूदित् पठ्यते । ततोऽस्य् विकल्पेनेटा भवितव्यम्। मार्ष्टा, मार्जिता इति । अमागमोऽप्यस्य न दृश्यते तदस्य पाठस्य प्रयोजनं चिन्त्यम् । केचिदस्य स्थाने विजिं पठन्ति - सृजिं विजिं विद्ध्यनिट्स्वरानिति। निजादिषु यो विजिरसावनिडिष्यते । तथा च ग्रन्थान्तरे निजिविजिष्वञ्जि-वर्जमित्युक्तम्। एकाच इति किम्? अवधीत् । वृद्धिनिवृत्त्यर्थमदन्तो वधिरुपदिश्यते । उपदेशग्रहणं किम्? इह हि यथा स्यात्-लविष्यति, पचिष्यति । इह च मा भूत् - कर्ता कटान्, कर्तुमिति ॥

३२९०. श्र्युकः किति ॥ ११ ॥

श्रि इत्येतस्योगन्तानां च किति प्रत्यये परत इडागमो न भवति । श्रित्वा । श्रितः । श्रितवान् । उगन्तानां च - युत्वा । युतः । युतवान् । लूत्वा । लूनः । लूनवान् । वृत्वा । वृतः। वृतवान् । तीर्त्वा । तीर्णः । तीर्णवान् । श्र्युक इति किम्? विदितः । कितीति किम्? श्रयिता । श्रयितुम् । श्रयितव्यम् । केचिदत्र द्विककारनिर्देशेन गकारप्रश्लेषं वर्णयन्ति । भूष्णुरित्येवं यथा स्यात् । सौत्रत्वाच्च निर्देशस्य श्र्युकः कितीत्यत्र चर्त्वस्यासिद्धत्वमनाश्रित्य रोरुत्वं न कृतं, विसर्जनीयश्च कृत इति । ग्लाजिस्थश्च ग्स्नुरित्यत्र स्था आ इत्याकारप्रश्लेषेण स्थास्नोः सिद्धत्वान्न किञ्चिदेतत्। उपदेश इत्येव । तीर्ण इत्यत्रापि यथा स्यात् । इत्वे हि कृते रपरत्वे च न स्यात् । मा भूदेवम्, इट् सनि वेति विकल्पे विहिते यस्य विभाषेति निष्ठायां प्रतिषेधो भविष्यति कस्य पुनः सा विभाषा? ऋतः । यद्येवमित्वे कृते नायं ऋकारान्तो भविष्यति? स्थानिवद्भावाद्भविष्यति । अनल्विधौ स्थानिवद्भावः । अल्विधिश्चायम? तस्मादनुवर्त्तयितव्यमुपदेश इति । तथा च सति जागरितः, जागरितवानित्यत्रापि प्राप्नोति, तदर्थमेकाच इत्यनुवर्त्तयितव्यम् । ऊर्णोतेस्तु-

वाच्य ऊर्णोर्णुवद्भावो यङ्प्रसिद्धिः प्रयोजनम् ।
आमश्च प्रतिषेधार्थमेकाचश्चेडुपग्रहात् ॥

प्रोर्णुतः । प्रोर्णुतवान् ॥

३२९१. सनि ग्रहगुहोश्च ॥ १२ ॥

ग्रह, गुह इत्येतयोरुगन्तानां च सनि प्रत्यये परत इडागमो न भवति । जिघृक्षति । जुघुक्षति । उगन्तानां च-रुरूषति । लुलूषति । सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनामिति विकल्पविधानात् श्रयतिरत्र नानुकृष्यते। ग्रहेर्नित्यं प्राप्तः । गुहेरूदित्वाद्विकल्पः ॥

३२९२. कृसृभृवृस्तुद्रुस्रुश्रुबो लिटि ॥ १३ ॥

कृ, सृ, भृ, वृ, स्तु, द्रु, स्रु, श्रु इत्येतेषां लिटि प्रत्यय इडागमो न भवति । कृ-चकृव । चकृम । सृ - ससृव । ससृम । भृ-बभृव । बभृम । वृञ्-ववृव । ववृम । वृङ्-ववृवहे । ववृमहे। स्तु-तुष्टुव । तुष्टुम । द्रु-दुद्रुव । दुद्रुम । स्रु-सुस्रुव । सुस्रुम । श्रु-शुश्रुव । शुश्रुम । सिद्धे सत्यारम्भो नियमार्थः - क्रादय एव लिट्यनिटस्ततोऽन्ये सेट इति । बिभिदिव । बिभिदिम । लुलुविव । लुलुविम । अनुदात्तोपदेशानामत्र प्रकृत्याश्रयः प्रतिषेधः । वृञ्वृङोस्तु प्रत्ययाश्रयस्तदुभयस्याप्ययं नियमः । वृञो हि थलि ववर्थेति निपातनाद् व्यवस्था । स्तुद्रुस्रुश्रुवां तु ऋतो भारद्वाजस्येत्यस्मादपि नियमाद् य इट् प्राप्नोति सोऽपि नेष्यते । तुष्टोथ । द्रुद्रोथ । सुस्रोथ । शुश्रोथ । कृञोऽसुट इति वक्तव्यम् । ससुट्कस्य इडागमो यथा स्यात्-सञ्चस्करिव, सञ्चस्करिम । ऋतो भारद्वाजस्य इत्येतदप्यसुट एवेष्यते-सञ्चस्करिथ।

३२९३. श्वीदितो निष्ठायाम् ॥ १४ ॥

श्वयतेरीदितश्च निष्ठायामिडागमो न भवति । शूनः । शूनवान् । ईदितः - ओलजी-लग्नः, लग्नवान् । ओविजी-उद्विग्नः, उद्विग्नवान् । ओदितश्च इति निष्ठातकारस्य नकारः । दीपी-दीप्तः, दीप्तवान् । डीङस्त्वोदितां मध्ये पाठो ज्ञापको निष्ठायामनिट्त्वस्य । स हि नत्वार्थः - नत्वं च निष्ठातोऽनन्तरस्य विधीयते- उड्डीनः, उड्डीनवान् । निष्ठायामित्यधिकारः आर्द्धधातुकस्येड्वलादेरिति यावत् ॥

३२९४. यस्य विभाषा ॥ १५ ॥

यस्य धातोर्विभाषा क्वचिदिदुक्तस्तस्य निष्ठायाम् परत इडागमो न भवति । वक्ष्यति-स्वरतिसूतिसूयतिधूञूदितो वा-विधूतः, विधूतवान् । गुहू-गूढः, गूढवान्। उदितो वा-वृद्धः, वृद्धवान्। 'तनिपतिदरिद्राणामुपसंख्यानम्' इति पतेर्विभाषितेदकस्यापि द्वितीयाश्रितातीतपतित इति निपातनादिडागमः ॥

३२९५. आदितश्च ॥ १६ ॥

अदितश्च धातोर्निष्ठायामिडागमो न भवति । त्रिमिदा-मिन्नः । मिन्नवान् । त्रिक्ष्विण्णः। क्ष्विण्णवान् । त्रिष्विदा-स्विन्नः । स्विन्नवान् । चकारोऽनुक्तसमुच्चयार्थः । आश्वस्तः । वान्तः। योगविभागकरणं किमर्थम्? आदितश्च, विभाषा भावादिकर्म्मणोरित्येवं पठितव्यम् । अन्यत्र हि भावादिकर्म्मभ्यां यस्य विभाषेति प्रतिषेधो भविष्यति ? ज्ञापनार्थमेतत्। ज्ञापयति - यदुपाधेर्विभाषा तदुपाधेः प्रतिषेध इति, तेन विभाषा

गमहनविदविशामित्यत्र विदेर्लाभार्थस्य विभाषेति ज्ञानार्थस्य प्रतिषेधो न भवति - विदितः, विदितवान् ॥

३२९६. विभाषा भावादिकर्म्मणोः ॥ १७ ॥

भावे आदिकर्म्मणि च आदितो धातोर्विभाषा निष्ठायामिडागमो न भवति । मिन्नमनेन। मेदितमनेन । प्रमिन्नः । प्रमेदितः । सौनागाः कर्मणि निष्ठायां शकेरिटमिच्छन्ति विकल्पेन-शकितो घटः कर्त्तुम्, शक्तो घटः कर्तुम् । भावे न भवत्येव-शक्तमनेन । अस्यतेर्भावे-असितमनेन। आदिकर्मणि च न भवत्येव - अस्तः काण्डः ॥

३२९७.क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमःसक्ताविस्पष्ट-स्वरानायासभृशेषु ॥ १८ ॥

क्षुब्ध, स्वान्त, ध्वान्त, लग्न, म्लिष्ट, विरिब्ध, फाण्ट, बाढ इत्येते निपात्यन्ते यथासंख्यं मन्थ, मनः, तमः, सक्त, अविस्पष्ट, स्वर, अनायास, भृश इत्येतेष्वर्थेषु। क्षुब्ध इति भवति मन्थाभिधानं चेत् । क्षुब्धो मन्थः । क्षुभितमन्यत् । क्षुभितं मन्थेन । क्षुब्धो गिरिः, नदीत्येवमाद्युपमानाद्भविष्यति । स्वान्तमिति मनोऽभिधानं चेत् । स्वनितमन्यत्, स्वनितो मृदङ्गः । स्वनितं मनसा । ध्वान्तमिति भवति तमोऽभिधानं चेत् । ध्वनितमन्यत् । ध्वनितो मृदङ्गः । ध्वनितं मनसा । लग्नमति भवति सक्तं चेत् । लगितमन्यत् । म्लिष्टमिति भवति अविस्पष्टं चेत् । म्लेच्छितमन्यत्। इत्वमप्येकारस्य निपातनादेव । विरिब्धमिति स्वरश्चेत् । विरेभितमन्यत् । रेभृ शब्द इत्यस्यैतन्निपातनम् । अन्ये तु विरिभितमन्यदिति पठन्ति । रभिं सौत्रं धातुं पठन्ति। ते विरिभितमिति प्रत्युदाहरन्ति । फाण्टमिति भवत्यनायासश्चेत् । फाणितमन्यत् । यदशृतमपिष्टं च कषायमुदकसंपर्कमात्राद् विभक्तरसमीषदुष्णं तत्फाण्टम् । तदल्पप्रथत्नसाध्यत्वाद् अनायासेन लक्ष्यते । बाढमिति भवति भृशं चेत् । बाहितमन्यत्। बाहु प्रयत्न इत्यस्य धातोरेतन्निपातनम् । अतिशयश्च भृशमिहोच्यते ॥

३२९८. घृषिशसी वैयात्ये ॥ १९ ॥

वियातस्य भावो वैयात्यम् प्रागल्भ्यमविनीतता । तत्र धृष्, शस् इत्येतयोर्निष्ठायामिडागमो न भवति । धृष्टोऽयम् । विरास्तोऽयम् । धृषेरादितश्चेति प्रतिषेधः सिद्ध एव, शसेरप्युदितो वा, यस्य विभाषेति ? नियमार्थं वचनम् - धृषिशस्योर्वैयात्ये एवेड न भवति, भावादिकर्म्मणोरपि वैयात्ये धृषिर्नास्ति । धृष्टः। विशस्तः । वैयात्य इति किम्? धर्षितः, विशशितः ॥

३२९९. दृढः स्थूलबलयोः ॥ २० ॥

दृढ इति निपात्यते स्थूले बलवति चार्थे । दृढः स्थूलः । दृढो बलवान् । किमत्र निपात्यते? दृंहेः क्तप्रत्यये इडभावः, हकारनकारयोर्लोपः । परस्य ढत्वम्। अथ दृहिः प्रकृत्यन्तरमस्ति ? तत्राप्येतदेव सर्वं नलोपवर्जम्, नकारस्याभावात् । हलोपनिपातनं पूर्वत्रासिद्धत्वनिवृत्त्यर्थम् । ढलोपे हि सति तस्य पूर्वत्रासिद्धत्वाद् द्रढिमा, द्रढीयान्, द्रढीयतीत्यत्र र ऋतो हलादेर्लघोरितितेको न स्यात् । इह च परिद्रढय्य गत इति ल्यपि लघुपूर्वादिति णेरयादेशो न स्यात् । इह च परिदृढस्यापत्यं पारिदृढी कन्येति गुरूपोत्तमलक्षणः ष्यङ् च प्रसज्ज्येत । स्थूलबलयोरिति किम्? दृहितम्, दृहितम् ॥

३३००. प्रभौ परिवृढः ॥ २१ ॥

परिवृढ इति निपात्यते प्रभुश्चेद्भवति । परिवृढः कुटुम्वी । पूर्वेण तुल्यमेतत्। वृंहेर्निपातनम् । वृहिश्च यदि प्रकृत्यन्तरमस्ति तस्यापि तदेव सर्वं, हलोपनिपातनस्य च तदेव प्रयोजनम् । परिव्रढयति । परिव्रढय्य गतः । पारिवृढी कन्येति । परिवृढमाचष्टे इति विगृह्य वृढशब्दादेव णिजुत्पद्यते । संग्रामयतेरेव सोपसर्गाण्णिजुत्पत्तिरिष्यते, नान्यस्मादिति । तथा सति परिव्रढयतीति तिड्ङतिङ इति निघातः । परिव्रढय्येत्यत्र परिशब्दस्य क्त्वाप्रत्ययान्तेन समासे सति ल्यबादेशः सिद्धो भवति । प्रभाविति किम्? परिवृंहितम्, परिवृहितम् ॥

३३०१. कृच्छ्रगहनयोः कषः ॥ २२ ॥

कृच्छ्र, गहन इत्येतयोरर्थयोः कषेर्धातोर्निष्ठायामिडागमो न भवति । कष्टोग्निः । कष्टं व्याकरणम् । ततोऽपि कष्टतराणि सामानि । कृच्छ्रं=दुःखं तत्करणमप्यग्न्यादिकं कृच्छ्रमित्युच्यते । गहने-कष्टानि वनानि । कष्टाः पर्वताः । कृच्छ्रगहनयोरिति किम्? कषितं सुवर्णम् ॥

३३०२. घुषिरविशब्दने ॥ २३ ॥

घुषेर्द्धातोरविशब्दनेऽर्थे निष्ठायामिडागमो न भवति । धुष्टा रज्जुः । घुष्टौ पादौ। अविशब्दन इति किम्? अवघुषितं वाक्यमाह । विशब्दनं = प्रतिज्ञानम् । घुषिरशब्दार्थ इति भ्वादिषु पठ्यए । घुषिरविशब्दन इति चुरादिषु, तयोरिह सामान्येन ग्रहणम् । विशब्दनप्रतिषेधश्च ज्ञापकः - चुरादिणिज् विशब्दनार्थस्यानित्य इति । तेनायमपि प्रयोग उपपन्नो भवति - महीपालवचः श्रुत्वा जुघुषुः पुष्पमाणवा इति। स्वाभिप्रायं शब्देनाविष्कृतवन्त इत्यर्थः ॥

३३०३. अर्देः सन्निविभ्यः ॥ २४ ॥

सं, नि, वि इत्येतेभ्य उत्तरस्यार्देर्निष्ठायामिडागमो न भवति । समर्णः । न्यर्णः। व्यर्णः। अर्देरिति किम्? समेधितः । संनिविभ्य इति किम्? अर्दितः ॥

३३०४. अभेश्चाविदूर्ये ॥ २५ ॥

अभिशब्दादुत्तरस्यार्देराविदूर्येर्थे निष्ठायामिडागमो न भवति । अभ्यर्णा सेना। अभ्यर्णा शरत् । आविदूर्य इति किम्? अभ्यर्दितो वृषलः । शीतेन पीडित इत्यर्थः। विदूरं=विप्रकृष्टम्, ततोऽन्यदविदूरम्, तस्य भाव आविदूर्यम् । एतस्मादेव निपातनान्न नल्पूर्वात्तत्पुरुषादित्युत्तरस्य भावप्रत्ययस्य प्रतिषेधो न भवति ॥

३३०५. णेरध्ययने वृत्तम् ॥ २६ ॥

ण्यन्तस्य वृत्तेर्निष्ठायामध्ययनार्थे वृत्तमितीडभावो णिलुक्च निपात्यते । वृत्तो गुणो देवदत्तेन । वृत्तं पारायणं देवदत्तेन । अध्ययन इति किम्? वर्त्तितमन्यत् । वृतिरयमकर्म्मकः, स ण्यर्थे वर्त्तमानः सकर्म्मको भवति । तेन निर्वृत्तम् इति हि प्रकृतेरेव कर्म्मणि क्तप्रत्ययो दृश्यते । तद्वदिहापि ण्यर्थवृत्तेरेव च वृतेर्वृत्तो गुणो देवदत्तेनेति भविष्यतीति निपातनमनर्थकम्? तत्क्रियते यदापि णिश्चैव ण्यर्थोऽभिधीयते तदा वर्त्तितमित्यध्ययने मा भूदिति केचित् । अपरे तु वर्त्तितो गुणो देवदत्तेनेत्यपीच्छन्ति॥

३३०६. वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः ॥ २७ ॥

णेरित्यनुवर्त्तते । दम्, शम्, स्पूरी, दस्, स्पश्, छद्, ज्ञप्, इत्येतेषां ण्यन्तानां धातूनां वा अनिट्त्वं निपात्यते । दान्तः । दमितः । शान्तः, शमितः । पूर्णः, पूरितः। दस्तः दासितः। स्पष्टः स्पाशितः । छन्नः, छादितः । ज्ञप्तः, ज्ञपितः । इट्प्रतिषेधो णिलुक्च निपात्यते । ज्ञपेस्तु भरज्ञपिसनामिति विकल्पतविधानाद् यस्य विभाषेति नित्ये प्रतिषेधे प्राप्ते विकल्पार्थं निपातनम्॥

३३०७. रुष्यमत्वरसंघुषास्वनाम् ॥ २८ ॥

वेति वर्त्तते । रुषि, अम, त्वर, संघुष, आस्वन इत्येतेषां निष्ठायां वा इडागमो न भवति। रुष्टः, रुषितः । तीषसहलुभरुषरिषः इति विकल्पविधानाद्, यस्य विभाषा इति प्रतिषेधे प्राप्ते विकल्पार्थं वचनम् । अम्-अभ्यान्तः, अभ्यमितः । त्वर-तूर्णः, त्वरितः । आदितश्च इति

प्रतिषेधे प्राप्ते वचनम् । संघुष-संघुष्टौ पादौ, संघुषितौ पादौ । संघुष्टं वाक्यमाह, संघुषितम् वाक्यमाह । संघुष्टौ दम्यौ, संघुषितौ दम्यौ । संपूर्वस्य धुषेरविशब्दनेऽपि परत्वादयमेव विकल्पो भवति । आस्वन् - आस्वान्तो देवदत्तः, आस्वनितो देवदत्तः । आस्वान्तं मनः, आस्वनितं मनः। आङ्पूर्वम्य स्वनेर्मनोऽभिधानेऽपि परत्वादयं विकल्पः क्षुब्धस्वान्त इति निपातनं बाधते॥

३३०८. हृषेर्लोमसु ॥ २९ ॥

लोमसु वर्त्तमानस्य हृषेर्निष्ठायाम् वा इडागमो न भवति । हृष्टानि लोमानि । हृषितानि लोमानि । हृष्टं लोमभिः, हृषितं लोमभिः । हृष्टाः केशाः, हृषिताः केशाः। हृष्टं केशैः। हृषितं केशैः, हृषु अलीक इत्युदित्त्वान्निष्ठायामनिट् । हृष तुष्टावित्ययं सेट् । तयोरुभयोरिह ग्रहणमित्युभयत्र विभाषेयम् । लोमानि मूर्द्धजानि अङ्गजानि च सामान्येन गृह्यन्ते । यथा लोमनखं स्पृष्ट्वा शौचं कर्त्तव्यमिति । तद्विषये च हर्षे वर्त्तमानो लोमसु वर्त्तत इत्युच्यते । लोमस्विति किम्? हृष्टो देवदत्त इत्यलीकार्थस्य, हृषितो देवदत्त इति तुष्ट्यर्थस्य । विस्मितप्रतिघातयोश्चेति वक्तव्यम् । हृष्टो देवदत्तः। हृषितो देवदत्तः, विस्मित इत्यर्थः । हृष्टा दन्ताः, हृषिता दन्ताः । प्रतिहता इत्यर्थः॥

३३०९. अपचितश्च ॥ ३० ॥

अपचित इति वा निपात्यते । अपपूर्वस्य चायतेर्निष्ठायामनिट्त्वं चिभावश्च निपात्यते । अपचितोऽनेन गुरुः । अपचायितोऽनेन गुरुः । क्तिनि नित्यमिति वक्तव्यम्। नित्यं चिभावो निपात्यते - अपचितिः ॥

३३१०. ह्रु ह्वरेश्छन्दसि ॥ ३१ ॥

ह्वरतेर्द्धातोर्निष्ठायां छन्दसि ह्रु इत्ययमादेशो भवति । ह्रुतस्य चाह्रुतस्य च। अह्रुतमसि हविर्द्धानम् । छन्दसीति किम्? ह्वृतम् ॥

३३११. अपरिह्वृताश्च ॥ ३२ ॥

अपरिह्वृता इति निपात्यते छन्दसि विषये । ह्रु इत्येतस्यादेशस्याभावो निपात्यते। अपरिह्वृताः सनुयाम वाजम् ॥

३३१२. सोमे ह्वरितः ॥ ३३ ॥

ह्वरित इति ह्वरतेर्निष्ठायामिडागमो गुणश्च निपात्यते छन्दसि विषये, सोमश्चेद्भवति। मा नः सोमो ह्वरितः, विह्वरितस्त्वम् ॥

३३१३. ग्रसितस्कभितस्तभितोत्तभितचत्तविकस्ता विशस्तृशंस्तृशास्तृतरुतृतरूतृवरुतृ-वरूतृवरूत्रीरुज्ज्वलितिक्षरिति-क्षमितिवमित्यमितीति च ॥ ३४ ॥

ग्रसित, स्कभित, स्तभित, उत्तभित, चत्त, विकस्त, विशस्तृ, शंस्तृ, शास्तृ, तरुतृ, तरूतृ, वरुतृ, वरूतृ, वरूत्रीः, उज्ज्वलिति, क्षरिति, क्षमिति, वमिति, अमिति इत्येतानि छन्दसि निपात्यन्ते । तत्र ग्रसितस्कभितस्तभितोत्तभितेति ग्रसु स्कम्भु स्तम्भु इत्येतेषामुदित्वान्निष्ठायामिट्प्रतिषेधे प्राप्ते इडागमो निपात्यते । ग्रसितं वा एतत्सोमस्य । ग्रस्तमिति भाषायाम् । स्कभित-विष्कभिते अजरे । विष्कब्ध इति भाषायाम् । स्तभित-येन स्वः स्तभितम् । स्तब्धमिति भाषायाम् । उत्तभित-सत्येनोत्तभिता भूमिः । उत्तब्धेति भाषायाम्। उत्तभितेति उत्पूर्वस्य निपातनसामर्थ्यादन्योपसर्गपूर्वः स्तभितशब्दो न भवति । चत विकस्तेति चतेः- कसेश्च विपूर्वस्य निष्ठायामिडभावो निपात्पते-चत्ता वर्षेण विद्युत् । चतितेति भाषायाम्। विकस्त-उत्तानाया हृदयं यद् विकस्तम् । विकसितमिति भाषायाम् । निपातनबहुत्वापेक्षे विकस्ता इति बहुवचनं कृतम् । अपरेषु तु निपातनेषु प्रत्येकं विभक्तिनिर्देशः । विशस्तृ शंस्तृ शास्त्रिति शसेर्विपूर्वस्य, शंसेः, शासेश्च तृचि इडभावो निपात्यते। विशस्तृ - एकस्त्वष्टुरश्वस्याविशस्ता । विशसितेति भाषायाम् । शंस्तृ-उत शंस्ता सुविप्रः । शंसितेति भाषायाम् । शास्तृ-प्रशास्ता । प्रशासितेति भाषायाम् । तरुतृतरूतृवरुतृवरूतृवरूत्रीरिति तरतेर्वृङ्वृञोश्च तृचि उट् ऊट् इत्येतावागमौ निपात्येते। तरूतारं रथानाम् । तरूतारम् । तरितारं तरीतारमिति भाषायाम् । वरुतारं रथानाम् । वरूतारं रथानाम्। वरितारं, वरीतारमिति भाषायाम् । वरूत्रीष्ट्वा देवीविश्वदेव्यावती। जसि पूर्वसवर्णोच्चारणं प्रयोगदर्शनार्थम् । अतन्त्रं चैतत्, इदमपि हि भवति- अहोरात्राणि वै वरूत्रय इति । छान्दसिकमत्र ह्रस्वत्वम् । प्रपञ्चार्थमेव च ङीबन्तस्य निपातनम् । वरूतृशब्दो हि निपातितस्तत एव ङीपि सति सिद्धो वरूत्रीशब्दः । उज्ज्वलिति क्षरिति क्षमिति वमित्यमितीति च ज्वलतेरुत्पूर्वस्य क्षर क्षम वम अम इत्येतेषां च तिपि शप इकारादेशो निपात्यते, शपो लुग्वा इडागमः, अग्निरुज्ज्वलिति। उज्ज्वलतीति भाषायाम् । क्षरिति- स्तोकं क्षरिति । क्षरतीति भाषायाम् । क्षमिति-स्तोमं क्षमिति । क्षमतीति भाषायाम् । वमिति - यः सोमं वमिति । वमतीति भाषायाम् । अमिति - अभ्यमिति वरुणः । अभ्यमतीति भाषायाम् । इतिकरणः प्रदर्शनार्थस्तेन क्वचिदीकारो भवति-रविमभ्यमीति वरुण इत्यपि हि वेदे पठ्यते ॥

३३१४. आर्धातुकस्येड् वलादेः ॥ ३५ ॥

छन्दसीति निवृत्तम् । आर्द्धधातुकस्य वलादेरिडागमो भवति । लविता । लवितुम् । लविव्यम् । पविता । पवितुम् । पवितव्यम् । आर्द्धधातुकस्येति किम्? आस्ते । शेते । वस्ते । रुदादिभ्यः सार्वधातुक इत्येतस्मिन्नियमार्थे विज्ञायमाने प्रतिपत्तिगौरवं भवतीति आर्धधातुकग्रहणं क्रियते । वलादेरिति किम्? लव्यम् । पव्यम् । लवनीयम् । पवनीयम् । इडिति वर्त्तमाने पुनरिड्ग्रहणम् प्रतिषेधनिवृत्त्यर्थम्॥

३३१५. स्नुक्रमोरनात्मनेपदनिमित्ते ॥ ३६ ॥

नियमार्थमिदम् । स्नुक्रमोरार्द्धधातुकस्य वलादेरिडागमो भवति, न चेत्स्नुक्रमौ आत्मनेपदस्य निमित्तं भवतः । क्व च तावात्मनेपदस्य निमित्तम्? यत्रात्मनेपदं तदाश्रयं भवति-भावकर्मकर्मव्यनिहाराः । क्रमेर्वृत्त्यादयश्च । तेनायं कर्तृकर्म सत्यात्मनेपदे प्रतिषेधो भवति, नासतीति । प्रतिषेधफलं चेदं सूत्रम् । स्नुक्रमोरुदित्वादिट् सिद्ध एव - प्रस्नविता । प्रस्नवितुम् । प्रस्नवितव्यम् । प्रक्रमिता । प्रकमितुम् । प्रकमितव्यम् । अनात्मनेपदनिमित्ते इति किम्? प्रस्नोषीष्ट । प्रक्रंसीष्ट । प्रस्नोष्यते। प्रक्रंस्यते । प्रसुस्नूषिष्यते । प्रचिक्रंसिष्यते । सर्वत्रैवात्र स्नौतिः क्रमिश्चात्मनेपदस्य निमित्तम् । सन्नन्तादपि हि पूर्ववत्सन इत्यात्मनेपदं विधीयते । निमित्तग्रहणम् किम्? सीयुडादेस्तत्परपरस्य च प्रतिषेधार्थम् । इह तु प्रस्नवितेवाचरतीति प्रस्नवित्रीयत इति क्यङन्तमात्मनेपदस्य निमित्तम्, न स्नौतिः । क्रमेस्तु कर्त्तर्यात्मनेपद-विषयादसत्यात्मनेपदे कृति प्रतिषेधो वक्तव्यः । प्रक्रन्ता । उपक्रन्ता । कर्तरीति किम्? प्रकमितव्यम् । उपक्रमितव्यम् । आत्मनेपदविषयादिति किम्? निष्क्रमिता । स्नौतेः सनि किति च प्रत्यये सनि ग्रहगुहोश्च श्र्युकः किति इत्येव प्रतिषेधो भवति-प्रसुस्नूषति। प्रस्नुतः । प्रस्नुतवान् ॥

३३१६. ग्रहोऽलिटि दीर्घः ॥ ३७ ॥

ग्रह उत्तरस्य इटः अलिटि दीर्घो भवति । ग्रहीता । ग्रहीतुम् । ग्रहीतव्यम् । अलिटीति किम्? जगृहिव । जगृहिम । प्रकृतस्येटो दीर्घत्वमिदं चिण्वदिटो न भवति-ग्राहिता । ग्राहिष्यते॥

३३१७. वृतो वा ॥ ३८ ॥

वृ इति वृङ्वृञोः सामान्येन ग्रहणम् । तस्मादुत्तरस्य ऋकारान्तेभ्यश्चेटो वा दीर्घो भवति। वरिता । वरीता । प्रावरिता । प्रावरीता । ऋकारान्तेभ्यः - तरिता । तरीता ।

आस्तरिता । आस्तरीता । वृत इति किम्? करिष्यति । हरिष्यति । अलिटीत्येव- ववरिथ । तेरिथ ॥

३३१८. न लिङि ॥ ३९ ॥

वृत उत्तरस्य इटो लिङि दीर्घो न भवति । विवरिषीष्ट । प्रावरिषीष्ट । आस्तरिषीष्ट। विस्तरिषीष्ट ॥

३३१९. सिचि च परस्मैपदेषु ॥ ४० ॥

परस्मैपदपरे सिचि वृत उत्तरस्य इटो दीर्घो न भवति । प्रावारिष्टाम् । प्रावारिषुः । अतारिष्टाम् । अतारिषुः । आस्तारिष्टाम् । आस्तारिषुः । परस्मैपदेष्विति किम्? प्रावरिष्ट । प्रावरीष्ट ॥

३३२०. इट् सनि वा ॥ ४१ ॥

वृतः सनो वा इडागमो भवति । वुवूर्षति । विवरषिते, विवरीषते । प्रावुवूर्षति, प्रविवरिषति, प्राविवरीषति । ऋकारान्तेभ्यः - तितीर्षति । तितरिषति। तितरीषति। आतिस्तीर्षति । आतिस्तरिषति । आतिस्तरीषति । सनि ग्रहगुहोश्चेति प्रतिषेधे प्राप्ते पक्षे इडागमो विधीयते । इटश्च वृतो वेति पक्षे दीर्घः । चिकीर्षति, जिहीर्षति इत्यत्रोपदेशाधिकाराल्लाक्षणिकत्वाच्च इडागमो न भवति ॥

३३२१. लिङ्सिचोरात्मनेपदेषु ॥ ४२ ॥

वृतो लिङि सिचि च आत्मनेपदे परे वा इडागमो भवति । वृषीष्ट । वरिषीष्ट। प्रावृषीष्ट। प्रावरिषीष्ट । आस्तरिषीष्ट । आस्तीर्षीष्ट । सिचि खल्वपि - अवृत । अवरिष्ट । अवरीष्ट । प्रावृत। प्रावरिष्ट । प्रावरीष्ट । आस्तीर्ष्ट । आस्तरिष्ट । आस्तरीष्ट। आत्मनेपदेष्विति किम्? प्रावारिष्टाम् । प्रावारिषुः । लिङः प्रत्युदाहरणं न दर्शितमसम्भवाद् यासुटोऽवलादित्वादिति ॥

३३२२. ऋतश्च संयोगादेः ॥ ४३ ॥

ऋदन्ताद्धातोः संयोगादेरुत्तरयोर्लिङ्सिचोरात्मनेपदेषु वा इडागमो भवति । ध्वृषीष्ट । ध्वरिषीष्ट । स्मृषीष्ट । स्मरिषीष्ट । अध्वृषाताम् । अध्वरिषाताम् । अस्मृषाताम्। अस्मरिषाताम् । ऋत इति किम्? च्योषीष्ट । प्लोषीष्ट । अच्योष्ट । अप्लोष्ट । संयोगादेरिति

किम्? कृषीष्ट । हृषीष्ट । अकृत । अहृत । आत्मनेपदेष्वित्येव । अध्वार्षीत् । अस्मार्षीत् । संस्कृषीष्ट, समस्कृतेत्यत्रोपदेशाधिकारादभाक्तत्वाच्च सुट इडागमो न भवति ॥

३३२३. स्वरतिसूतिसूयतिधूञूदितो वा ॥ ४४ ॥

स्वरति, सूति, सूयति, धूञ् इत्येतेभ्य ऊदिद्भ्यश्चोत्तरस्य वलादेरार्द्धधातुकस्य वा इडागमो भवति । स्वर्त्ता । स्वरिता । सूति-प्रसोता । प्रसविता । सूयति - सोता । सविता । धूञ्-धोता। धविता । ऊदिद्भ्यः खल्वपि - गाहू-विगाढा । विगाहिता । गुपू-गोप्ता । गोपिता । वेति वर्त्तमाने पुनर्वाग्रहणं लिङ्सिचोर्निवृत्त्यर्थम्। सूतिसूयत्योर्विकरणनिर्देशः षू प्रेरणै इत्यस्य निवृत्त्यर्थः । धूञिति सानुबन्धकस्य निर्द्देशो धू विधूनन इत्यस्य निवृत्त्यर्थः । सविता धवितेत्यत्र नित्यमेतयोर्भवति । स्वरतेरेतस्माद्विकल्पाद् ऋद्धनोः स्य इत्येतद्भवति विप्रतिषेधेन-स्वरिष्यति । किति तु प्रत्यये, श्र्युकः कितीति नित्यः प्रतिषेधो भवति पूर्वविप्रतिषेधेन । स्वृत्वा । सूत्वा । धूत्वा ॥

३३२४. रधादिभ्यश्च ॥ ४५ ॥

रध हिंसासंसिद्ध्योरित्येवमादिभ्योऽष्टाभ्य उत्तरस्य वलादेरार्द्धधातुकस्य वा इडागमो भवति । रद्धा । रधिता । नंष्टा । नशिता । त्रप्ता । तर्प्ता । तर्पिता । द्रप्ता। दर्प्ता । दर्पिता। द्रोग्धा । द्रोढा । द्रोहिता । मोग्धा । मोढा । मोहिता । स्नोग्धा । स्नोढा । स्नोहिता। स्नेग्धा । स्नेढा । स्नेहिता । क्रादिनियमाल्लिटि रधादिभ्यः परत्वाद्विकल्पं केचिदिच्छन्ति । अपरे पुनराहुः - पूर्वविधेरिण्निषेधविधान-सामर्थ्याद्बलीयस्त्वं प्रतिषेधनियमस्येति नित्यमिटा भवितव्यम्-ररन्धिव, ररन्धिमेति भवति ॥

३३२५. निरः कुषः ॥ ४६ ॥

नित् इत्येवम्पूर्वात् कुष उत्तरस्य वलादेरार्द्धधातुकस्य वा इडागमो भवति । निष्कोष्टा । निष्कोषिता । निष्कोष्टुम् । निष्कोषितुम् । निष्कोष्टव्यम् । निष्कोषितव्यम्। निर इति किम्? कोषिता । कोषितुम् । निस इति वक्तव्ये निर इति निर्देशेन रेफान्तमुपसर्गान्तरमस्तीति ज्ञाप्यते । तस्य हि निलयनमित्युपसर्गस्यायताविति लत्वं भवति । निसो हि रुत्वस्यासिद्धत्वाल्लत्वं न स्यात् ॥

३३२६. इण्निष्ठायाम् ॥ ४७ ॥

निरः कुषो निष्ठायामिडागमो भवति । निष्कुषितः । निष्कुषितवान् । इड्ग्रहणं नित्यार्थम् । आरम्भो हि यस्य विभाषा इत्यस्य बाधकोऽन्यथा हि विकल्पार्थ एव स्याद् । अत्रैव नित्यमिडागम उत्तरत्र विकल्प एवेति ॥

३३२७. तीषसहलुभरुषरिषः ॥ ४८ ॥

तकारादावार्द्धधातुके इषु, सह, लुभ, रुष, रिष इत्येतेभ्यो वा इडागमो भवति । इषु एष्टा। एषिता-इषु इच्छायामित्यस्यायं विकल्प इष्यते । यस्तु इष गताविति दैवादिकस्तस्य, प्रेषितुं, प्रेषिता प्रेषितव्यमिति नित्यं भवति । योऽपि इष आभीक्ष्ण्य इति क्रचादौ पठ्यते तस्याप्येवमेव। तदर्थमेव तीषसहेति सूत्रे केचिदुदितमिषं पठन्ति । सह-सोढा । सहिता । लुभ-लोब्धा । लोभिता । रुष - रोष्टा । रोषिता। रिष-रेष्टा । रेषिता । तीति किम्? एषिष्यति ॥

३३२८. सनीवन्तर्द्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम् ॥ ४९ ॥

इवन्तानां धातूनां ऋधु, भ्रस्ज, दम्भु, श्रि, स्वृ, यू, ऊर्णु, भर, ज्ञपि, सन् इत्येतेषां च सनि वा इडागमो भवति । इवन्तानाम् - दिदेविषति । दुद्यूषति । सिसेविषति । सुस्यूषति । ऋध्-अर्द्धिधिषति । ईत्सति । भ्रस्ज-बिभ्रज्जिषति । विभ्रक्षति । बिभर्ज्जिषति । बिभर्क्षति । दम्भु-दिदम्भिषति । धिप्सति । धीप्सति श्रि-उच्छिश्रयिषति । उच्छिश्रीषति । स्वृ-सिस्वरिषति। सुस्वूर्षति । यु-यियविषति। युयूषति । ऊर्ण-प्रोर्णुनविषति । प्रोर्णुनुविषति । प्रोर्णुनूषति । भर इति भृञित्येतस्य भौवादिकस्य ग्रहणं, शपा निर्देशात् । बिभरिषति । बुभूर्षति। ज्ञपि - जिज्ञपयिषति। ज्ञीप्सति । सन्-सिसनिषति । सिषासति । केचिदत्र भरज्ञपिसनितनिपतिदरिद्राणामिति पठन्ति । तितनिषति । तितंसति । तितांसति । पिपतिषति। पित्सति । दिदरिद्रिषति। दिदरिद्रासति । सनीति किम्? देविता । भ्रष्टा ॥

३३२९. क्लिशः क्त्वानिष्ठयोः ॥ ५० ॥

क्लिशः क्त्वानिष्ठयोर्वा इडागमो भवति । क्लिष्ट्वा । क्लिशित्वा । क्लिष्टः। क्लिष्टवान्। क्लिशितः । क्लिशितवान् । क्लिशू विबाधन इत्यस्य क्त्वायां विकल्पः सिद्ध इव, निष्ठायां तु यस्य विभाषेति प्रतिषेधः प्राप्नोति । क्लिश उपताप इत्येतस्य तु क्त्वायां निष्ठायां च नित्यमिडागमः प्राप्नोति । तदर्थ क्त्वाग्रहणं क्रियते ।

३३३०. पूङश्च ॥ ५१ ॥

पूङश्च क्त्वानिष्ठयोर्वा इडागमो भवति । पूत्वा । पवित्वा । सोमोऽतिपूतः । सोमोऽतिपवितः । पूतवान् । पवितवान् । श्र्युकः कितीति प्रतिषेधे प्राप्ते विकल्पो विधीयते ॥

३३३१. वसतिक्षुधोरिट् ॥ ५२ ॥

वसतेः क्षुधेश्च क्त्वानिष्ठयोरिडागमो भवति । उषित्वा । उषितः । उषितवान् । क्षुधित्वा। क्षुधितः । क्षुधितवान् । वसतीति विकरणो निर्देशार्थ एव । वस्तेस्तूदात्तत्वादेव भवितढव्यमिटा। पुनरिड्ग्रहणं नित्यार्थम् ।

३३३२. अञ्चेः पूजायाम् ॥ ५३ ॥

अञ्चेः पूजायामर्थे क्त्वनिष्ठयोरिडागमो भवति । अञ्चित्वा जानु जुहोति। अञ्चिता अस्य गुरवः । उदितो वेति क्त्वाप्रत्यये विकल्पः प्राप्तः, निष्ठायां यस्य विभाषेति प्रतिषेधः प्राप्तस्तदर्थमिदं प्रारब्धम् । पूजायामिति किम्? उदक्तमुदकं कूपात् । उद्धृतमित्यर्थः ।

३३३३. लुभो विमोहने ॥ ५४ ॥

लुभो विमोहनेऽर्थे वर्त्तमानात् क्त्वानिष्ठयोरिडागमो भवति । लुभित्वा । लोभित्वा । विलुभिताः केशाः । विलुभितः सीमन्तः । विलुभितानि पदानि । विमिहनमाकुलीकरणम् । तत्र क्त्वायां तीषसहलुभेति विकल्पो निष्ठायां यस्य विभाषेति प्रतिषेधः प्राप्तः । विमोहन इति किम्? लुब्धो वृषलः । शीतेन पीडित इत्यर्थः । लुब्ध्वा । लुभित्वा । लोभित्वा । गार्ध्ये यथाप्राप्तमेव भवति ।

३३३४. जृव्रश्च्योः क्त्वि ॥ ५५ ॥

जृ व्रश्चि इत्येतयोः क्त्वाप्रत्यये इडागमो भवति । जरित्वा । जरीत्वा । व्रश्चित्वा । जृ इत्येतस्य श्रुयुकः कितीति प्रतिषेधः प्राप्तो व्रश्चेरूदित्वाद्विकल्पः । क्त्वाग्रहणं निष्ठानिवृत्त्यर्थम् ॥

३३३५. उदितो वा । ५६ ॥

उदितो धातोः क्त्वाप्रत्यये परतो वा इडागमो भवति । शमु-शमित्वा । शान्त्वा । तमु-तान्त्वा । तमित्वा । दमु-दान्त्वा । दमित्वा ॥

३३३६. सेऽसिचि कृतचृतच्छृदतृदनृतः ॥ ५७ ॥

सकारादावसिच्यार्द्धधातुके कृत चृत छृद तृद नृत इत्येतेभ्यो धातुभ्यो वा इडागमो भवति। कृत-कर्त्स्यति । अकर्त्स्यत् । चिकृत्सति । कर्तिष्यति । अकर्तिष्यत् । चिकर्त्तिषति । चृत-चर्त्स्यति । अचर्त्स्यत् । चिचृत्सति । चर्त्तिष्यति। अचर्त्तिष्यत् । चिचर्त्तिषति । छृद-छर्त्स्यति । अच्छर्त्स्यत् । चिच्छृत्सति । छर्दिष्यति। अच्छर्दिष्यत् । चिच्छर्दिषति । तृद्-तर्त्स्यति । अतर्त्स्यत् । तितृत्सति । तर्द्दिष्यति । अतर्दिष्यत् । तितर्दिषति । नृत्-नर्त्स्यति । अनर्त्स्यत् । निनृत्सति । नर्त्तिष्यति । अनर्त्तिष्यत् । निनर्त्तिषति । स इति किम्? कर्त्तिता। असिचीति किम्? अकर्तीत् ॥

३३३७. गमेरिट् परस्मैपदेषु ॥ ५८ ॥

गमेर्द्धातोः सकारादेरार्द्धधातुकस्य परस्मैपदेष्विडागमो भवति । गमिष्यति । अगमिष्यत्। जिगमिषति । गमेरिति किम्? चिष्यति । इड्ग्रहणं नित्यार्थम् । परस्मैपदेष्विति किम्? संगंसीष्ट । संगंस्यते । संजिगंसते । संजिगंसिष्यते। अधिजिगांसते । अधिजिगांसिष्यते । गमेरिडादेशस्याज्झनगमां सनीति दीर्घत्वम्। स इत्येव - गन्तास्मि । गन्तास्वः । गन्तास्मः। आत्मनेपदेन समानपदस्थस्य गमेरयमिडागमो नेष्यते । अन्यत्र सर्वत्रैवेष्यते । कृत्यपि भवति, परस्मैपदलुकि च - संजिगमिषिता, अधिजिगमिषिता व्याकरणस्य । जिगमिष त्वमिति । पदशेषकारस्य पुनरिदं दर्शनम्-गम्युपलक्षणार्थं परस्मैपदग्रहणम् । परस्मैपदेषु यो गमिरुपलक्षितस्तस्मात्सकारादेरार्द्धधातुकस्येड् भवति । तन्मतेन संजिगंसिता, अधिजिगंसिता व्याकरणस्य इत्येव भवितव्यम् ।

३३३८. न वृद्भ्यश्चतुर्भ्यः ॥ ५९ ॥

वृतादिभ्यश्चतुर्भ्य उत्तरस्य सकारादेरार्द्धधातुकस्य परस्मैपदेषु इडागमो न भवति । वृत्-वर्त्स्यति । अवर्त्स्यत् । विवृत्सति । वृधु-वर्त्स्यति । अवर्त्स्यत् । विवृत्सति । शृधु-शर्त्स्यति। अशर्त्स्यत् । शिशृत्सति । स्यन्दू-स्यन्त्स्यति । अस्यन्त्स्यत् । सिस्यन्त्सति । चतुर्भ्य इति न वक्तव्यम् । वृद्ग्रहणं हि तत्र द्युतादिपरिसमाप्त्यर्थं क्रियते-कृपू सामर्थ्ये वृदिति, तदेव यदि वृतादिसमाप्त्यर्थमपि विज्ञायते न किंचिदनिष्टं प्राप्नोति? तत्क्रियते, स्यन्देरूदिल्लक्षणमन्तरङ्गमपि विकल्पं प्रतिषेधो यथा बाधेतेति । चतुर्ग्रहणे हि सति तात्पर्येण स्यन्दिः सन्निधापितो भवति। परस्मैपदेष्वित्येव । वर्त्तिष्यते । वर्त्तिषीष्ट । अवर्त्तिष्यत । विवर्त्तिषते । अथात्रात्मनेपदेन समानपदस्थेभ्यो वृतादिभ्य इडागम इष्यते । अन्यत्र सर्वत्र प्रतिषेधः । कृत्यपि हि परस्मैपदलिकि च प्रतिषेधो भवति - विवृत्सिता । विवृत्स त्वमिति ॥

३३३९. तासि च क्लृपः ॥ ६० ॥

क्लृप उत्तरस्य तासेः सकारादेश्चार्द्धधातुकस्य परस्मैपदेषु इडागमो न भवति। श्वः कल्प्ता। कल्प्स्यति । अकल्प्स्यत् । चिक्लृप्सति । परस्मैपदेष्वित्येव । कल्पितासे । कल्पिष्यते । कल्पिषीष्ट । अकल्पिष्यत । चिकल्पिषते । क्लृपेरप्यात्मनेपदेन समानपदस्थस्य इडागम इष्यते । अन्यत्र प्रतिषेधः । कृत्यपि हि परस्मैपदलुकि च प्रतिषेधो भवति । चिक्लृप्सिता, चिच्लृप्स त्वमिति ॥

३३४०. अचस्तास्वत्थल्यनटो नित्यम् ॥ ६१ ॥

तासौ ये नित्यानिटो धातवोऽजन्तास्तेभ्यस्तासाविव थलीढागमो न भवति । याता-ययाथ । चेता-चिचेथ । नेता-निनेथ । होता-जुहोथ । अच इति किम्? भेत्ता-बिभेदिथ । तास्वदिति किम्? लूत्वा-लुलविथ । थलीति किम्? याता । ययिव । ययिम । अनिड्ग्रहणं नित्यमित्यनेन विशेषणार्थम् । नित्यग्रहणं किम्? विधोता-विधविता-विदुधविथ । तासि विभाषितेटस्थलि नित्यमिडागमो भवति । तास्वदिति वतिनिर्देशः किमर्थः? तासौ सतस्थलि प्रतिषेधार्थः । यो हि तासावसन्नसत्वाच्च नित्यानिट् तस्य थलि प्रतिषेधो न भवति-जघसिथ। उवयिथ। उत्तरसूत्रेऽपि तास्वदिति वर्त्तते, अदादेशो हि घसिर्वेञादेशश्च वयिस्तासौ नास्ति ॥

३३४१. उपदेशेऽत्वतः ॥ ६२ ॥

उपदेशे यो धातुरकारवान् तासौ नित्यानिट् तस्मात्तासाविव थलीडागमो न भवति । पक्ता-पपक्थ । यष्टा - इयष्ठ । शक्ता - शशक्थ । उपदेश इति किम्? कर्ष्टा-चकर्षिथ । अत्वत इति किम्? भेत्ता - बिभेदिथ । तपरकरणं किम्? राद्धा-रराधिथ । तास्वदित्येव । जिघृक्षति । जग्रहिथ । नित्यमनिट इत्येव । अङ्क्ता - अञ्जिता-आनञ्जिथ ॥

३३४२. ऋतो भारद्वाजस्य ॥ ६३ ॥

ऋकारान्ताद्धातोर्भारद्वाजस्याचार्यस्य मतेन तासाविव नित्यानिटस्थलि इडागमो न भवति। स्मर्त्ता - सस्मर्थ । ध्वर्त्ता-दध्वर्थ । सिद्धे सत्यारम्भो नियमार्थः - ऋत एव भारद्वाजस्य, नान्येषां धातूनाम् - ययिथ । वविथ । पेचिथ । शेकिथ । तदयमर्थात् पूर्वयोर्योगयोर्विकल्पः । तपरकरणमृकारान्तस्य निवृत्त्यर्थम् । तथा हि सति विध्यर्थमेतत् स्यात्॥

३३४३. बभूथाततन्थजगृभ्मववर्थेति निगमे ॥ ६४ ॥

बभूथ आततन्थ जगृम्भ ववर्ह इत्येतानि निपात्यन्ते निगमविषये । निगमो वेदः । बभूथ-त्वं हि होता प्रथमो बभूथ । बभूविथेति भाषायाम् । आततन्थ-येनान्तरिक्षमुर्वाततन्थ । आतेनिथेति भाषायाम् । जगृभ्म-जगृभ्मा ते दक्षिणमिन्द्र हस्तम् । जगृहिमेति भाषायाम् । ववर्थ - ववृर्थ त्वं हि ज्योतिषा । ववरिथेति भाषायाम् । क्रादिसूत्रादेवास्य प्रतिषेधे सिद्धे नियमार्थं वचनम्-निगम एव, न भाषायामिति ॥

३३४४. विभाषा सृजिदृशोः ॥ ६५ ॥

सृजि दृशि इत्येतयोस्थलि विभाषा इडागमो न भवति । सस्रष्ठ । ससर्जिथ । ददृष्ठ । ददर्शिथ ॥

३३४५. इडत्त्यर्त्तिव्ययतीनाम् ॥ ६६ ॥

अत्ति अर्त्ति व्ययति इत्येतेषां थलीडागमो भवति । अदिथ । आरिथ । संविव्ययिथ । व्येञो न व्यो लिटीत्यात्वप्रतिषेधः । अर्त्तिव्ययत्योऋृतो भारद्वाजस्येति नियमाद्विकल्पः प्राप्तः । अर्त्तेरपि नित्यः प्रतिषेधः । अत्रेड्ग्रहणं विस्पष्टार्थम् । विकल्पविधाने हि सति अत्तिव्ययतिग्रहणमर्थकं, प्रतिषेधविधाने चार्त्तिग्रहणमिति नित्योऽयं विधिरिड्ग्रहणमन्तरेणापि शक्यते विज्ञातुम् ॥

३३४६. वस्वेकाजाद्घसाम् ॥ ६७ ॥

कृतद्विर्वचनानामेकाचां धातूनाम् आकारान्तानां घसेश्च वसाविडागमो भवति। आदिवान्। आशिवान् । पेचिवान् । शेकिवान् । धात्वभ्यासयोरेकादेशे कृते एत्वाभ्यासलोपयोश्च कृतयोः कृतद्विर्वचना एते एकाचो भवन्ति । आत्-ययिवान् । तस्थिवान् । घस्-जक्षिवान् । सिद्धे सत्त्यारम्भो नियमार्थः - एकाजाद्घसामेव वसाविडागमो भवति नान्येषाम् । बिभिद्वान् । चिच्छिद्वान् । बभूवान् । शिश्रिवान् । क्रदिनियमात् प्रतिषेधाभावाच्च य इट् प्रसक्तः स नियम्यते । आद्ग्रहणमनेकाजर्थम्। द्विर्वचने हि कृते इटि हि सति आतो लोपेन भवितव्यम् । दरिद्रातेस्तु कास्यनेकाज्ग्रहणं चुलुम्पाद्यर्थमित्यामा भवितव्यम्-दरिद्राञ्चकार । अथाप्याम्न क्रियते तथापि च दरिद्रातेरार्द्धधातुके लोपः सिद्धश्च प्रत्ययविधाविति प्रागेव प्रत्ययोत्पत्तेराकारे लुप्ते इडागमस्य निमित्तं विहतमिति न इडागमो भवति । ददरिद्रवानिति भवितव्यम् । घसेरपि यदि ग्रहणमिह न क्रियते तदा द्विर्वचनात् परत्वाद् घसिभसोर्हलि चेति उपधालोपे कृते द्विर्वचनमेव न स्यादनच्कत्वाद् । इह तु घसिग्रहणाद् उपधालोपमपि परत्वादिडागमो बाधते ।

तत्र कृते गमहनजनखनघसामित्युपधालोपः । स च द्विर्वचनेऽचीति द्विर्वचने कर्त्तव्ये स्थानिवद्भवति, तेन जक्षिवानिति सिद्ध्यति ॥

३३४७. विभाषा गमहनविदविशाम् ॥ ६८ ॥

गम हन विद विश इत्येतेषां धातूनां वसौ विभाषा इडागमो भवति । गम-जग्मिवान् । जगन्वान् । मो नो धातोरिति नकारः । हन-जन्घिवान् । जघन्वान् । विद-विविदिवान् । विविद्वान् । विश-विविशिवान् । विविश्वान् । विशिना साहचर्यादिह विदेस्तौदादिकस्य लाभार्थस्य ग्रहणम् । ज्ञानार्थस्य तु नित्यं विविद्वानित्येव भवति। दृशेश्चेति वक्तव्यम् । ददृशिवान् । ददृश्वान् ॥

३३४८. सनिंससनिवांसम् ॥ ६९ ॥

सनोतेः सनतेर्वा धातोः सनिंससनिवांसमिति निपात्यते । अग्जित्वाग्ने सनिंससनिवांसम्। इडागम एत्वाभ्यासलोपाभावश्च निपात्यते । सनिङ्पूर्वादन्यत्र सेनिवांसमित्येव भवति । छन्दसीदं निपातनं विज्ञायते । भाषायां सेनिवांसनिति भवति ॥

३३४९. ऋद्धनोः स्ये ॥ ७० ॥

ऋकारान्तानां धातूनां हइन्तेश्च स्ये इडागमो भवति । करिष्यति । हनिष्यति । हरिष्यति । स्वरतेर्वेद्त्वाद् ऋद्धनोः स्य इत्येतद्भवति । विप्रतिषेधेन - स्वरिष्यति। तपरकरणं विस्पष्टार्थम् ।

३३५०. अञ्जेः सिचि ॥ ७१ ॥

अञ्जेः सिचि इडागमो भवति । आञ्जीत् । आञ्जिष्टाम् । आञ्जिषुः । सिचीति किम्? अङ्क्ता । अञ्जिता । ऊदित्वात् विभाषा भवति ॥

३३५१. स्तुसुधूञ्भ्यः परस्मैपदेषु ॥ ७२ ॥

स्तु सु धूञ् इत्येतेभ्यः सिचि परस्मैपदे परत इडागमो भवति । अस्तावीत्। असावीत्। अधावीत् । परस्मैपदेष्विति किम्? अस्तोष्ट । असोष्ट । अधोष्ट । अधविष्ट ॥

३३५२. यमरमनमातां सक् च ॥ ७३ ॥

यम रम नम इत्येतेषामङ्गानामाकारान्तानां च सगागमो भवति परस्मैपदे सिचि इडागमश्च । यम्-अयंसीत् । अयंसिष्टाम् । अयंसिषुः । रम्-व्यरंसीत् । व्यरंसिष्टाम् । व्यरंसिषुः। नम्-अनंसीत् । अनंसिष्टाम् । अनंसिषुः । आकारान्तानाम्-अयासीत् । अयासिष्टाम्। अयासिषुः। यमादीनां इलन्तलक्षणा वृद्धिः प्राप्ता सा नेटीति प्रतिषिध्यते । परस्मैपदेष्वित्येव । अयंस्त । अरंस्त । अनंस्त ॥

३३५३. स्मिपूङ्ञ्ज्वशां सनि ॥ ७४ ॥

स्मिङ् पूङ् ॠ अञ्जू अशू इत्येतेषां धातूनां सनीडागमो भवति । सिस्मयिषते पिपविषते। अरिरिषति । अञ्जिजिषति । अशिशिषते । ङकारग्रहणं पूञो मा भूत्-पुपूषति इत्येव तस्य भवति । अशेरूदितो ग्रहणादश्नोतेर्नित्यमिडागमोऽस्त्येव॥

३३५४. किरश्च पञ्चभ्यः ॥ ७५ ॥

किरादिभ्यः पञ्चभ्यः सनि इडागमो भवति । कॄ-चिकरिषति । गॄ-जिगरिषति। दॄङ्-दिदरिषते । धृङ्-दिधरिषते । प्रच्छ-पिप्रच्छिषति । पञ्चभ्य इति किम्? सिसृक्षति । किरतिगिरत्योरिट् सनि वेति विकल्पः प्राप्तः । वृतो वेति चास्येटो दीर्घत्वं नेच्छन्ति ॥

३३५५. रुदादिभ्यः सार्वधातुके ॥ ७६ ॥

रुदादिभ्य उत्तरस्य वलादेः सार्वधातुकस्य इडागमो भवति । रुद्-रोदिति । स्वप्-स्वपिति। श्वस्-श्वसिति । अन्-प्राणिति । जक्ष्-जक्षिति । पञ्चभ्य इत्येव। जागर्ति । सार्वधातुक इति किम्? स्वप्ता । वलादेरित्येव-रुदन्ति ॥

३३५६. ईशः से ॥ ७७ ॥

ईश उत्तरस्य से इत्येतस्य सार्वधातुकस्य इडागमो भवति । ईशिषे । ईशिष्व।

३३५७. ईडजनोर्ध्वे च ॥ ७८ ॥

ईड जन इत्येताभ्यामुत्तरस्य ध्ये इत्येतस्थ से इत्येतस्य च सार्वधातुकस्य इडागमो भवति । ईडिध्वे । ईडिध्वम् । ईडिषे । ईडिष्व । जनिध्वे । जनिध्वम् । जनिषे । जनिष्व । जनी प्रादुर्भाव इत्यस्य छान्दस्त्वात् श्यनो लुक् उपधालोपाभावश्च। जन जनन इत्यस्यापि श्लुविकरणस्य ग्रहणमत्रेष्यते । तस्य कर्मव्यतिहारे व्यतिजज्ञिषे, व्यतिजज्ञिष्व, व्यतिजज्ञिध्वे,

व्यतिजज्ञिध्वम् इति च भवति । ध्वेशब्दे ईशेरपि इडागम इष्यते - ईशिध्वे, ईशिध्वमिति-तदर्थ केचिदीडजनोः स्ध्वे चेति सूत्रं पठन्ति । तत्र सकारादेः सेशब्दस्य सूत्र एवोपादानाच्चशब्दो भिन्नक्रम ईशेरनुकर्षणार्थो विज्ञायते । ईडीशिजनां सेध्वयोरित्येकमेव सूत्रं न पठितं? विचित्रा हि सूत्रस्य कृतिः पाणिनेरिति । ध्वे इति कृतटेरेत्वस्य ग्रहणात् लङि ध्वमि न भवितव्यमिटा। लोटि पुनरेकदेशविकृतस्यानन्यत्वाद् भवितव्यमिटा ॥

३३५८. लिङः सलोपोऽनन्त्यस्य ॥ ७९ ॥

सार्वधातुक इति वर्त्तते । सार्वधातुके यो लिङ् तस्य अनन्त्यस्य सकारस्य लोपो भवति। कः पुनरनन्त्यो लिङः सकारः? यो यासुटसुट्सीयुटाम् । कुर्यात्। कुर्यातम् । कुर्युः । कुर्वीत । कुर्वीयाताम् । कुर्वीरन् । अनन्त्यस्येति किम्? कुर्युः। कुर्याः। सार्वधातुक इत्येव । क्रियास्ताम्। क्रियासुः । कृषीष्ट । कृषीयास्ताम् । कृषीरन् ॥

३३५९. अतो येयः ॥ ८० ॥

अकारान्तादङ्गादुत्तरस्य या इत्येतस्य सार्वधातुकस्य इय् इत्ययमादेशो भवति। पचेत्। पचेताम् । पचेयुरिति अत्यत्रोस्यपदान्तादिति पररूपं बाधितम् । अत इति किम्? चिनुयात् । सुनुयात् । तपरकरणं किम्? यायात् । सार्वधातुक इत्येव - चिकीर्ष्यात् । ननु चातो लोपेनात्र भवितव्यम् । पचेदित्यत्रापि हि तर्हि अतो दीर्घो यञीति दीर्घत्वेन भवितव्यम् । तदनेनावश्यं विध्यन्तरं बाधितव्यम् । स यथैव दीर्घस्य बाधक एवमतोलोपस्यापि बाधकः स्यात्? स्यादेतदेवं यदि दीर्घः सार्वधातुके विधीयते । अथ तु तिङि विधीयते, तदा येन नाप्राप्तिन्यायेन दीर्घस्यैव बाधकः स्यान्न पुनरतोलोपस्य। येय इत्यविभक्तिको निर्देशः । य इतिवा षष्ठीनिर्द्देशे यलोपस्यासिद्धत्वमनाश्रित्याद्गुणः कृतः सौत्रत्वान्निर्द्देशस्येति । केचिद् अत्रातो यासिय इति सूत्रं पठन्ति । तेषां सकारान्तः स्थानी, षष्ठीसमासश्च ।

३३६०. आतो ङितः ॥ ८१ ॥

आकारस्य ङिदवयवस्य आकारान्तादङ्गादुत्तरस्य सार्वधातुकस्य इय् इत्ययमादेशो भवति। पचेते । पचेथे । पचेताम् । पचेथाम् । यजेते । यजेथे । यजेताम् । यजेथाम् । सार्वधातुकमपिदित्यत्र न ङितीव ङिद्वदित्येवमङ्गीक्रियतेऽपि तु ङित इव ङिद्वदिति । पूर्वसूत्र एव उच्चुकुटिषतीति प्रसिद्धये तथाङ्गीकरणम् । यदि गाङ्कुटादिसूत्रे ङित इव ङिद्वद्भवतीत्येवमङ्गीक्रियते तदा अनुदात्तङित आत्मनेपदमिति आत्मनेपदं प्राप्नोतीति । आत

इति किम्? पचन्ति । यजन्ति । पचन्ते । यजन्ते । ङित इति किम्? पचावहै । पचामहै अत इत्येव । चिन्वाते । सुन्वाते । तपरकरणं किम्? मिमाते, मिमाथे ॥

३३६१. आने मुक् ॥ ८२ ॥

आने परतोऽङ्गस्यातो मुगागमो भवति । पचमानः, यजमानः । अकारमात्रभक्तोऽयं मुक् अदुपदेशग्रहणेन गृह्यत इति अदुपदेशादिति लसार्वधातुकानुदात्तत्वम् भवति । यद्येवमातो ङित इत्ययमपि विधिः प्राप्नोति? तपरनिर्द्देशान्न भविष्यति । मुकि सत्यध्यर्द्धमात्रो भवति । लसार्वधातुकानुदात्तत्वमपि तर्हि न प्राप्नोति? नैष दोषः । उपदेशग्रहणं तत्र क्रियते । तेन उपदेशादूर्ध्वं सत्यपि कालभेदे भवितव्यम् । तथा च पचावः पचाम इत्यत्रापि भवति ॥

३३६२. ईदासः ॥ ८३ ॥

आस उत्तरस्यानशब्दस्य ईकारादेशो भवति । आसीनो यजते । अत्र पञ्चम्याः परस्य षष्ठी कल्प्यते ॥

३३६३. अष्टन आ विभक्तौ ॥ ७४ ॥

अष्टनो विभक्तौ परत आकारादेशो भवति । अष्टाभिः । अष्टाभ्यः । अष्टानाम् । अष्टासु । विभक्ताविति किम्? अष्टत्वम् । अष्टता । आ इति व्यक्तिनिर्देशोऽयम्, आकृतिनिर्देशे तु नकारस्थानेऽनुनासिकाकारः स्यात् । विकल्पेनायमाकारो भवत्येतज्ज्ञापितम् - "अष्टनो दीर्घात्'' इति दीर्घग्रहणाद् । "अष्टाभ्य औश्'' इति च कृतात्वस्य निर्देशात् । तेनाष्टभिरष्टभ्य इत्यपि भवति । तदन्तविधिश्चात्रेष्यते-प्रिया अष्टौ येषां ते प्रियाष्टानः, प्रियाष्टौ ॥

३३६४. रायो हलि ॥ ८५ ॥

रै इत्येतस्य हलादौ विभक्तौ परत आकारादेशो भवति । राभ्याम् । राभिः । हलीति किम्? रायौ, रायः । विभक्ताविति किम्? रैत्वम्, रैता । "मृजेर्वृद्धिः'' इत्यतः प्राग्विभवक्त्यधिकारः ॥

३३६५. युष्मदस्मदोरनादेशे ॥ ८६ ॥

युष्मदस्मदित्येतयोरनादेशे विभक्तौ परत आकारादेशो भवति । युष्माभिः । अस्माभिः । युष्मासु । अस्मासु । अनादेश इति किम्? युष्मत् । अस्मत् । हलीत्यधिकारादप्यत्र न स्यात्। उत्तरत्र त्वनादेशग्रहणेन प्रयोजनम् "योऽचि'' इति । तदिहैव क्रियते ।

३३६६. द्वितीयायां च ॥ ८७ ॥

द्वितीयायां च परतो युष्मदस्मदोराकारादेशो भवति । त्वाम् । माम् । युवाम् । आवाम्। युष्मान् । अस्मान् । आदेशार्थं वचनम् ॥

३३६७. प्रथमायाश्च द्विवचने भाषायाम् ॥ ८८ ॥

प्रथमायाश्च द्विवचने परतो भाषायां विषये युष्मदस्मदोराकारादेशो भवति । युवाम् । आवाम् । प्रथमाया इति किम्? युवयोः, आवयोः । द्विवचन इति किम्? त्वम्, अहम्, यूयम्, वयम् । भाषायामिति किम्? युवं वस्त्राणि पीवसा वसाथे ॥

३३६८. योऽचि ॥ ८९ ॥

अजादौ विभक्तावनादेशे युष्मदस्मदोर्यकारादेशो भवति । त्वया । मया । त्वयि । मयि। युवयोः । आवयोः । अचीति किम्? युवाभ्याम्, आवाभ्याम् । "युष्मदस्मदोरनादेशे'' इत्यत्र यदि हलीत्यनुवर्त्तते शक्यमकर्त्तुमचीत्येतत्? तत्क्रियते विस्पष्टार्थम् । अनादेश इत्येव । त्वद्गच्छति । मद्गच्छति ॥

३३६९. शेषे लोपः ॥ ९० ॥

शेषे विभक्तौ युष्मदस्मदोर्लोपो भवति । कश्च शेषः? यत्राकारो यकारश्च न विहितः ॥

पञ्चम्याश्च चतुर्थ्याश्च षष्ठीप्रथमयोरपि ।
यान्यद्विवचनान्यत्र तेषु लोपो विधीयते ॥

त्वम् । अहम् । यूयम् । वयम् । तुभ्यम् । मह्यम् । युष्मभ्यम् । अस्मभ्यम् । त्वत्। मत् । युष्मत् । अस्मत् । तव । मम । युष्माकम् । अस्माकम् । शेषग्रहणं विस्पष्टार्थम् । शेषे लोपे कृते स्त्रियां टाप् कस्मान्न भवति, त्वं ब्राह्मणी, अहं ब्राह्मणी? सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य । अलिङ्गे वा युष्मदस्मदी इति। केचित्तु शेषे लोपं टिलोपमिच्छन्ति। कथम्? वक्ष्यमाणादेशा पेक्षः शेषः, ते चादेशा मपर्यन्तस्य विधीयन्ते । तेन मपर्यन्ताद्योऽन्यः स शेष इति । तत्रायं लोप इति टिलोपो भवति ॥

३३७०. मपर्यन्तस्य ॥ ९१ ॥

मपर्यन्तस्येत्ययमधिकारो यदित ऊर्ध्वमनुक्रमिष्यामो मपर्यन्तस्येत्येवं तद्वेदितव्यम्। वक्ष्यति-"युवावो द्विवचने" -युवाम्, आवाम् । मपर्यन्तस्येति किम्? युवकामावकामिति साकच्कस्य मा भूत् । त्वमावेकवचने-त्वया । मया । मपर्यन्तस्येति किम्? साकच्कस्य सर्वस्य मा भूत् । तथा च सति त्वमयोरकारस्य, योऽचीति यकारे कृतेऽनिष्टं रूपं स्यात् । मान्तस्येत्येव सिद्धेऽस्मिन् यत्परिग्रहणं कृतमवधिद्योतनार्थं तन्मान्ते मा भूत् । कदा? यदा ण्यन्तयोः क्विपि मान्तत्वं विद्यते युष्मदस्मदोः । स्थानिवत्त्वं च णेरत्र क्वौ लुप्तत्वान्न विद्यते॥

३३७१. युवावौ द्विवचने ॥ ९२ ॥

द्विवचन इत्यर्थग्रहणम् । द्विवचने ये युष्मदस्मदी द्व्यर्थाभिधानविषये तयोर्मपर्यन्तस्य स्थाने युव आव इत्येतावादेशौ भवतः । युवाम् । आवाम् । युवाभ्याम् । आवाभ्याम् । युवयोः। आवयोः । यदा समासे द्व्यर्थे युष्मदस्मदी भवतः, समासार्थस्यान्यसंख्यत्वादेकवचनं बहुवचनं वा भवति, तदापि द्व्यर्थयोर्युष्मदस्मदोर्युवावौ भवतः, यदि त्वाहौ सौ इत्येवमादिना आदेशान्तरेण न बाध्येते । अतिक्रान्तं युवामतियुवाम् । अत्यावाम् । अतिक्रान्तान् युवामतियुवान् । अत्यावान् । अतिक्रान्तेन युवामतियुवया । अत्यावया । अतिक्रन्तैर्युवामतियु-वाभिरत्यावाभिः । अतिक्रान्तेभ्यो युवामतियुवभ्यमत्यावभ्यम्। अतिक्रान्ताद् युवामतियुवत् । अत्यावत् । अतिक्रान्तेभ्यो युवामतियुवत् । अत्यावत् । अतिक्रान्तानां युवामतियुवाकम् । अत्यावाकम् । अतिक्रान्ते युवामतियुवयि । अत्यावयि । अतिक्रान्तेषु युवामतियुवासु अत्यावासु। त्वाहादीनां विषये तु परत्वात्त एव भवन्ति । अतिक्रान्तो युवामतित्वम् । अत्यहम्। अतिक्रान्ता युवाम् अतियूयम् । अतिवयम् । अतिक्रान्ताय युवाम् अतितुभ्यम् । अतिमह्यम् । अतिक्रान्तस्य युवामसतितव । अतिमम । यदा तु युष्मदस्मदी एकत्वबहुत्वयोर्वर्त्तेते, समासार्थस्तु द्वित्वे तदा युवावौ न भवतः । अतिक्रान्तः त्वाम् अतित्वाम् । अतिमाम् । अतिक्रान्तौ युष्मान् अतियुष्मानत्यस्मान्। एवं सर्वत्र ज्ञेयम् ॥

३३७२. यूयवयौ जसि ॥ ९३ ॥

युश्मदस्मदोर्मपर्यन्तस्य जसि परतो यूय वय इत्येतावादेशौ भवतः । यूयम्। वयम् । परमयूयम् । परमवयम् । अतियूयम् । अतिवयम् । तदन्तविधिरत्र भवति । अङ्गाधिकारे तस्य च ग्रहणं भवति तदुत्तरपदस्य चेति ।

३३७३. त्वाहौ सौ ॥ ९४ ॥

युष्मदस्मदोर्मपर्यन्तस्य सौ परे त्व अह इत्येतावादेशौ भवतः । त्वम् । अहम् । परमत्वम् । परमाहम् । अतित्वम् । अत्यहम् ॥

३३७४. तुभ्यमह्यौ ङयि ॥ ९५ ॥

युष्मदस्मदोर्मपर्यन्तस्य तुभ्य मह्य इत्येतावादेशौ भवतो ङयि परतः । तुभ्यम्। मह्यम्। परमतुभ्यम् । परममह्यम् । अतितुभ्यम् । अतिमह्यम् ॥

३३७५. तवममौ ङसि ॥ ९६ ॥

युष्मदस्मदोर्भपर्यन्तस्य तव मम इत्येतावादेशौ भवतो ङसि परतः । तव । मम । परमतव । परममम । अतितव । अतिमम ।

३३७६. त्वमावेकवचने ॥ ९७ ॥

एकवचन इत्यर्थनिर्देशः । एकवचने ये युष्मदस्मदी एकार्थाभिधानविषये तयोर्मपर्यन्तस्य स्थाने त्व म इत्येतावादेशौ भवतः । त्वाम् । माम् । । त्वया । मया। त्वत् । मत् । त्वयि। मयि । यदा समासे एकार्थे युष्मदस्मदी भवतः, समासार्थस्य त्वन्यसंख्यत्वाद् द्विवचनं बहुवचनं वा भवति, तदापि त्वमावादेशौ भवतः । आदेशान्तराणां तु त्वाहौ सावित्येवमादीनां विषये पूर्वविप्रतिषेधेन त एवेष्यन्ते । अतिक्रान्तस्त्वामतित्वम् । अत्यहम् । अतिक्रान्तौ त्वामतित्वाम् । अतिमाम् । अतिक्रान्तान् त्वामतित्वान् । अतिमान् । अतिक्रान्ताभ्यां त्वामतित्वाभ्याम् । अतिमाभ्याम् । अतिक्रान्तैस्त्वामतित्वाभिः । अतिमाभिः । इत्येवमाद्युदाहार्यम् ।

३३७७. प्रत्ययोत्तरपदयोश्च ॥ ९८ ॥

एकवचन इत्यनुवर्त्तते । प्रत्यये उत्तरपदे च परत एकत्वे वर्त्तमानयोर्युष्मदस्मदोर्मपर्यन्तस्य त्व म इत्येतावादेशौ भवतः । तवायं त्वदीयः । मदीयः । अतिशयेन त्वं त्वत्तरः । मत्तरः । त्वामिच्छति त्वद्यति । मद्यति । त्वमिवाचरति त्वद्यते। मद्यते । उत्तरपदे-तव पुत्रस्त्वत्पुत्रः । मत्पुत्रः । त्वं नथोऽस्य त्वन्नाथो, मन्नाथः । एकवचन इत्येव । युष्माकमिदं युष्मदीयम् । अस्मदीयम् । युष्माकं पुत्रोऽस्माकं पुत्रो युष्मत्पुत्रोऽस्मत्पुत्रः । विभक्ताविति्यधिकारात् पूर्वयोगो विभक्तावेव। ततोऽन्यत्रापि प्रत्यये

उत्तरपदे च यथा स्यादित्ययमारम्भः । ननु चात्राप्यन्तर्वर्तिनी विभक्तिरस्ति, तस्यामेवादेशौ भविष्यतः? नैवं शक्यं, लुका तस्या भवितव्यम् । बहिरङ्गो लुक्, अन्तरङ्गावादेशौ, प्रथमं तौ भविष्यतः? एतदेव तर्ह्यादेशवचनं ज्ञापकमन्तरङ्गानपि विधीन् बहिरङ्गोऽपि लुक् बाधते इति। तेन गोमान् प्रियोऽस्य गोमत्प्रिय इत्येवमादौ नुमादि लुका बाध्यते । एवं च सति त्वाहौ सावित्येवमादयोऽपि प्रत्ययोत्तरपदयोरादेशा न भवन्ति । त्वं प्रधानमेषां त्वत्प्रधानाः । मत्प्रधानाः । यूयं पुत्त्रा अस्य युष्मत्पुत्त्रोऽस्मत्पुत्त्रः । तुभ्यं हितं त्वद्धितं, मद्धितम् । तव पुत्र त्वत्पुत्रः ममत्पुत्रः । अथ किमर्थमेषां त्वाहादीनां बाधनार्थमेतन्न विज्ञायते? लक्ष्यस्थित्यपेक्षया। ज्ञापकार्थे ह्येतस्मिन् बहुतरमिष्टं संगृह्यते ॥

३३७८. त्रिचतुरोः स्त्रियां तिसृचतसृ ॥ ९९ ॥

त्रि चतुर् इत्येतयोः स्त्रियां वर्त्तमानयोस्तिसृ चतसृ इत्येतावादेशौ भवतो विभक्तौ परतः। तिस्रः । चरस्रः । तिसृभिः । चतसृभिः । स्त्रियामिति किम्? त्रयः। चत्वारः । त्रीणि । चत्वारि। स्त्रियामिति चैतत् त्रिचतुरोरेव विशेषणं नाङ्गस्य। तेन यदा त्रिचतुःशब्दौ स्त्रियामङ्गं तु लिङ्गान्तरे तदाप्यादेशौ भवत एव- प्रियास्तिस्रो ब्राह्मण्योऽस्य ब्राह्मणस्य प्रियतिसा ब्राह्मण इति । प्रियतिस्रौ । प्रियतिस्रः । प्रियतिसृ ब्राह्मणकुलम् । प्रियतिसृणी । प्रियतिसृणि। प्रियचतसा । प्रियचतसौ । प्रियचतस्रः। प्रियचतसृ । प्रियचतसृणी । प्रियचतसृणि। नद्यृतश्चेति समासान्तो न भवति । विभक्त्याश्रयत्वेन तिसृभावस्य वहिरङ्गलक्षणत्वात् । यदा तु त्रिचतुःशब्दौ लिङ्गान्तरे, स्त्रियामङ्गम्, तदा आदेशौ न भवतः - प्रियास्त्रयोऽस्याः, प्रियाणि त्रीणि वा अस्या ब्राह्मण्याः सा प्रियत्रिः । प्रियत्री । प्रियत्रयः । प्रियचत्वाः । प्रियचत्वारौ । प्रियचत्वारः। तिसृभावे संज्ञायां कन्युपसंख्यानं कर्त्तव्यम् । तिसृका नाम ग्रामः । चतसर्याद्युदात्तनिपातनं कर्त्तव्यम् । चतस्रः पश्येत्यत्र चतुरः शसीत्येष स्वरो मा भूत् । चतसृणामित्यत्र तु षट्त्रिचतुर्भ्यो हलादिरित्येव स्वरो भवति । हलादिग्रहणसामर्थ्यान्निपातनस्वरो बाध्यते ।

३३७९. अचि र ऋतः ॥ १०० ॥

तिसृ चतसृ इत्येतयोऋतः स्थाने रेफादेशो भवति अजादौ विभक्तौ परतः । तिस्रस्तिष्ठन्ति । तिस्रः पश्य । चतस्रस्तिष्ठन्ति । चतस्रः पश्य । प्रिततिस्र आनय । प्रियचतस्र आनय । प्रियतिस्रः स्वम् । प्रियचतस्रः स्वम् । प्रियतिस्रि निधेहि । प्रियचतस्रि निधेहि । पूर्वसवर्णोत्वडिसर्वनामस्थानगुणानामपवादः । परमपि ङिसर्वनामस्थानगुणं

पूर्वविप्रतिषेधेन बाधते । अचीति किम्? तिसृभिः । चतसृभिः । ऋत इति किम्? तिसृचतस्रोः प्रतिपत्त्यर्थमन्यथा हि तदपवादस्त्रिचतुरोरेवायमादेशो विज्ञायेत ॥

३३८०. जराया जरसन्यतरस्याम् ॥ १०१ ॥

जरा इत्येतस्य जरसित्ययमादेशो भवति अन्यतरस्यामजादौ विभक्तौ परतः । जरसा दन्ताः शीर्यन्ते । जरया दन्ताः शीर्यन्ते । जरसे त्वा परिदद्युः । जरायै त्वा परिदद्युः । अचीत्येव । जराभ्याम् । जराभिः । नुमो जरसादेशो विप्रतिषेधेन । अतिजरांसि ब्राह्मणकुलानि। इहातिजरसं ब्राह्मणकुलं पश्येति लुग्न भवति, आनुपूर्व्या सिद्धत्वात् । आतिजर अमिति स्थिते लुगम्भावो जरस्भाव इति त्रीणि कार्याणि युगपत् प्राप्नुवन्ति । तत्र लुक् तावदपवादत्वादम्भावेन बाध्यते । अम्भावोऽपि परत्वाज्जरसादेशेन न च पुनर्लुक्शास्त्रं प्रवर्त्तते भ्रष्टवसरत्वाद् इत्येवमेव भवति-अतिजरसं ब्राह्मणकुलं पश्येति । प्रथमैकवचने तृतीयाबहुवचने च अतिजरम् ब्राह्मणकुलं तिष्ठति, अतिजरैरिति च भवितव्यमिति गोनर्दीयमतम् । किं कारणम्? सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति । अन्ये त्वनित्यत्वादस्याः परिभाषाया अतिजरसं ब्राह्मणकुलं तिष्ठति अतिजरसैरित्येवं भवितव्यमिति मन्यन्ते ॥

३३८१. त्यदादीनामः ॥ १०२ ॥

त्यदित्येवमादीनामकारादेशो भवति विभक्तौ परतः । त्यद्-स्यः । त्यौ । त्ये । तद्-सः। तौ । ते । यद्-यः । यौ । ये । एतद्-एषः । एतौ । एते । इदम्-अयम् । इमौ । इमे । अदस्-असौ । अमू । अमी । द्वि-द्वौ । द्वाभ्याम् ॥ द्विपर्यन्तानां त्यदादीनामत्वमिष्यते ॥ इह न भवति-भवत्, भवान् । संज्ञोपसर्जनीभूतास्त्यदादयः पाठादेव पर्युदस्ता इतीह न भवति-त्यद् । त्यदौ । त्यदः । अतित्यद् । अतित्यदौ । अतित्यदः । त्यदादिप्रधाने तु शब्दे भवत्येव-परमसः। परमतौ । परमते ॥

३३८२. किमः कः ॥ १०३ ॥

किम् इत्येतस्य क इत्ययमादेशो भवति विभक्तौ परतः । कः । कौ । के । साकच्कस्याप्ययमादेशो भवति, तेनाकार इव किमो न विधीयते, किमोऽदिति ॥

३३८३. कु तिहोः ॥ १०४ ॥

तकारादौ हकारादौ च विभक्तौ परतः किमित्येतस्य कु इत्ययमादेशो भवति। कुतः । कुत्र । कुह । तिहोरितीकार उच्चारणार्थः ॥

३३८४. क्वाति ॥ १०५ ॥

अतीत्येतस्यां विभक्तौ परतः किमित्येतस्य क्व इत्ययमादेशो भवति । क्व गमिष्यसि। क भोक्ष्यते । आदेशान्तरवचनमोर्गुणनिवृत्त्यर्थम् । किमो ड्वदिति च प्रत्ययान्तरं न विधीयते साकच्कार्थं ॥

३३८५. तदोः सः सावनन्त्ययोः ॥ १०६ ॥

त्यदादीनां तकारदकारयोरनन्त्ययोः सकारादेशो भवति सौ परतः । त्यद्-स्यः । तद्-सः। एतद्-एषः । अदस्-असौ । अनन्त्ययोरिति किम्? हे स । सा ॥

३३८६. अदस औ सुलोपश्च ॥ १०७ ॥

अदसः सौ परतः सकारस्य औकारादेशो भवति सोश्च लोपो भवति । असौ । औत्वप्रतिषेधः साकच्काद्वा वक्तव्यः सादुत्वं च । यदा चौत्वप्रतिषेधस्तदा सकारादुत्तरस्य उत्वं भवति । असुकः । असुकौ । उत्तरपदभूतानां त्यदादीनामकृतसन्धीनामादेशा वक्तव्याः । परमाहम् । परमायम् । परमानेन ॥

अदसः सोर्भवेदौत्वं किं सुलोपो विधीयते ।
ह्रस्वाल्लुप्येत संबुद्धिर्न हलः प्रकृतं हि तत् ॥
आप एत्वं भवेत्तस्मिन्न झलीत्यनुवर्त्तनात् ।
प्रत्ययस्थाच्च कादित्वं शीभावश्च प्रसज्यते ॥

३३८७. इदमो मः ॥ १०८ ॥

इदमः सौ परतो मकारोऽन्तादेशो भवति । इयम् । अयम् । इदमो मकारस्य मकारवचनं त्यदाद्यत्वबाधनार्थम् ॥

३३८८. दश्च ॥ १०९ ॥

इदमो दकारस्य स्थाने मकारादेशो भवति विभक्तौ परतः । इमौ । इमे । इमम् । इमौ। इमान् ॥

३३८९. यः सौ ॥ ११० ॥

इदमो मकारस्य यकारादेशो भवति सौ परतः । इयम् । उत्तरसूत्रे पुंसीति वचनात् स्त्रियामयं यकारः ॥

३३९०. इदोऽय् पुंसि ॥ १११ ॥

इदम इद्रूपस्य पुंसि सौ परतोऽय् इत्ययमादेशो भवति । अयं ब्राह्मणः । पुंसीति किम्? इयं ब्राह्मणी ॥

३३९१. अनाप्यकः ॥ ११२ ॥

इदमोऽककारस्य इद्रूपस्य स्थाने अन इत्ययमादेशो भवति आपि विभक्तौ परतः । अनेन । अनयोः । अक इति किम्? इमकेन । इमकयोः । आपीति प्रत्याहारस्तृतीयैकवचनात् प्रभृति सुपः पकारेण ॥

३३९२. हलि लोपः ॥ ११३ ॥

हलादौ विभक्तौ परत इदमोऽककारस्य इद्रूपस्य लोपो भवति । आभ्याम् । एभिः । एभ्यः । एषाम् । एषु । नानर्थकेऽलोन्त्यविधिरिति सर्वस्यायमिद्रूपस्य लोपः। अथवा नायमिल्लोपः । अनाप्यक इति अन्ग्रहणमनुवर्त्तते ॥

३३९३. मृजेर्वृद्धिः ॥ ११४ ॥

विभक्ताविति निवृत्तम् । मृजेरङ्गस्य इको वृद्धिर्भवति । मार्ष्टा । मार्ष्टुम् । मार्ष्टव्यम्। मृजेरिति धातुग्रहणमिदम्, धातोश्च कार्यमुच्यमानं धातुप्रत्यय एव वेदितव्यम्, तेन कंसपरिमृड्भ्याम्, कंसपरिमृड्भिरित्यत्र न भवति ॥

३३९४. अचो ञ्णिति ॥ ११५ ॥

अजन्तस्याङ्गस्य ञिति णिति च वृद्धिर्भवति । ञिति - एकस्तण्डुलनिश्चायः । द्वौ शूर्पनिष्पावौ । कारः । हारः । णिति-गौः । गावौ । गावः । सखायौ । सखायः । जैत्रम् । यौत्रम् । च्यौत्नः । जयतेर्यौतेश्च, उणादयो बवहुलमिति ष्ट्रन् प्रत्ययः । च्यवतेरपि त्नण् ॥

३३९५. अत उपधायाः ॥ ११६ ॥

अङ्गोपधाया अकारस्य स्थाने ञिति णिति च प्रत्यये वृद्धिर्भवति । पाकः त्यागः । यागः । पाचयति । पाचकः । पाठयति । पाठकः । अत इति किम्? भेदयति, भेदकः । उपधाया इति किम्? चकासयति, तक्षकः ॥

३३९६. तद्धितेष्वचामादेः ॥ ११७ ॥

तद्धिते ञिति णिति च प्रत्यये परतोऽङ्गस्याचामादेरचः स्थाने वृद्धिर्भवति । गार्ग्यः । वात्स्यः । दाक्षिः । प्लाक्षिः । णिति - औपगवः । कापटवः । त्वाष्ट्रो जागत इत्यत्राचामादिर्वृद्धिरन्त्योपधालक्षणां वृद्धिं बाधते ॥

३३९७. किति च ॥ ११८ ॥

किति च तद्धिते परतोऽङ्गस्याचामादेरचः स्थाने वृद्धिर्भवति । नडादिभ्यः फक्-नाडायनः। चारायणः । प्राग्वहतेष्ठक्-आक्षिकः । शालाकिकः ॥

इति श्रीवामनविरचितायां काशिकायां वृत्तौ
सप्तमाध्यायस्य द्वितीयः पादः ॥ ७ ॥ २ ॥

अथ सप्तमाध्यायस्य
तृतीयः पादः ॥

३३९८. देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात् ॥ १ ॥

देविका शिंशपा दित्यवाट् दीर्घसत्र श्रेयस् इत्येतेषामङ्गानामचामादेरचः स्थाने वृद्धिप्रसङ्गे आकारो भवति ञिति णिति किति तद्धिते परतः । देविकायां भवमुदकं दाविकमुदकम् ।

देविकाकूले भवाः शालयः, दाविकाकूलाः शालयः । पूर्वदेविका नाम प्राचां ग्रामः । तत्र भवः पूर्वदाविकः । प्राचां ग्रामनगराणामित्युत्तरपदवृद्धिः । साप्याकार एव भवति । शिंशपा-शिंशपाया विकारश्चमसः शांशपचमसः । पलाशादिरचम्, तेन पक्षे अण्, अनुदात्तलक्षणो वा अञ् । शिंशपास्थले भवाः शंशपास्थलाः । पूर्वशिंशपा नाम प्राचां ग्रामः, तत्र भवः पूर्वशांशपः । दित्यवाट्-दित्यौह इदं दात्यौहम् । दीर्घसत्र-दीर्घसत्रे भवं दार्घसत्रम् । श्रेयस् श्रेयसि भवं श्रायसम्। वहीनरस्येद्वचनं कर्तव्यम् । वृद्धिविषयेऽचामादेश्चः स्थाने वहीनरस्येकारादेशो भवति। वहीनरस्यापत्यं वैहीनरिः । केचितु विहीनरस्यैव वैहीनरिमिच्छन्ति ॥

३३९९. केकयमित्रयुप्रलयानां यादेरियः ॥ २ ॥

केकय मित्रयु प्रलय इत्येतेषां यकारादेरिय इत्ययमादेशो भवति तद्धिते ञिति णिति किति च परतः । केकयस्यापत्यं कैकेयः । जनपदशब्दात् क्षत्त्रियादञित्यञ्प्रत्ययः । मित्रयुभावेन श्लाघते मैत्रेयिकया श्लाघते । गोत्रचरणाच्छ्लाघात्याकारतदवेतेष्विति वुञ् । लौकिकं हि तत्र गोत्रं गृह्यते । लोके ऋषिशब्दो गोत्रमित्यभिधीयते । प्रलय-प्रलयादागतं प्रालेयमुदकम् ॥

३४००. न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् ॥ ३ ॥

यकारवकाराभ्यामुत्तरस्य अचामादेरचः स्थाने वृद्धिर्न भवति । ताभ्यां तु यकारवकाराभ्यां पूर्वमैजागमो भवति ञिति णिति किति च तद्धिते परतः । यकारादैकारः। वकारादौकारः व्यसने भवम् वैयसनम् । व्याकरणमधीते वैयाकरणः । स्वश्वस्यापत्यं सौवश्वः । य्वाभ्यामिति किम्? न्रर्थस्यापत्यं न्राथिः । पदान्ताभ्यामिति किम्? यष्टिः प्रहरणमस्य याष्टीकः । यतश्छात्रा यातः । प्रतिषेधवचनमैचोर्विषयप्रक्लृप्त्यर्थमिह मा भूद्वाध्यश्विः, माध्वश्विरिति । नह्यत्र य्वाभ्यामुत्तरस्य वृद्धिप्रसङ्गोऽस्ति । वृद्धेरभावात्प्रतिषेधोऽपि नास्तीत्यप्रसङ्गः ॥ उत्तरपदवृद्धेरप्ययं प्रतिषेध इष्यते ॥ पूर्वत्र्यलिन्दे भवः पूर्वत्रैयलिन्दः । यत्र तूत्तरपदसंबन्धी यण् न भवति तत्र नेष्यते प्रतिषेधः - द्वे अशीती भृतो भूतो भावी वा द्व्याशीतिकः ॥

३४०१. द्वारादीनां च ॥ ४ ॥

द्वार इत्येवमादीनां य्वाभ्याम् उत्तरस्याचामादेरचः स्थाने वृद्धिर्न भवति पूर्वौ तु ताभ्यामैजागमौ भवतः । द्वारे नियुक्तः दौवारिकः । द्वारपालस्येदं दौवारपालम् । तदादिविधिश्चात्र भवति । स्वर-स्वरमधिकृत्य कृतो ग्रन्थः सौवरः । सौवरोऽध्यायः। सौवर्यः

सप्तम्य इति । व्यल्कश-व्यल्कशे भवः, वैयल्कशः । स्वस्ति-स्वस्तीत्याह सौवस्तिकः । स्वर-स्वर्भवः, सौवः । अम्ययानां भमात्रे टिलोपः स्वार्गममाह सौवर्गमिकः । स्वाध्याय इति केचित् पठन्ति, तदनर्थकम् । शोभनोऽध्याय इत्येतस्यां व्युत्पत्तौ तु पूर्वेणैव सिद्धम् । अथाप्येवं व्युत्पत्तिः क्रियते-स्वोऽध्यायः स्वाध्याय इति ? एवमपुयत्रैव स्वशब्दस्यैव पाठात्सिद्धम् । तदादावपि हि वृद्धिरियं भवत्येव। स्फ्यकृत-स्फ्यकृतस्यापत्यं स्फैयकृतः । स्वादुमृदु-स्वादुमृदुन इदं सौवादुमृदवम्। श्वन् - शुन इदम् शौवनम् । अणि अन् इति प्रकृतिभावः । शुनो विकारो मासं शौवम् । प्राणिरजतादिभ्योऽञित्यञ् । श्वादंष्ट्रायां भवः शौवादंष्ट्रो मणिः । स्वस्येदं शौवम्। स्वग्रामे भवः सौवग्रामिकः । अध्यात्मादित्वाट्ठथञ् । अपदान्तार्थोऽयमारम्भः। द्वार । स्वर । स्वाध्याय । व्यल्कश । स्वस्ति । स्वर् । स्फ्यकृत । स्वादुमृदु । श्वन्। स्व । द्वारादिः ॥

३४०१. न्यग्रोधस्य च केवलस्य ॥ ५ ॥

न्यग्रोधशब्स्य केवलस्य यकारादुतरस्याचामादेरचः स्थाने वृद्धिर्न भवति तस्माच्च पूर्वमैकार आगमो भवति । न्यग्रोधस्य विकारः नैयग्रोधश्चमसः । केवलस्येति किम्? न्यग्रोधमूले भवाः शालयः, न्याग्रोधमूलाः शालयः । न्यग्रोहयतीति न्यग्रोध इति व्युत्पत्तिपक्षे नियमार्थमव्युत्पत्तिपक्षे विध्यर्थम् ॥

३४०२. न कर्मव्यतिहारे ॥ ६ ॥

कर्मव्यतिहारे यदुक्तं तन्न भवति । प्रतिषेधागमयोरयं प्रतिषेधः । व्यावक्रोशी। व्यावलेखी । व्याववर्ती । व्यावहासी वर्त्तते । कर्मव्यतिहारे णच् स्त्रियामिति णच् प्रत्ययस्तदन्ताण्णचः स्त्रियामञ् ॥

३४०३. स्वागतादीनां च ॥ ७ ॥

स्वागत इत्येवमादीनां यदुक्तं तन्न भवति । स्वागतमित्याह स्वागतिकः । स्वध्वरेण चरति स्वाध्वरिकः । स्वङ्गस्यापत्यं स्वाङ्गिः । व्यङ्गस्यापत्यं व्याङ्गिः । व्यडस्यापत्यं व्याडिः । व्यवहारेण चरति व्यावहारिकः । व्यवहारशब्दोऽयं लौकिके वृत्ते वर्त्तते न तु कर्म्मव्यतिहारे । स्वपतौ साधुः स्वापतेयः । द्वारादिषु स्वशब्दपाठादत्र प्राप्तिः । स्वागत । स्वध्वर । स्वङ्ग । व्यङ्ग । व्यड । व्यवहार । स्वपति । स्वागतादिः॥

३४०४. श्वादेरिञि ॥ ८ ॥

श्वादेरङ्गस्य इञि परतो यदुक्तं तन्न भवति । श्वभस्त्रस्यापत्यं श्वाभस्त्रिः । श्वादंष्ट्रिः। श्वन्शब्दो द्वारादिषु पठ्यते, तत्र तदादिविधिर्भवतीत्येतदेव वचनं ज्ञापकम्। इकारादिग्रहणं कर्त्तव्यं, श्वागणिकाद्यर्थम् । श्वगणेन चरति श्वागणिकः । श्वायूथिकः। तदन्तस्य चान्यत्रापि तद्धिते प्रतिषेध इष्यते ॥ श्वाभस्त्रेरिदम् श्वाभस्त्रम् ॥

३४०५. पदान्तस्यान्यतरस्याम् ॥ ९ ॥

श्वादेरङ्गस्य पदशब्दान्तस्यान्यतरस्यां यदुक्तं तन्न भवति । श्वापदस्येदं श्वापदम्। शौवापदम् ॥

३४०६. उत्तरपदस्य ॥ १० ॥

उत्तरपदस्येत्ययमधिकारः हनस्तोऽचिण्णलोरिति प्रागेतस्मात् यदित ऊर्ध्वमनुक्रमिष्याम उत्तरपदस्येत्येवं तद्वेदितव्यम् । वक्ष्यत्यवयवाद्दतोः । पूर्ववार्षिकम्। अपरवार्षिकम् । पूर्वहैमनम्। अपरहैमनम् । यत्र पञ्चमीनिर्देशो नास्ति जे प्रोष्ठपदानामित्येवमादौ तदर्थमुत्तरपदाधिकारः । पञ्चमीनिर्देशेष्वपि विस्पष्टार्थं वृद्धेश्च व्यपदेशार्थम् । उत्तरपदवृद्धौ सर्वं चेत्युत्तरपदाधिकारे या वृद्धिरित्येवं विज्ञायते ॥

३४०७. अवयवाद्दतोः ॥ ११ ॥

अवयववाचिन उत्तरस्य ऋतुवाचिन उत्तरपदस्याचामादेरचो वृद्धिर्भवति तद्धिते ञिति णिति किति च परतः । पूर्ववार्षिकम् । पूवहैमनम् । अपरवार्षिकम् । अपरहैमनम् । पूर्ववर्षाणामपरं वर्षाणामित्येकदेशिसमासः । तत्र भव इत्येतस्मिन्नर्थे, वर्षाभ्यष्ठक्, हेमन्ताच्च, सर्वत्राण् च तलोपश्च इत्यण् प्रत्ययः । तत्र ऋतोर्वृद्धिमद्विधावयववादिति तदन्तविधिः । अवयवादिति किम्? पूर्वासु वर्षासु भवं पौर्ववर्षिकम् । कालाट्ठञ इति ठञ् । अवयवपूर्वस्यैव तदन्तविधिर्नान्यस्य ॥

३४०८. सुसर्वार्द्धाज्जनपदस्य ॥ १२ ॥

सु सर्व अर्द्ध इत्येतेभ्य उत्तरस्य जनपदवाचिन उत्तरपदस्याचामादेरचो वृद्धिर्भवति तद्धिते ञिति णिति किति च परतः । सुपाञ्चालकः । सर्वपाञ्चालकः। अर्द्धपाञ्चालकः । जनपदतदवध्योश्च, अवृद्धादपि बहुवचनविषयादिति वुञ् । सुसर्वार्द्धदिक्शब्देभ्यो जनपदेस्येति तदन्तविधिः ॥

३४०९. दिशोऽमद्राणाम् ॥ १३ ॥

दिग्वाचिन उत्तरस्य जनपदवाचिनो मद्रवर्जितस्याचामादेरचो वृद्धिर्भवति तद्धिते ञिति णिति किति च परतः । पूर्वपाञ्चालकः । अपरपाञ्चालकः । दक्षिणपाञ्चालकः । पूर्ववत्तदन्तविधिः प्रत्ययश्च । दिश इति किम्? पूर्वः पञ्चालानां पूर्वपञ्चालः । तत्र भवः पौर्वपञ्चालकः । आपरपञ्चालकः । अमद्राणामिति किम्? पौर्वमद्रः । आपरमद्रः । मद्रेभ्योऽञित्यञ्प्रत्ययः ॥

३४१०. प्राचां ग्रामनगराणाम् ॥ १४ ॥

प्राचां देशे ग्रामनगराणां दिश उत्तरेषामचामादेरचो वृद्धिर्भवति तद्धिते ञिति णिति किति च परतः । ग्रामाणाम् - पूर्वेषुकामशम्यां भवः पूर्वैषुकामशमः । अपरैषुकामशमः । पूर्वकार्ष्णमृत्तिकः । अपरकार्ष्णमृत्तिकः । नगराणाम् - पूर्वस्मिन् पाटलिपुत्रे भवः पूर्वपाटलिपुत्रकः । अपरपाटलिपुत्रकः । पूर्वकान्यकुब्जः । अपरकान्यकुब्जः । ग्रामत्वादेव नगराणामपि ग्रहणे सिद्धे भेदेन यदुभयोरुपादानं तत्सम्बन्धभेदप्रतिपत्त्यर्थम् दिक्पूर्वपदो पूर्वेषुकामशम्पादिः ग्रामनामधेयम्। पाटलिपुत्रादिः पुनरुत्तरपदमेव नगरमाह । तत्र ग्रामवाचिनामङ्गानामवयवस्य दिक्शब्दादुत्तरस्यच नगरवाचिनामुत्तरपदानामवयवस्य च वृद्धिर्भवतीत्येवमभिसम्बन्धः क्रियते । इतरत्र तु दिश उत्तरेषां नगराणामित्येव । पूर्वैषुकामशम इत्येवमादिषु कृतायामुत्तरपदवृद्धौ एकादेशो भवतीति ज्ञापितं नेन्द्रस्य परस्येति प्रतिषेधेन ॥

३४११. संख्यायाः संवत्सरसंख्यस्य च ॥ १५ ॥

संख्याया उत्तरपदस्य संवत्सरशब्दस्य संख्यायाश्चाचामादेरचः स्थाने वृद्धिर्भवति तद्धिते ञिति णिति किति च परतः । द्वौ संवत्सरावधीष्टो भृतो भूतो भावी वा द्विसांवत्सरिकः । संख्यायाः - द्वे षष्टी अधीष्टो भृतो भूतो भावी वा द्विषाष्टिकः । द्विसाप्ततिकः। द्विषष्ट्यादिशब्दो वर्षेषु संख्येयेषु वर्त्तमानः कालाधिकारविहितं प्रत्ययमुत्पादयति । परिमाणान्तस्येत्येव सिद्धे संवत्सरग्रहणं परिमाणग्रहणे कालपरिमाणस्याग्रहणार्थम्। तेन द्वैसमिकः, त्रैसमिक इत्युत्तरपदवृद्धिर्न भवति । द्विवर्षा, त्रिवर्षा, माणविकेति अपरिमाणबिस्ताचितेति पर्युदासो न भवति ॥

३४१२. वर्षस्याभविष्यति ॥ १६ ॥

संख्याया उत्तरस्य वर्षशब्दस्याचामादेरचो वृद्धिर्भवति तद्धिते ञिति णिति किति च परतः, स चेत्तद्धितो भविष्यत्यर्थे न भवति । द्वेवर्षे अधीष्टो भृतो भूतो वा द्विवार्षिकः ।

त्रिवार्षिकः । अभविष्यतीति किम्? यस्य त्रैवर्षिकं धान्यं निहितं विहितं भृत्यवृत्तये अधिकं वापि विद्येत स सोमं पातुमर्हति । त्रीणि वर्षाणि भावीति त्रैवर्षिकम् । अधीष्टभृतयोरभविष्यतीति प्रतिषेधो न भवति । गम्यते हि तत्र भविष्यत्ता, न तु तद्धितार्थः । द्वे वर्षे अधीष्टो भृतो वा कर्म्म करिष्यतीति द्विवार्षिको मनुष्यः ॥

३४१३. परिमाणान्तस्यासंज्ञाशाणयोः ॥ १७ ॥

परिमाणान्तस्याङ्गस्य संख्यायाः परं यदुत्तरपदं तस्याचामादेरचो वृद्धिर्भवति तद्धिते ञिति णिति किति च परतः, संज्ञायां विषये शाणे चोत्तरपदे न भवति । द्वौ कुडवौ प्रयोजनमस्य द्विकौडविकः । द्वाभ्यां सुवर्णाभ्यां क्रीतं द्विसौवर्णिकम् । विभाषा कार्षापणसहस्राभ्यामित्यत्र सुवर्णशतमानयोरुपसंख्यानमिति लुको विकल्पः । द्वाभ्यां निष्काभ्यां क्रीतं द्वित्रिपूर्वान्निष्काद् द्विनैष्किकम् । असंज्ञाशाणयोरिति किम्? पाञ्चलोहितकम् । पाञ्चकलापिकम् । पञ्च लोहित्यः परिमाणमस्य, पञ्च कलापानि परिमाणमस्येति विगृह्य तदस्य परिमाणमिति योगविभागात्प्रत्ययस्तद्धितान्तश्चायं समुदायः संज्ञा । द्वाभ्यां शाणाभ्यां क्रीतं द्वैशाणम् । त्रैशाणम्। शाणाद्वा, द्वित्रिपूर्वादण्चेत्यण् प्रत्ययः । असंज्ञाशाणकुलिजानामिति केचित्पठन्ति । द्वे कुलिजे प्रयोजनमस्य द्वैकुलिजिकः ॥

३४१४. जे प्रोष्ठपदानाम् ॥ १८ ॥

ज इति जातार्थो निर्द्दिश्यते । तत्र यस्तद्धितो विहितस्तस्मिन् ञिति णिति किति च परतः प्रोष्ठपदानामुत्तरस्याचामादेरचो वृद्धिर्भवति । प्रोष्ठपदा नाम नक्षत्रम्, ताभिर्युक्तः काल हत्यण् । तस्य लुबविशेष इति लुप् । प्रोष्ठपदासु जातः, ऋतुनक्षत्रेभ्योऽणित्यण्, प्रौष्ठपदो माणवकः । ज इति किम्? यदा प्रौष्ठपदो मेघो धरणीमभिवर्षति । प्रोष्ठपदासु भवः प्रोष्ठपदः। प्रोष्ठपदानामिति बहुवचननिर्द्देशात् पर्यायोऽपि गृह्यते-भाद्रपाद इति ॥

३४१५. हृद्भगसिन्ध्वन्ते पूर्वपदस्य च ॥ १९ ॥

हृद् भग सिन्धु इत्येवमन्तेऽङ्गे पूर्वपदस्योत्तरपदस्याचामादेरचो वृद्धिर्भवति तद्धिते ञिति णिति किति च परतः । सुहृदयस्येदं सौहार्द्दम् । सुहृदयस्य भावः सौहार्द्यम् । सुभगस्य भावः सौभाग्यम् । दौर्भाग्यम् । सुभगाया अपत्यं सौभागिनेयः । दौर्भागिनेयः । कल्याण्यादिषु सुभगदुर्भगेति पठ्यते । सुभग मन्त्रे इत्युद्गात्रादिषु पठ्यते । तत्रोत्तरपदवृद्धिर्नेष्यते-महते सौभगाय । छन्दसि सर्वविधीनां विकल्पितत्वात् । सक्तुप्रधानाः सिन्धवः सक्तुसिन्धवः,

सक्तुसिन्धुषु भवः साक्तुसैन्धवः । पानसैन्धवः। सिन्धुशब्दः कच्छादिषु पठ्यते, तेन तदन्तविधिरिष्यते इत्यण्प्रत्ययः ॥

३४१६. अनुशतिकादीनां च ॥ २० ॥

अनुशतिक इत्येवमादीनां चाङ्गानां पूर्वपदस्य चोत्तरपदस्य चाचामादेरचः स्थाने वृद्धिर्भवति तद्धिते ञिति णिति किति वा परतः । अनुशतिकस्येदम् आनुशातिकम्। अनुहोडेन चरति आनुहौडिकः । अनुसंवरणे दीयते आनुसांवरणम्। अनुसंवत्सरेण दीयते आनुसांवत्सरिकः। अङ्गारवेणुर्नाम कश्चित्तस्यापत्यम्, आङ्गारवैणवः । असिहत्य-तत्र भवम् आसिहात्यम् । अस्यहत्य इति केचित्पठन्ति, ततोऽपि विमुक्तादित्वादण् । अस्यहत्यशब्दोऽस्मिध्यायेऽस्ति आस्यहात्यः । अस्यहेतिरित्येवमपरे पठन्ति । अस्यहेतिः प्रयोजनमस्य आस्यहैतिकः । अत एव वचनादस्य समुदायस्य प्रातिपकदिकत्वं विभक्तेश्चालुक् । वध्योग इति विदादिरयम्, तस्यापत्यम् वाध्यौगः । पुष्करसत्, अनुहरत्, एतौ बाह्वादिषु पठ्येते-पौष्करसादिः। आनुहारतिः। कुरुकतो गर्गादिः, कौरुकात्यः । कुरुपञ्चाल-कुरुपञ्चालेषु भवः कौरुपाञ्चालः । जनपदसमुदायो जनपदग्रहणेन न गृह्यते इति वुञ् न भवति । उदकशुद्धस्यापत्यम् औदकशौद्धिः। इहलोक, परलोक-तत्र भवः ऐहलौकिकः, पारलौकिकः । लोकोत्तरपदस्येति ठञ् । सर्वलोक-तत्र विदितः सार्वलौकिकः । सर्वपुरुषस्येदं सार्वपौरुषम् । सर्वभूमेर्निमित्तं संयोग उत्पातो वा सार्वभौमः । प्रयोग-तत्र भवः प्रायौगिकः । परस्त्री-पारस्त्रैणेयः । कुलटाया वेतीनङ्॥ राजपुरुषात् ष्यञि । राजपौरुष्यम्। ष्यञीति किम्? राजपुरुषस्यापत्यं राजपुरुषायणिः । उदीचां वृद्धादणोत्रादिति फिञ्। शतकुम्भसुखशयनादयः-शतकुम्भे भवः शातकौम्भः । सौखशायनिकः । पारदारिकः सूत्रनडस्यापत्यं सौत्रनाडिः । आकृतिगणश्चायमिष्यते । तेनेदमपि सिद्धं भवति - अभिमममर्हति आभिगामिकः। अधिदेवे भवमाधिदैविकम् । आधिभौतिकम् । चतस्र एव विद्याः चातुर्वैद्यम् । स्वार्थे ष्यञ् । अनुशतिक । अनुहोड । अनुसंवरण। अनुसंवत्सर । अङ्गारवेणु । असिहत्य । वध्योग । पुष्करसत् । अनुहरत् । कुरुकत। कुरुपञ्चाल । उदकशुद्ध। इहलोक । परलोक । सर्वलोक । सर्वपुरुष । सर्वभूमि । प्रयोग। परस्त्री ॥ राजपुरुषात् ष्यञि ॥ सूत्रनड । अनुशतिकादिः ॥

३४१७. देवताद्वन्द्वे च ॥ २१ ॥

देवताद्वन्द्वे च पूर्वपदस्योत्तरपदस्य चाचामादेरचः स्थाने वृद्धिर्भवति तद्धिते ञिति णिति किति च परतः । आग्निमारुतीमनड्वाहीमालभेत । आग्निमारुतं कर्म्म। यो

देवताद्वन्द्वः सूक्तहविःसम्बन्धी तत्रायं विधिः । इह तु न भवति-स्कन्दविशाखौ देवते अस्य स्कान्दविशाखः। ब्रह्मप्रजापती-ब्राह्मप्रजापत्यम् ॥

३४१८. नेन्द्रस्य परस्य ॥ २२ ॥

इन्द्रशब्दस्य परस्य यदुक्तं तन्न भवति । सौमेन्द्रः । आग्नेन्द्रः । परस्येति किम्? ऐन्द्राग्नमेकादशकपालं चरुं निर्वपेत् । इन्द्रशब्दे द्वावचौ-तत्र तद्धिते एकस्य यस्येति लोपोऽपरस्य पूर्वेण सहैकादेश इत्यप्राप्तिरेव वृद्धेः , तदेदं प्रतिषेधवचनं ज्ञापकम्-बहिरङ्गमपि पूर्वोत्तरपदयोः पूर्वं कार्यं भवति पश्चादेकादेश इति तेन पूर्वैषुकामशम इत्यादि सिद्धं भवति ॥

३४१८. दीर्घाच्च वरुणस्य ॥ २३ ॥

दीर्घादुत्तरस्य वरुणस्य यदुक्तं तन्न भवति । ऐन्द्रावरुणम् । मैत्रावरुणम् । दीर्घादिति किम्? आग्निवारुणीमनड्वाहीमालभेत । अग्नेरीदग्नेः सोमवरुणयोरित्यस्यानङपवादस्य इद्वृद्धाविति प्रतिषेधो विधीयते । तेन दीर्घात् परो न भवति ॥

३४१९. प्राचां नगरान्ते ॥ २४ ॥

प्राचां देशे नगरान्तेऽङ्गे पूर्वपदस्योत्तरपदस्याचामादेरचो वृद्धिर्भवति तद्धिते ञिति णिति किति च परतः । सुहृननगरे भवः सौहृननागरः । पौण्ड्रनागरः । प्राचामिति किम्? मद्रनगरमुदक्षु, तत्र भवः - माद्रनगरः ॥

३४२०. जङ्गलधेनुवलजान्तस्य विभाषितमुत्तरम् ॥ २५ ॥

जङ्गल धेनु वलज इत्येवमन्तस्याङ्गस्य पूर्वपदस्याचामादेरचो वृद्धिर्भवति, विभाषितमुत्तरमुत्तरपदस्य विभाषितं तद्धिते ञिति णिति किति च परतः । कुरुजङ्गलेषु भवं कौरुजङ्गलम् । कौरुजाङ्गलम् । वैश्वधेनवम् । वैश्वधैनवम् । सौवर्णवलजः । सौवर्णवालजः ॥

३४२१. अर्द्धात् परिमाणस्य पूर्वस्य तु वा ॥ २६ ॥

अर्द्धशब्दात् परस्य परिमाणवाचिन उत्तरस्याचामादेरचः स्थाने वृद्धिर्भवति पूर्वस्य तु वा भवति तद्धिते ञिति णिति किति च परतः । अर्द्धद्रोणेन क्रीतमर्द्धद्रौणिकम् । आद्धंद्रौणिकम् । अर्द्धकौडविकमार्द्धकौडविकम् । परिमाणस्येति किम्? अर्द्धक्रोशः प्रयोजनमस्यार्द्धक्रोशिकम् ॥

३४२२. नातः परस्य ॥ २७ ॥

अर्धात् परस्य परिमाणाकारस्य वृद्धिर्न भवति पूर्वस्य तु वा भवति तद्धिते ञिति णिति किति च परतः । अर्द्धप्रस्थिकः । आर्द्धप्रस्थिकः । अर्द्धकंसिकः । आर्द्धकंसिकः । अत इति किम्? आर्द्धकौडविकः । तपरकरणं किम्? इह मा भूत्-अर्द्धखार्यां भवा अर्द्धखारी । किं च स्यात्? अर्द्धखारी भार्या यस्य अर्द्धखारीभार्यः । वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकार इति पुंवद्भावप्रतिषेधो न स्यात्, यत्र हि तद्धिते वृद्धिः प्रतिषिध्यते स वृद्धिनिमित्तं न भवतीति पुंवद्भावो न प्रतिषिध्यते । यथा-वैयाकरणी भार्या यस्य स वैयाकरणभार्य इति ॥

३४२३. प्रवाहणस्य ढे ॥ २८ ॥

प्रवाहणस्य ढे परत उत्तरपदस्याचामादेरचो वृद्धिर्भवति पूर्वपदस्य वा भवति। प्रवाहणस्यापत्यं प्रावाहणेयः । प्रवाहणेयः । शुभ्रादिभ्यश्चेति ढक् प्रत्ययः ॥

३४२४. तत्प्रत्ययस्य च ॥ २९ ॥

ढक्प्रत्ययान्तस्य प्रवाहणशब्दस्य तद्धितेषु परत उत्तरपदस्याचामादेरचो वृद्धिर्भवति, पूर्वस्य तु वा । प्रवाहणेयस्यापत्यं प्रावाहणेयिः । प्रवाहणेयिः । प्रावाहणेयकम् । प्रवाहणेयकम् । बाह्यतद्धितनिमित्ता वृद्धिर्ढाश्रयेण विकल्पेन बाधितुमशक्येति सूत्रारम्भः ॥

३४२५. नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम् ॥ ३० ॥

नञ उत्तरेषां शुचि ईश्वर कुशल निपुण इत्येतेषामचामादेरचो वृद्धिर्भवति पूर्वपदस्य वा भवति, तद्धिते ञिति णिति च परतः । शुचि-आशौचम् । अशौचम् । ईश्वर-आनैश्वर्यमनैश्वर्यम्। क्षेत्रज्ञ-आक्षैत्रज्ञ्यम् । अक्षैत्रज्ञ्यम् । कुशल-आकौशलम्। अकौशलम् । निपुण-आनैपुणमनैपुणम्। अत्र केचिदाहुरियं पूर्वपदस्य वृद्धिरप्राप्तैव विभाषा विधीयते । न नञ्पूर्वात्तत्पुरुषादित्युत्तरो भावप्रत्ययः प्रतिषिध्यते । तत्र शुच्यादिभ्य एव प्रत्यये कृते पश्चान्नञ्ममासे सति वृद्धिरनङ्गस्यापि वचनाद्भवतीति। तदपरे न मृष्यन्ते । भाववचनादन्योऽपि हि तद्धितो वृद्धिनिमित्तमपत्यादिष्वर्थेषु नञ्समासादेव विद्यते । बहुव्रीहेश्च नञ्समासाद्भाववचनोऽप्यस्ति । तत्राङ्गाधिकारोपमर्द्दनं न युज्यत इति । अक्षेत्रज्ञानीश्वरौ तत्पुरुषावेव ब्राह्मणादिषु पठ्येते । ततस्ताभ्यां भावे ष्यञ् भवति ॥

३४२६. यथातथयथापुरयोः पर्यायेण ॥ ३१ ॥

यथातथ यथापुर इत्येतयोर्नञ उत्तरयोः पर्यायेणाचामादेरचो वृद्धिर्भवति तद्धिते ञिति णिति किति च परतः । आयथातथ्यम् । अयाथातथ्यम् । आयथापुर्यम् । अयाथापुर्यम् । अयथातथ, अयथापुरेति ब्राह्मणादिषु नञ्समासावेतौ द्रष्टव्यौ । सूत्रे यथातथयथापुरशब्दौ तु यथाऽसादृश्य इति अव्ययीभावसमासौ, तथा नपुंसकाश्रयं ह्रस्वत्वं कृतम् । भाष्ये तु यथा दर्शितम् अयथातथा भाव इति तथा सुप्सुपेति समासो लक्ष्यते । अस्मिंस्तु पक्षे सौत्रत्वाद्दीर्घस्य स्थाने ह्रस्वः ॥

३४२७. हनस्तोऽचिण्णलोः ॥ ३२ ॥

तद्धितेष्विति निवृत्तम् । तत्सम्बद्धं कितीत्यपि । ञ्णितीति वर्त्तते । हनस्तकारादेशो भवति ञ्णिति प्रत्यये परतः, चिण्णलौ वर्जयित्वा । घातयति । घातकः । साधुघाती । घातंघातम् । घातो वर्त्तते । अचिण्णलोरिति किम्? अघानि । जघान । धातोः कार्यमुच्यमानं धातोः प्रत्यये विज्ञायते । इह न भवति - वार्त्रघ्नमितरदिति ॥

३४२८. आतो युक्चिण्कृतोः ॥ ३३ ॥

आकारान्तस्याङ्गस्य चिणि कृति ञ्णिति युगागमो भवति । अदायि । अधायि । कृति-दायः, दायकः । धायः, धायकः । चिण्कृतोरिति किम्? ददौ । दधौ । चौडिः, बालाकिः । बाह्वादित्वादिञ् । ज्ञा देवता अस्य ज्ञः ॥

३४२९. नोदात्तोपदेशस्य मान्तस्यानाचमेः ॥ ३४ ॥

उदात्तोपदेशस्य मान्तस्याङ्गस्याचमिवर्जितस्य चिणि कृति च ञ्णिति यदुक्तम् तन्न भवति । किं चोक्तम्? अत उपधाया इति वृद्धिः । अशमि । अतमि । अदमि । कृति खल्वपि - शमकः । तमकः । दमकः । शमस्तमो दमः । उदात्तोपदेशस्येति किम्? यामकः, रामकः । कथमुद्यमोपरमौ? अड उद्यमे, यम उपरमे इति निपातनादनुगन्तव्यौ । उपदेशग्रहणं किम्? शमी दमी तमीत्यत्र यथा स्यादिह मा भूत्-यामकः, रामक इति । मान्तस्येति किम्? चारकः, पाठकः । अनाचमेरिति किम्? आचामकः । अनाचमिकमिवमीनामिति व्यक्तव्यम् । आचामः । वामः । कामः । आचामः । आम इति चौरादिकस्य णिचि वृद्धौ सत्यां भवति । तत्र हि मित्त्वं नास्ति-नान्ये मितोऽहेताविति । सूर्यविश्रामा भूमिरित्येवमादिकं प्रयोगमन्याय्यमेव मन्यन्ते । चिण्कृतोरित्येव - शशाम, ततान ॥

३४३०. जनिवध्योश्च ॥ ३५ ॥

जनि वधि इत्येतयोश्चिणि कृति च त्रिणिति यदुक्तं तन्न भवति । अजनि । जनकः । प्रजनः । अवधि । वधकः । वधः । वधिः प्रकृत्यन्तरं व्यञ्जनान्तोऽस्ति, तस्यायं प्रतिषेधो विधीयते 'भक्षकश्चेन्न विद्येत वधकोऽपि न विद्यते' इति हि प्रयोगो दृश्यते । वधादेशस्यादन्तत्वादेव वृद्धेरभावः । चिण्कृतोरित्येव - जजान गर्भं महिमानमिन्द्रम् ॥

३४३१. अर्त्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ ॥ ३६ ॥

सर्व निवृत्तमङ्गस्येति वर्त्तते । अर्त्ति ह्री व्ली री क्नूयी क्ष्मायी इत्येतेषामङ्गानामाकारान्तानां च पुगागमो भवति णौ परतः । अर्त्ति-अर्पयति । ह्री-ह्रेपयति । व्ली-व्लेपयति । री-रेपयति । क्नूयी-क्नोपयति । क्ष्मायी-क्ष्मापयति । आकारान्तानाम् - दापयति । भापयति । अर्त्तीति ऋ गतिप्रापणयोः, ऋ गताविति द्वयोरपि धात्वोर्ग्रहणम् । रीत्यपि री गतिरेषणयो रीङ् श्रवण इति । पुकः पूर्वान्तकरणमदीदपदित्यत्रोपधाहस्वो यथा स्यादिति ॥

३४३२. शाच्छासाह्वाव्यावेपां युक् ॥ ३७ ॥

शा छा सा ह्वा व्या वे पा इत्येतेषामङ्गानां युगागमो भवति णौ परतः । शा-निशाययति। छा-अवच्छाययति । सा- अवसाययति । ह्वा-ह्वाययति । व्या-संव्याययति । वे-वाययति । पा-पाययति । पा ग्रहणे, पै ओवै शोषण इत्यस्यापीह ग्रहणमिच्छान्ति । पा रक्षण इत्यस्य लुग्विकरणत्वान्न भवति । लुगागमस्तु तस्य वक्तव्यः । पालयति । धूञ् प्रीञोर्नुग्वक्तव्यः धूनयति । प्रीणयति । एते पूर्वान्ता एव क्रियन्ते । तेन न्यशीशयत्, अपीपलत्, अदूधुनत्, अपिप्रिणत् इत्युपधाह्रस्वत्वं भवति । शाच्छासाह्वाव्यावेपां कृतात्वानां ग्रहणं पुकः प्राप्तिमाख्यातुम् । किमेतस्याख्याने प्रयोजनम्? एतस्मिन् प्रकरणे लक्षणप्रतिपदोक्तपरिभाषा नासीत्युपदिश्यते । तेनाध्यापयति, जापयतीत्येवमादि सिद्धं भवति ॥

३४३३. वो विधूनने जुक् ॥ ३८ ॥

वा इत्येतस्य विधूननेऽर्थे वर्त्तमानस्य जुगागमो भवति णौ परतः । पक्षेणोपवाजयति । विधूनन इति किम्? आवापयति केशान् । किमर्थं सूत्रम्, वज गताविति ण्यन्तस्य सिद्धत्वात्? वातेः पुक् मा भूदित्येवमर्थम् । पै ओवै शोषणे इत्यस्यैतद्रूपम् ॥

३४३४. लीलोर्नुग्लुकावन्यतरस्यां स्नेहविपातने ॥ ३९ ॥

ली ला इत्येतयोरङ्गयोरन्यतरस्यां नुक् लुक् इत्येतावागमौ भवतो णौ परतः स्नेहविपातनेऽर्थे । घृतं विलाययति । विलीनयति घृत विलालयति । विलापयति। ली ई इतीकारः प्रश्लिष्यते, तत ईकारान्तस्यैव नुग्भवति, न तु कृतात्वस्य, विभाषा लीयतेरिति । स्नेहनिपातन इति किम्? जतु विलापयति । जटाभिरालापयते। ली इति लीलीडोर्ग्रहणम् । ला इति लातेः, कृतात्वस्य च लीयते ॥

३४३५. भियो हेतुभये षुक् ॥ ४० ॥

भी इत्येतस्य हेतुभयेऽर्थे षुगागमो भवति णौ परतः । मुण्डो भीषयते । जटिलो भीषयते। अत्रापि भी ई इतीकारप्रश्लेषः कृतात्वस्य षुग्निवृत्त्यर्थः । मुण्डो भापयते इत्येवं हि तत्र भवति । हेतुभय इति किम्? कुञ्चिकयैनं भाययति। नात्र हेतुः प्रयोजको भयकारणम् । किं तर्हि? कुञ्चिका ॥

३४३६. स्फायो वः ॥ ४१ ॥

स्फाय् इत्येतस्याङ्गस्य यकारादेशो भवति णौ परतः । स्फावयति ॥

३४३७. शदेरगतौ तः ॥ ४२ ॥

शदेरङ्गस्यागतावर्थे वर्त्तमानस्य तकारादेशो भवति णौ परतः । पुष्पाणि शातयति । अगताविति किम्? गाः शादयति गोपालकः ॥

३४३८. रुहः पोऽन्यरस्याम् ॥ ४३ ॥

रुहेरङ्गस्यान्तरस्यां पकारादेशो भवति णौ परतः । व्रीहिन् रोपयति । व्रीहीन् रोहयति ॥

३४३९. प्रत्ययस्थात् कात् पूर्वस्यात इदाप्यसुपः ॥ ४४ ॥

प्रत्ययस्थात् ककारात् पूर्वस्याकारस्य इकारादेशो भवति आपि परतः स चेदाप्सुपः परो न भवति । जटिलिका । मुण्डिका । कारिका । हारिका । एतिकाश्चरन्ति। प्रत्ययग्रहणं किम्? शक्नोतीति शका । स्थग्रहणं विस्पष्टार्थम् । ककारमात्रं प्रत्ययो नाऽस्तीति सामर्थ्यात् प्रत्ययस्थस्य ग्रहणं शक्यते विज्ञातुम् । कादिति किम्? नन्दना । रमणा । पूर्वस्येति किम्? पटुका । मृदुका । अत इति किम्? गोका । नौका । तपरकरणं किम्? राका । धाका । आपीति किम्? कारकः, धारकः। अथापीत्यनेन किं विशिष्यते? ककारः । यद्येवं

कारिकेत्यत्रापि न प्राप्नोति अकारेण व्यवहितत्वात्? एकादेशे कृते नास्ति व्यवधानम् । एकादेशः पूर्वविधौ स्थानिवद्भवतीति व्यवधानमेव । वचनाद् व्यवधानमीदृशं यत्स्थानिवद्भावकृतमेकेन वर्णेन तदाश्रीयते । रथकट्यादिषु तु श्रुतिकृतमनेकेन वर्णेन व्यवधानमिति इत्त्वं न भवति । असुप इति किम्? बहवः परिव्राजका अस्यां मथुरायां बहुपरिव्राजका मथुरा । सुबन्तादयं परिव्राजकशब्दात्पर आबिति प्रतिषेधो भवति । प्रसज्यप्रतिषेधश्चावं न पर्युदासः । पर्युदासे हि सति समुदायादसुबन्तात् पर आबितीत्त्वमत्र स्यादेव । अविद्यमानः सुप् यस्मिन् सोऽयमसुबित्येवमपि नाश्रीयते। तथा हि सति बहुचर्मिकेत्यत्रापि न स्यात् । मामकनरकयोरुपसंख्यानं कर्त्तव्यमप्रत्ययस्थत्वात् । मम इयं नरिका । मदिका । अणि ममकादेशः । केवलमामकेति नियमात् संज्ञाछन्दसोरीकारो नास्त्यत्र। तेनाण्प्रत्ययान्तादपि टाप् भवति । नरान् कायतीति नरिका । आतोऽनुपसर्गे क इति कः प्रत्ययः । प्रत्ययनिषेधे त्यक्त्यपोश्चोपसंख्यानम्। उदीचामातः स्थाने यकपूर्वाया इति विकल्पो मा भूदिति, दाक्षिणात्यिका । इहत्यिका॥

३४४०. न यासयोः ॥ ४५ ॥

या सा इत्येतयोरिकारादेशो न भवति । यका । सका । यासा इति निर्द्देशो न तन्त्रं, यत्तदोरुपलक्षणमेतत् । इहापि प्रतिषेध इष्यते - यकांयकामधीमहे, तकांतकां पचामह इति । यत्तदोः प्रतिषेधे त्यकन उपसंख्यानम् । उपत्यका । अधित्यका । पावकादीनां छन्दस्युपसंख्यानम् । हिरण्यवर्णाः शुचयः पावकाः । यासु अलोमकाः। छन्दसीति किम्? पाविका । आशिषि चोपसंख्यानम् । जीवताद्-जीवका । नन्दतात्-नन्दका । भवतात्-भवका । उत्तरपदलोपे चोपसंख्यानम् । देवदत्तिका । देवका । यज्ञदत्तिका । यज्ञका । क्षिपकादीनां चोपसंख्यानम् । क्षिपका । ध्रुवका। तारका ज्योतिष्युपसंख्यानम् । तारका । ज्योतिषीति किम्? तारिका दासी । वर्णका तान्तव उपसंख्यानम् । वर्णका प्रावरणभेदः । तान्तव इति किम्? वर्णिका भागुरी लौकायते । वर्त्तका शकुनौ प्राचामुपसंख्यानम् । वर्तका शकुनिः । प्राचामन्यत्र उदीचां तु वर्त्तिका । शकुनाविति किम्? वर्त्तिका भागुरी लौकायतस्य । अष्टका पितृदैवत्ये । अष्टका । पितृदैवत्य इति किम्? अष्टिका खारी। वा सूतकापुत्त्रकावृन्दारकाणामुपसंख्यानम् । सूतिका । सूतका । पुत्त्रिका। पुत्त्रका । वृन्दारिका । वृन्दारका ॥

३४४१. उदीचामातः स्थाने यकपूर्वायाः ॥ ४६ ॥

उदीचामाचार्याणां मतेन यकारपूर्वायाः ककारपूर्वायाश्च आतः स्थाने योऽकारस्तस्यातः स्थाने इकारादेशो भवति । उदीचां ग्रहणं विकल्पार्थम् । इभ्यका। इभ्यिका । क्षत्त्रियका । क्षत्त्रियिका । ककारपूर्वायाः - चटकका । चटकिका । मूषिकका । मूषिकिका । आत इति किम्? सांकाश्ये भवा सांकाश्यिका । स्थानग्रहणमनुवादेऽपि स्थानसम्बन्धप्रतिपत्त्यर्थम् । आत इत्यनेन हयत इति विशिष्यते। यकपूर्वायाः इति किम्? अश्वा, अश्विका । यकपूर्वाया इति स्त्रीलिङ्गनिर्द्देशः, आतः स्त्रीप्रत्ययस्य प्रतिपत्त्यर्थम् । इह न भवति-शुभं यातीति शुभंयाः - शुभंयिका । भद्रं चातीति भद्रंयाः, भद्रंयिका । यकपूर्वत्वे धात्वन्तप्रतिषेधः । धात्वन्तयोर्यकारककारयोरस्य प्रतिषेधस्य प्रतिषेधो वक्तव्यः । शुनयिका । सुशयिका। सुपाकिका। सुशोकिका ॥

३४४२. भस्त्रैषाजाज्ञाद्वास्वानञ्पूर्वाणामपि ॥ ४७ ॥

एषामातः स्थाने योऽकारस्तस्य इत्वं न भवति उदीचामाचार्याणां मतेन । भस्त्राभस्त्रिका। भस्त्रका । अभस्त्रका । अभस्त्रिका । एषा । एषका । एषिका । अजा । अजका। अजिका । अनजका । अनजिका । ज्ञा । ज्ञका । ज्ञिका । अज्ञका । अज्ञिका । द्वा। द्वके । द्विके । स्वा। स्वका । स्विका । अस्वका । अस्विका । एषाद्वे नञ्पूर्वे न प्रयोजयतः। किं कारणम् ? तत्र हि सति यदि साकच्काभ्यां नञ्समासः, अथापि कृते नञ् समासे पश्चादकच्, उभयथापि समासाद् या विभक्तिरुत्पद्यते तस्यां त्यदाद्यत्वे सति टापा भवितव्यं, सोऽन्तेर्वर्त्तिन्या विभक्त्या सुबन्तात्पर इति इत्वस्य प्राप्तिरेव नास्ति। तेन अनेषका, अद्वके इत्येव नित्यं भवितव्यम् । रवशब्दस्तु ज्ञातिधनाख्यायां नञ्पूर्वोऽपि प्रयोजयति । भस्त्रेत्ययमभाषितपुंस्कस्तस्याभाषितपुंस्काच्चेत्येव सिद्धे यदिह ग्रहणं तदुपसर्जनार्थम् - अविद्यमाना भस्त्रा यस्या अभस्त्रा । साल्पा अभस्त्रका । अभस्त्रिका । अत्रोपसर्जनह्रस्वत्वे कृते पुनर्बहुव्रीहौ कृते भाषितपुंस्काद्यष्टाबुत्पद्यते तस्य केऽण इति यो ह्रस्वो नासावभाषितपुंस्काद्विहितस्यातः स्थाने भवति । नञ्पूर्वाणामपीत्यपिशब्दादन्यपूर्वाणां केवलानां च विधिरयमिष्यते । निर्भस्त्रका । निर्भस्त्रिका । बहुभस्त्रका । बहुभस्त्रिका- इत्येवमनयोरपीष्यते । तत्र नञ्पूर्वाणामिति वचनमनुवाद एव नमन्दबुद्धिप्रतिपत्त्यर्थः ॥

३४४३. अभाषितपुंस्काच्च ॥ ४८ ॥

अभाषितपुंस्काद्विहितस्यातः स्याने योऽकारस्तस्योदीचामाचार्याणां मतेन इकारादेशो न भवति । खट्विका । खट्वका । अखट्विका । अखट्वका । परमखट्विका । परमखट्वका ।

बहुव्रीहौ यदा कपि ह्रस्वः क्रियते तदा भवितव्यमनेन विधिना । तत्राप्यभाषितपुंस्काद्विहितस्यातः स्थाने भवत्यकार इति । यदा तु अविद्यमाना खट्वा अस्याः अखट्वा, अल्पा अखट्वा अखट्विकेति, तदा न भवति । तथा अतिक्रान्ता खट्वामतिखट्वा, अल्पा अतिखट्वा अतिखट्विका ॥

३४४४. आदाचार्याणाम् ॥ ४९ ॥

अभाषितपुंस्कादातः स्याने योऽकारस्तस्याचार्याणामाकारादेशो भवति । खट्वाका । अखट्वाका । परमखट्वाका ॥

३४४५. ठस्येकः ॥ ५० ॥

अङ्गस्य निमित्तं यष्ठः, कश्चाङ्गस्य निमित्तम् ? प्रत्ययः, तस्य प्रत्ययठस्य इक इत्ययमादेशो भवति । प्राग्वहतेष्ठक् - आक्षिकः । शालाकिकः । लवणाट्ठञ् - लावणिकः । ठगादिषु वदि वर्णमात्रं प्रत्यय उच्चारणार्थोऽकारस्तदा इहाप्यकार उच्चारणार्थः । वर्णमात्रं तु स्थानित्वेनोपादीयते । संघाते तु प्रत्ययेऽत्रापि संघातग्रहणमेव। तत्र कणेष्ठः, कण्ठ इत्येवमादीनामुणादयो बहुलमिति न भवति । मथितं पण्यमस्य माथितिक इत्यत्र तु यस्येतिलोपे कृते इसुसुक्तान्तात्क इति स्थानिवद्भावादिकस्य कादेशः प्राप्नोति, सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न भवति । यस्येत्यकारलोपस्य स्थानिवद्भावाद्वा, पूर्वस्मादपि हि विधौ स्थानिवद्भावः ॥

३४४६. इसुसुक्तान्तात् कः ॥ ५१ ॥

इस् उस् इत्येवमन्तानामुगन्तानां तान्तानां चाङ्गानामुत्तरस्य ठस्य क इत्ययमादेशो भवति । इस्-सार्पिष्कः । उस्-धानुष्कः । याजुष्कः । उक्-नैषादकर्षुकः । शाबरजम्बुकः । मातृकम् । पैतृकम् । तान्तात्-औदश्वित्कः । शाकृत्कः । याकृत्कः। इसुसोः प्रतिपदोक्तयोर्ग्रहणादिह न भवति - आशिषा चरति-आशिषिकः । उषा चरति औषिकः । दोष उपसंख्यानाम् । दोभ्र्यां चरति दौष्कः ॥

३४४७. चजोः कु घिण्ण्यतोः ॥ ५२ ॥

चकारजकारयोः कवर्गादेशो भवति घिति ण्यति च प्रत्यये परतः । घिति-पाकः, त्यागः, रागः । ण्यति - पाक्यम् । वाक्यम् । रेक्यम् ॥

३४४८. न्यङ्क्वादीनां च ॥ ५३ ॥

न्यङ्कु इत्येवमादीनां कवर्गादेशो भवति । न्यङ्कुः । नावञ्चतेरिति उप्रत्ययः । मद्गुः। मिमस्जिभ्य उरिति मस्जेरुप्रत्ययः । भृगुः । प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्चेत्युप्रत्ययः । दूरेपाकः । फलेपाकः । दूरे पच्यते स्वयमेव । फले पच्यते स्वयमेव । पचाद्यच्, निपातनाद्वृद्धिः। तत्पुरुषे कृति बहुलमिति सप्तम्या अलुक् । अक्षेपाक इत्यपि हि केचित् पठन्ति । दूरेपाका, फलेपाका इति टाबन्तमपरेऽधीयते । उकारान्तावपरे-दूरेपाकुः, फलेपाकुरिति। एषामुप्रत्ययो निपातनादेव । तक्रम्, वक्रमिति- तञ्चतेर्वञ्चतेश्च स्फायितञ्चिवञ्चीत्यादिना सूत्रेण रक् । व्यतिषङ्गः । व्यतिषजतीति पचाद्यच् । अनुषङ्गः । अवसर्गः । उपसर्गः । मेघः। श्वपाकः । मांसपाकः । कपोतपाकः । उलूकपाक इति कर्म्मोपपदादण्प्रत्ययः । संज्ञायामर्घः। अवदाघः । निदाघः । अर्हतेर्घञ्-अर्घः । अवपूर्वस्य निपूर्वस्य च दहेरवदाघः । निदाघः । संज्ञाया अन्यत्र अर्हः । अवदाहः । निदाहः । न्यग्रोधक्पू । वीरुदित्यत्र न्यस्यर्वः रुहेः पचाद्यचि विपूर्वस्य क्विपि धकारो विधीयते । न्यग्रोहयतीति न्यग्रोधः। विरोहयतीति वीरुत् ॥

३४४९. हो हन्तेञ्णिन्नेषु ॥ ५४ ॥

हन्तेर्हकारस्य कवर्गादेशो भवति ञिति णिति प्रत्यये परतो नकारे च । घातयति । घातकः । साधुघाती । धातंघातम् । घातो वर्त्तते । नकारे - घ्नन्ति । घ्नन्तु । अघ्नन् । ह इति किम्? अलोन्त्यस्य माभूत् । हन्तेरिति किम्? प्रहारः । प्रहारकः । ञ्णित्प्रत्ययो हन्तेर्विशेषणाम् । नकारो हकारस्य । नकारे अनन्तरस्य हन्तिहकारस्येति । तच्चानन्तर्यं श्रुतिकृतं संन्निपातकृतमाश्रीयते । स्थानिवद्भावशास्त्रकृतं तु यदनानन्तर्यं तदविघातकं वचनसामर्थ्यात् । यद्यापि सर्वैरेव ञ्णिन्नैर्हन्तिहकारो विशिष्यते तथापि येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यादिति ञ्णिति धात्ववयवेन व्यवहितेऽपि सति भवति । इह तु न भवति - हननमिच्छति हननीयति, हननीयतेर्ण्वुल् - हननीयक इति ॥

३४५०. अभ्यासाच्च ॥ ५५ ॥

अभ्यासादुत्तरस्य हन्तिहकारस्य कवर्गादेशो भवति । जिघांसति । जंघन्यते। अहं जघन। अभ्यासनिमित्ते प्रत्यये हन्तेरङ्गस्य योऽभ्यासस्तस्मादेवैतत्कुत्वम् । इह न भवति - हननीयितुम्मिच्छति जिहननीयिषति ॥

३४५१. हेरचङि ॥ ५६ ॥

हिनोतेर्हकारस्याभ्यासादुत्तरस्य कवर्गादेशो भवति अचङि । प्रजिघीषति । प्रजेघीयते । प्रजिघाय । अचङीति किम्? प्राजीहयद् दूतम् । अचङीति शक्यमकर्त्तुम् । कथम्? चङचभ्यासनिमित्ते णौ हिनोतिरङ्गं भवति । तत्राभ्यासनिमित्ते प्रत्यये हेरङ्गस्येति विज्ञायमाने प्राप्तिरेव नास्ति? तर्हि तज्ज्ञापकार्थम् । एतज्ज्ञाप्यते- हेरचङीति चङोऽन्यत्र हेर्ण्यधिकस्यापि कुत्वं भवतीति । तेन प्रजिघाययिषतीति सिद्धं भवति ॥

३४५२. सन्लिटोर्जेः ॥ ५७ ॥

सनि लिटि च प्रत्यये जेरङ्गस्य योऽभ्यासस्तस्मादुत्तरस्य कवर्गादेशो भवति। जिगीषति। जिगाय । सन्लिटोरिति किम्? जेजीयते । जिनातेः संप्रसरणे कृते यद्यपि जिर्भवति तथापि लाक्षणिकत्वात्तस्य ग्रहणं न भवति - जिज्यतुः, जिज्युः, इत्येव भवति ॥

३४५३. विभाषा चेः ॥ ५८ ॥

चिनोतेरङ्गस्य सन्लिटोरभ्यासादुत्तरस्य विभाषा कवर्गादेशो भवति । चिचीषति। चिकीषति चिकाय । चिचाय । सन्लिटोरित्येव-चेचीयते ॥

३४५४. न क्वादेः ॥ ५९ ॥

कवर्गादेर्धातोश्चजोः कवर्गादेशो न भवति । कूजो वर्त्तते । खर्जः । गर्जः । कूज्यं भवता। खर्ज्यं गर्ज्यं भवता ॥

३४५५. अजिव्रज्योश्च ॥ ६० ॥

अजि व्रजि इत्येतयोश्च कवर्गादेशो न भवति । समाजः । उदाजः । व्रजि-परिव्राजः । परिज्यम् । अजेस्तु अजेर्व्यघञपोरिति वीभावस्य विधानाण्ण्यति नास्त्युदाहरणम् ॥

३४५६. भुजन्युब्जौ पाण्युपतापयोः ॥ ६१ ॥

भुज न्युब्ज इत्येतौ शब्दौ निपात्येते पाणावुपतापे च । भुज्यतेनेनेति भुजः पाणिः । हलश्चेति घञ् । तत्र कुत्वाभावो गुणाभावश्च निपात्यते । उब्ज आर्जवे, न्युब्जिताः शेरतेस्मिन्निति न्युब्जः । उपतापो रोगस्तथैव घञि कुत्वाभावो निपात्यते। पाण्युपतापयोरिति किम्? भोगः । समुद्गः ॥

३४५७. प्रयाजानुयाजौ यज्ञाङ्गे ॥ ६२ ॥

प्रयाज अनुयाज इत्येतौ निपात्येते यज्ञाङ्गे । पञ्च प्रयाजाः ॥ पञ्चानुयाजाः । त्वमग्ने प्रयाजानां पश्चात् त्वं पुरस्तात् । यज्ञाङ्ग इति किम्? प्रयागः, अनुयागः । प्रयाजानुयाजग्रहणं प्रदर्शनार्थमन्यत्राप्येवंप्रकारे कुत्वं न भवति - एकादशोपयाजाः । उपांशुयाजमन्तरा यजति । अष्टौ पत्नीसंयाजा भवन्ति । ऋतुयाजैश्चरन्ति इत्येवमादि सिद्धं भवति ॥

३४५८. वञ्चेर्गतौ ॥ ६३ ॥

वञ्चेरङ्गस्य गतौ वर्त्तमानस्य कवर्गादेशो न भवति । वञ्च्यं वञ्चन्ति वणिजः । गताविति किम्? वङ्क्य काष्ठम् । कुटिलमित्यर्थः ॥

३४५९. ओक उचः के ॥ ६४ ॥

उदेर्द्धातोः के प्रत्यये ओक इति निपात्यते । किं पुनरत्र निपात्यते ? कुत्वं गुणश्च । न्योकः शकुन्तः । न्योको वृक्षः । कर्त्तरि इगुपधलक्षणः कः प्रत्ययः । अधिकरणादौ तु कारकान्तरे घञर्थे कविधानमिति । किमर्थ पुनरयं घञ्येव न व्युत्पाद्यते? स्वरार्थमन्तोदात्तोऽयमिष्यते, घञि सत्याद्युदात्तः स्यात् । दिवौकसः, जलौकसः इत्येवमादावप्यसुनि प्रत्यये उणादयो बहुलमिति कुत्वं द्रष्टव्यम् ॥

३४६०. ण्य आवश्यके ॥ ६५ ॥

ण्ये परत आवश्यकेऽर्थे कवर्गो न भवति । अवश्यपाच्यम् । अवश्यवाच्यम्। अवश्यरेच्यम् । आवश्यक इति किम्? पाक्यम्, वाक्यम्, रेक्यम् ॥

३४६१. यजयाचरुचप्रवचर्चश्च ॥ ६६ ॥

यज याच रुच प्रवच ऋच इत्येतेषाम् ण्ये परतः कवर्गादेशो न भवति । यज-याज्यम् । याच-याच्यम् । रुच-रोच्यम् । प्रवच-प्रवाच्यम् । ऋच-अर्च्यम्। ऋदुपधादपि ऋचेरत एव निपातनाण्ण्यङ्भवति । प्रवचग्रहणं शब्दसंज्ञार्थम् - प्रवाच्यो नाम पाठविशेषोपलक्षितो ग्रन्थोऽस्ति। अपरे पुनराहुरुपसर्गपूर्वस्य नियमार्थम् । प्रपूर्वस्यैव वचेरशब्दसंज्ञायां कुत्वप्रतिषेधो यथा स्यात् । अन्योपसर्गपूर्वस्य मा भूदिति । अविवाक्यमहरिति पठन्ति । एतत्तु विशेष एवेष्यते-दशरात्रस्य यद्दशममहः। अन्यत्राविवाच्यमेव भवति । ण्यति प्रतिषेधे त्यजेरुपसंख्यानम्। त्याज्यम् ॥

३४६२. वचोऽशब्दसंज्ञायाम् ॥ ६७ ॥

वचोऽशब्दसंज्ञायां ण्यति परतः कवर्गो न भवति । वाच्यमाह । अवाच्यमाह । अशब्दसंज्ञायामिति किम्? अवघुषितं वाक्यमाह ॥

३४६३. प्रयोज्यनियोज्यौ शक्यार्थे ॥ ६८ ॥

प्रयोज्य नियोज्य इत्येतौ शब्दौ शक्यार्थे निपात्येते । शक्यः प्रयोक्तु प्रयोज्यः । शक्यो नियोक्तुं नियोज्यः । शक्यार्थ इति किम्? प्रयोग्यः, नियोग्यः ॥

३४६५. भोज्यं भक्ष्ये ॥ ६९ ॥

भोज्यं निपात्यते भक्ष्येऽभिधेये । भोज्य ओदनः । भोज्या यवागूः । इह भक्ष्यमभ्यवहार्यमात्रम् । भक्ष्य इति किम्? भोग्यः कम्बलः ॥

३४६६. घोर्लोपो लेटि वा ॥ ७० ॥

घुसंज्ञाकानां लेटि परतो वा लोपो भवति । दधद्रत्नानि दाशुषे । सोमो ददद्गन्धर्वाय । न च भवति - यदग्निरग्नये ददात् । आडागमे सति लोपेऽपि ददादिति सिद्धं भवति, तत्र वावचनं विस्पष्टार्थम् । एशा हि कस्यचिदाशङ्गा स्याद्ददादित्येव नित्ये प्राप्ते लोप आरभ्यमाणो बाधत एवैतद्रूपमिति ॥

३४६७. ओतः श्यनि ॥ ७१ ॥

ओकारान्तस्याङ्गस्य श्यनि परतो लोपो भवति । शो-निश्यति । छो-अवच्छ्यति । दो-अवद्यति । सो-अवस्यति ।

३४६८. क्सस्याचि ॥ ७२ ॥

क्सस्याजादौ प्रत्यये लोपो भवति । अधुक्षाताम् । अधुक्षाथाम् । अधुक्षि । अचीति किम्? अधुक्षत् । अधुक्षताम् । ककारवत उपादानं किम्? इह मा भूत्-उत्सौ, उत्साः, वत्सौ, वत्साः ॥

३४६९. लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये ॥ ७३ ॥

दुह दिह लिह गुह इत्येतेषामात्मनेपदे दन्त्यादौ परतः क्सस्य वा लुग्भवति । अदुग्ध । अधुक्षत । अदुग्धाः । अधुक्षथाः । अधुग्ध्वम् । अधुक्षध्वम् । अदुह्वहि । अधुक्षावहि । दिहा-

अदिग्ध । अधिक्षत । लिह-अलीढ । अलिक्षत । गुह - न्यगूढ । न्यघुक्षत । दुहादीनामिति किम्? व्यत्यरुक्षत । आत्मनेपद इति किम्? अधुक्षत् । दन्त्य इति किम्? अधुक्षामहि । लोप इति वर्त्तमाने लुग्ग्रहणं सर्वादेशार्थं, तच्च वह्यर्थम् । अन्यत्र ह्यन्त्यस्यैव लोपे कृते झलो झलीति सकारलोपेन सिद्ध्यति। स्थानिवद्भावोऽपि अकारलोपस्य नास्ति । पूर्वत्रासिद्धे न स्थानिवदिति। दन्त्योष्ठ्योऽपि वकातो दन्त्य इति गृह्यते । यदि स न ग्रुह्येत ततस्तौग्रहणमेवात्र कृतं स्यात्॥

३४७०. शमामष्टानां दीर्घः श्यनि ॥ ७४ ॥

शमामष्टानां दीर्घो भवति श्यनि परतः । शम्-शाम्यति । तम् - ताम्यति । दम्-दाम्यति। भ्रम्-भ्राम्यति । क्षम् - क्षाम्यति । क्लम्-क्लाम्यति । मदी-माद्यति । अष्टानामिति किम्? अस्यति । श्यनीति किम्? भ्रमति । बभ्राम । वा भ्राशेति श्यनो विकल्पः ॥

३४७१. ष्ठिवुक्लम्याचमां शिति ॥ ७५ ॥

ष्ठिवु क्लमु आचम् इत्येतेषां दीर्घो भवति शिति परतः । ष्ठीवति । क्लमु-क्लामति । आचमु - आचामति । क्लमिग्रहणं शबर्थम् । चमेराङ्पूर्वस्य ग्रहणम्। इह मा मूत्-चमति, विचमति ॥

३४७२. क्रमः परस्मैपदेषु ॥ ७६ ॥

क्रमः परस्मैपदपरे शिति परतो दीर्घो भवति । क्रामति । क्रामतः । क्रामन्ति। परस्मैपदेष्विति किम्? आक्रमते आदित्यः । इह उत्क्राम संक्रामेति हेर्लुकि कृते न लुमताङ्गस्येति प्रत्ययलक्षणप्रतिषेधाद्दीर्घो न प्राप्नोति? नैष दोषः, लुमताशब्देन लुप्ते यदङ्गं तस्य कार्ये स प्रतिषेधः । न च हौ क्रमिरङ्गम्, किं तर्हि? शपि ॥

३४७३. इषुगमियमां छः ॥ ७७ ॥

इषु गमि यम इत्येतेषां शिति परतश्छकारादेशो भवति । इच्छति । गच्छति। यच्छति। इषेरुदितो ग्रहणम् । इह मा भूत्-इष्यति, इष्णातीति । ये इषिमुदितं नाधीयते तेऽचीत्यनुवर्त्तयन्ति । तत्र प्रधानमज्ग्रहणं शितीत्यनेन विशेष्यत इति वर्णयन्ति । तथा च सति तदादिविधिर्न भवति । यदस्मिन् विधिस्तदादावल्ग्रहण इत्येतदपि विशेषणेनैवेष्यते । तेन इषाणेत्यत्र छत्वं न भवति । नह्ययमजेव शिदिति॥

३४७४. पाघ्राध्मास्थाम्नादाण्दृश्यर्त्तिशर्त्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः ॥ ७८ ॥

पा घ्रा ध्मा स्था म्ना दाण् दृशि अर्ति सर्ति शद सद इत्येतेषां पिब जिघ्र धम तिष्ठ मन यच्छ पश्य ऋच्छ धौ सीय सीद इत्येते आदेशा भवन्ति शिति परतः । पा-पिवति । घ्रा-जिघ्रति । ध्मा-धमति । स्था-तिष्ठति । म्ना-मनति । दाण्-यच्छति । दृशि-पश्यति । अर्त्ति - ऋच्छति । सर्त्ति-धावति । शद्-शीयते । सद्-सीदति । पिवतेर्लघूपधगुणः प्राप्नोति, सोऽङ्गवृत्ते पुनर्वृत्ताववविधिर्निष्ठितस्येति न भवति । अथवा अकारान्तोऽयमादेश आद्युदात्तो निपात्यते । सर्तेर्वेगितायां गतौ धावादेशमिच्छन्ति । अन्यत्र सरति, अनुसरतीत्येव भवति ॥

३४७५. ज्ञाजनोर्जा ॥ ७९ ॥

ज्ञा जन इत्येतयोर्जादेशो भवति शिति परतः । जानाति । जायते । जनेर्दैवादिकस्य ग्रहणम् ।

३४७६. प्वादीनां ह्रस्वः ॥ ८० ॥

पू इत्येवमादीनां ह्रस्वो भवति शिति परतः । प्वादयः क्र्यादिषु पठ्यन्ते । पूञ् पवने इत्यतः प्रभृति व्ली गतौ वृदिति यावत्केचिदिच्छन्ति, वृत्करणमेतल्ल्वादीनां प्वादीनां च परिसमाप्त्यर्थमिति । अपरे तु ल्वादीनामेव परिसमाप्त्यर्थं वृत्करणमेतदिच्छन्ति । आगणान्ताः प्वादय इति । पूञ्-पुनाति । पुनाति । लूञ्-लुनाति । स्तॄञ् - स्तृणाति । येषामागणान्ताः प्वदयस्तेषां जानातीत्यत्रापि ह्रस्वः प्राप्नोति । ज्ञाजनोर्जा इति दीर्घकरणसामर्थ्यन्न भवति । जनेरपि हि ज आदेशे सति अतो दीर्घो यञीति दीर्घत्वेन जायत इति सिद्ध्यति ॥

३४७७.मीनातेर्निगमे ॥ ८१ ॥

मीनातेरङ्गस्य शिति प्रत्यये परतो ह्रस्वो भवति निगमविषये । प्रमिणन्ति व्रतानि । वहेनुमीनेति णत्वम् । निगम इति किम्? प्रमीणाति ॥

३४७८. मिदेर्गुणः ॥ ८२ ॥

मिदेरङ्गस्येको गुणो भवति शिति प्रत्यये परतः । मेद्यति । मेद्यतः । मेद्यन्ति । शितीत्येव - मिद्यते ॥

३४७९. जुसि च ॥ ८३ ॥

जुसि च प्रत्यये परत इगन्तस्याङ्गस्य गुणो भवति । अजुहवुः । अबिभयुः। अबिभरुः। अथ चिनुयुः, सुनुयुरियत्र कस्मान्न भवति? अत्र द्वे ङित्त्वे सार्वधातुकाश्रयं यासुडाश्रयं च । तत्र नाप्राप्ते सार्वधारुकाश्रयङित्त्वनिमित्ते प्रतिषेधे जुसि गुण आरभ्यमाणस्तमेव बाधते । यासुडाश्रयङित्त्वनिमित्तं तु न बाधते । तत्र हि प्राप्ते चाप्राप्ते चारभ्यत इति ॥

३४८०. सार्वधातुकार्धधातुकयोः ॥ ८४ ॥

सार्वधातुके आर्द्धधातुके च प्रत्यये परत इगन्तस्याङ्गस्य गुणो भवति । तरै । नयति । भवति । आर्द्धधातुके-कर्त्ता । चेता । स्तोता । सार्वधातुकार्धधातुकयोरिति किम्? अग्नित्त्वम्, अग्निकाम्यति । यदि हि प्रत्यये सङीति वोच्यते, इहापि स्यात् ॥

३४८१. जाग्रोऽविचिण्णल्ङित्सु ॥ ८५ ॥

जागृ इत्येतस्याङ्गस्य गुणो भवति अविचिण्णल्ङित्सु परतः । जागरयति । जागरकः । साधुजागरी । जागरंजागरम् । जागरो वर्त्तते । जागरितः । जागरितवान्। वृद्धिविषये प्रतिषेधविषये च यथा स्यादिति जागर्त्तेरयं गुण आरभ्यते । तस्मिन् कृते याऽत उपधाया वृद्धिः प्राप्नोति सा न भवति । यदि हि स्यादनर्थक एव गुणः स्याच्चिण्णलोश्च प्रतिषेधवचनमनर्थकम् । अविचिण्णल्ङित्स्विति किम् । जृशृस्तृजागृभ्यः क्विन्-जागृविः । चिण्-अजागारि । णल्-जजागार । ङित्-जागृतः । जागृथः । वीति केचिदिकारमुच्चारणार्थं वर्णयन्ति । क्वसावपि वकारादौ गुणो न भवति - जजागृवान् । अथ अजागरुः, अहं जजागर इत्यत्र प्रतिषेधः प्राप्नोति? नाप्रतिषेधात् । अविचिण्णल्ङित्स्विति पर्युदासोऽयम् । अथवा जाग्र इति प्राप्तिरसावानन्तर्याद् विचिण्णल्ङित्सु प्रतिषिध्यते । या तु जुसि च, सार्वधातुकार्द्धधातुकयोरिति च प्राप्तिः सा न प्रतिषिध्यते ॥

३४८२. पुगन्तलघूपधस्य च ॥ ८६ ॥

पुगन्तस्याङ्गस्य लघूपधस्य च सार्वधातुकार्द्धधातुकयोः गुणो भवति । पुगन्तस्य - व्लेपयति । ह्रेपयति । क्नोपयति । लघूपधस्य - भेदनम् । छेदनम् । भेत्ता । छेत्ता । प्रत्ययादेरङ्गावयवस्य च हलोरानन्तर्ये सति लघूपधगुणो न व्यावर्त्यते इति ज्ञापितमेतत् क्नुसनोः कित्करणेन । त्रसिगृधिधृषिक्षिपेः क्नुः । हलन्ताच्चेति ।

संयोगे गुरुसंज्ञायां गुणो भेत्तुर्न सिध्यति ।
विध्यपेक्षं लघोश्चासौ कथं कुण्डिर्न दुष्यति ॥

धातोर्नुमः कथं रञ्जेः स्यन्दिश्रन्थ्योर्निपातनात् ।
अनल्लोपशिदीर्घत्वे विध्यपेक्षे न सिध्यतः ॥
अभ्यस्तस्य यदाहाचि लङर्थं तत्कृतं भवेत् ।
क्नुसनोर्यत्कृतं कित्त्वं ज्ञापकं स्याल्लघोर्गुणे ॥

उपघात्र इगेव गृह्यते । ततो भिनत्तीति गुणो न भवति । अपरे पुकि अन्तः पुगन्तः, लघ्वी उपधा लघूपधा, पुगन्तश्च लघूपधा च पुगन्तलघूपधमिति सूत्रार्थं वर्णयन्ति ॥

३४८३. नाभ्यस्तस्याचि पिति सार्वधातुके ॥ ८७ ॥

अभ्यस्तसंज्ञकस्याङ्गस्य लघूपधस्याजादौ पिति सार्वधातुके गुणो न भवति। नेनिजानि। अनेनिजम् । परिवेविषाणि । पर्यवेविषम् । अभ्यस्तस्येति किम्? वेदानि । अचीति किम्? नेनेक्ति । पिद्ग्रहणमुत्तरार्थम् । सार्वधातुक इति किम्? निनेज । लघूपधस्येत्येव-जुहवानि, अजुहवम् । बहुलं छन्दसीति वक्तव्यम् । जुजोषदिति यथा स्यात् । पस्पशाते । चाकशीति । वावशीति । यङलुकि छान्दसमुपधाहस्वत्वं द्रष्टव्यम् । पस्पशात इत्यत्राभ्यासहस्वत्वम् च । प्रकृत्यन्तराणां वा स्पशिकशिवशीनामेतानि रूपाणि ॥

३४८४. भूसुवोस्तिङि ॥ ८८ ॥

भू सू इत्येतयोस्तिङि सार्वधातुके गुणो न भवति । अभूत् । अभूः । अभूवम् । सुवै । सुवावहै । सुवामहै । सूतेर्लुग्विकरणस्येदं ग्रहणां । सुवतिसूयत्योर्विकरणेन तिङो व्यवधानम् । विकरणस्यैव ङित्त्वाद् गुणाभावः सिद्धः। तिङीति किम्? भवति । सार्वधातुक इत्येव-व्यतिभविषीष्ट । अथ बोभवीतीति यङ्लुकि गुणप्रतिषेधः कस्मान्न भवति? ज्ञापकात् । यदर्थं बोभूत्विति गुणाभावार्थं निपातनं करोति ॥

३४८५. उतो वृद्धिर्लुकि हलि ॥ ८९ ॥

सार्वधातुके पितीति वर्त्तते । उकारान्तस्याङ्गस्य वृद्धिर्भवति लुकि सति हलादौ पिति सार्वधातुके । यौति । यौषि । यौमि । नौति । नौषि । नौमि । स्तौति। स्तौषि । स्तौमि । उत इति किम्? एति । एषि । एमि । लुकीति किम्? सुनोति । सुनोषि । सुनोमि । हलीति किम्? यवानि । रवाणि । पितीत्येव-युतः, रुतः । अपि स्तुयाद्राजानमित्यत्र हि ङिच्च पिन्न भवतीति पित्त्वप्रतिषेधाद् वृद्धेरभावः । नाऽभ्यस्तस्येतदिहानुवर्त्तते योयोति, रोरोति इत्येवमाद्यर्थम्॥

३४८६. ऊर्णोतेर्विभाषा ॥ ९० ॥

ऊर्णोतेर्विभाषा वृद्धिर्भवति हलादौ पिति सार्वधातुके । प्रोर्णौति । प्रोर्णोति । प्रोर्णौषि । प्रोर्णोषि । प्रोर्णौमि । प्रोर्णोमि । हलीत्येव - प्रोर्णावानि ॥

३४८७. गुणोऽपृक्ते ॥ ९१ ॥

ऊर्णोतेर्धातोरपृक्ते हलि पिति सार्वधातुके गुणो भवति । प्रोर्णोत् । प्रोर्णोः । हलीति वर्त्तमाने यदपृक्तग्रहणं क्रियते तेनैव ज्ञाप्यते भवत्येषा परिभाषा-यस्मिन् विधिस्तदादावल्ग्रहणे इति ॥

३४८८. तृणह इम् ॥ ९२ ॥

तृणह इत्येतस्याङ्गस्य इमागमो भवति हलि पिति सार्वधातुके । तृणेढि । तृणेक्षि । तृणेह्मि । अतृणेट् । वर्णाश्रयेऽप्यत्र प्रत्ययलक्षणमिष्यते । हलीति किम्? तृणहानि । पितीत्येव। तृणु । तृणह इत्यागतश्नम्को गृह्यते, श्नमि कृते इमागमो यथा स्यादिति ॥

३४८९. ब्रुव ईट् ॥ ९३ ॥

ब्रू इत्येतस्मादुत्तरस्य हलादेः पितः सार्वधातुकस्य ईडागमो भवति । ब्रवीति। ब्रवीषि । ब्रवीमि । अब्रवीत् । हलीत्येव-ब्रवाणि । पितीत्येव - ब्रूतः ॥

३४९०. यङो वा ॥ ९४ ॥

यङ उत्तरस्य हलादेः पितः सार्वधातुकस्य ईडागमो भवति वा । शाकुनिको लालपीति। दुन्दुभिर्वावदीति । त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश। न च भवति वर्वर्त्ति चर्कर्ति चक्रम् । वर्वर्मि । हलादेः पितः सार्वधातुकस्य यङन्तादभाव इति यङ्लुगन्तस्योदाहरणम्॥

३४९१. तुरुस्तुशम्यमः सार्वधातुके ॥ ९५ ॥

तु इति सौत्रोऽयं धातुः । रु शब्दे । ष्टुञ् स्तुतौ । शम उपशमे । अम गत्यादिषु । इत्येतेभ्यः परस्य सार्वधातुकस्य हलादेर्वा ईडागमो भवति । उत्तौति । उत्तवीति । उपरौति । उपरवीति । उपस्तौति । उपस्तवीति । शाम्यध्वम् । शमीध्वम्। अभ्यमति । अभ्यमीति । शम्यमोर्बहुलं छन्दसीति विकरणलुकि सति हलादिसार्वधातुकमनन्तरं सम्भवति । आपिशलास्तुरुस्तुशम्यमः सार्वधातुकासुच्छन्दसीति पठन्ति । तत्र सर्वेषामेव छन्दसि विषये

विधिरयं भवति। सार्वधातुक इति वर्त्तमाने पुनः सार्वधातुकग्रहणमपिदर्थम् - स्तुवीत, शमीध्वमित्यत्रापि यथा स्यादिति ॥

३४९२. अस्तिसिचोऽपृक्ते ॥ ९६ ॥

अस्तेरङ्गात् सिजन्ताच्च परस्यापृक्तस्य सार्वधातुकस्य ईडागमो भवति । अस्तेः - आसीत् । आसीः । सिजन्तात्-अकार्षीत् । असावीत् । अपृक्त इति किम्? अस्ति । अकार्षम् । आहिभुवोरीटि प्रतिषेध इति स्थानिवद्भावप्रतिषेधादिह न भवति - आत्थ, अभूदिति ॥

३४९३. बहुलं छन्दसि ॥ ९७ ॥

अस्तिसिचोरपृक्तस्य सार्वधातुकस्य ईडागमो भवति बहुलं छन्दसि विषये। आप एवेदं सलिलं सर्वमाः । आसीदिति स्थाने आः क्रियापदम् । अहरेवासीन्न रात्रिः । सिचः खल्वपि - गोभिरक्षाः । प्रत्यञ्चमत्साः । अभैषीर्मा पुत्रकेति च भवति, छान्दसत्वात् । माङ्योगेऽप्यडागमो भवति । अक्षा, अत्सा इति । सिच इडभावः ॥

३४९४. रुदश्च पञ्चभ्यः ॥ ९८ ॥

रुदादिभ्यः पञ्चभ्यः परस्य सार्वधातुकस्य हलादेरपृक्तस्य ईडागमो भवति। अरोदीत् । अरोदीः । अस्वपीत् । अस्वपीः । अश्वसीत् । अश्वसीः । प्राणीत् । प्राणीः । अजक्षीत् । अजक्षीः । पञ्चभ्य इति किम्? अजागर्भवान् । अपृक्तस्येत्येव - रोदिति ॥

३४९५. अड्गार्ग्यगालवयोः ॥ ९९ ॥

रुदादिभ्यः पञ्चभ्यः परस्य अपृक्तस्य सार्वधातुकस्याडागमो भवति गार्ग्यगालवयोर्मतेन। अरोदत् । अरोदः । अस्वपत् । अस्वपः । अश्वसत् । अश्वसः । प्राणत् । प्राणः । अजक्षत् । अजक्षः । गार्ग्यगालवयोर्ग्रहणं पूजार्थम् ॥

३४९६. अदः सर्वेषाम् ॥ १०० ॥

अद भक्षणे अस्मादुत्तरस्यापृक्तस्य सार्वधातुकस्याडागमो भवति सर्वेषामाचार्याणां मतेन। आदत् । आदः । अपृक्तस्येत्येव । अत्ति । अत्सि ॥

३४९७. अतो दीर्घो यञि ॥ १०१ ॥

अकारान्तस्याङ्गस्य दीर्घो भवति यञादौ सार्वधातुके परतः । पचामि । पचावः । पचामः । पक्ष्यामि । पक्ष्यावः । पक्ष्यामः । अत इति किम्? चिनुवः । चिनुमः । यञीति किम्? पचतः । पचथः । सार्वधातुक इत्येव । अङ्गना । केशवः । केचिदत्र तिङीत्यनुवर्त्तयन्ति, तेषां भववानिति क्वसौ सार्वधातुकदीर्घो न भवति ॥

३४९८. सुपि च ॥ १०२ ॥

अतो दीर्घो यञीत्यनुवर्त्तते । सुपि च यञादौ परतोऽकारान्तस्याङ्गस्य दीर्घो भवति । वृक्षाय प्लक्षाय । वृक्षाभ्यम् । प्लक्षाभ्याम् । अत इत्येव । अग्निभ्याम् । यञीत्येव । वृक्ज्स्य । प्लक्षस्य ॥

३४९९. बहुवचने झल्येत् ॥ १०३ ॥

बहुवचने झलादौ सुपि परतोऽकारान्तस्याङ्गस्य एकारादेशो भवति । वृक्षेभ्यः । प्लक्षेभ्यः । वृक्षेषु । फक्षेषु । बहुवचन इति किम्? वृक्षाभ्याम् । फल्षाभ्याम् । झलीतिः किम्? वृत्राणाम् । सुपीत्येव । यजध्वम् । पचध्वम् ॥

३५००. ओसि च ॥ १०४ ॥

ओसि परतोऽकारान्तस्याङ्गस्य एकारादेशो भवति । वृक्षयोः स्वम् । प्लक्षयोः स्वम् । वृक्षयोर्निधेहि । प्लक्षयोर्निधेहि ॥

३५०१. आङि चापः ॥ १०५ ॥

आङिति पूर्वाचार्यनिर्द्देशेन तृतीयैकवचनं गृह्यते । तस्मिन्नाङि परतश्चकारादोसि च आबन्तस्याङ्गस्यैकारादेशो भवति । खट्वया । मालया । खट्वयोः । मालयोः । बहुराजया । कारीषगन्ध्यया । बहुराजयोः । कारीषगन्ध्ययोः । आप इति पितो ग्रहणं किम्? कीलालपा ब्राह्मणेन । कीलालपोर्ब्राह्मणकुलयोः । ड्याब्ग्रहणेऽदीर्घग्रहण-मिति वचनादिह न भवति - अतिखट्वेन ब्राह्मणकुलेन ॥

३५०२. संबुद्धौ च ॥ १०६ ॥

आप इति वर्त्तते । संबुद्धौ च परत आबन्तस्याङ्गस्य एत्वं भवति । हे खट्वे । हे बहुराजे । हे कारीषगन्ध्ये ॥

३५०३. अम्बार्थनद्योर्ह्रस्वः ॥ १०७ ॥

संबुद्धाविति वर्त्तते । अम्बार्थानामङ्गानां नद्यन्तानां ह्रस्वो भवति संबुद्धौ परतः । हे अम्ब। हे अक्क । हे अल्ल । नद्याः खल्वपि - हे कुमारि । हे शर्ङ्गरवि। हे ब्रह्मबन्धु । हे पौरबन्धु । डलकवतीनां प्रतिषेधो वक्तव्यः । हे अम्बाडे । हे अम्बाले । हे अम्बिके । छन्दसि वेति वक्तव्यम् । हे अम्बाड । हे अम्बाडे । हे अम्बाल । हे अम्बाले । हे अम्बिक । हे अम्बिके । तलो ह्रस्वो वा डिसंबुद्ध्योरिति वक्तव्यम् । देवते भक्तिः । देवतायां भक्तिः । हे देवत । हे देवते । छन्दस्येव ह्रस्वत्वसिष्यते । मातॄणां मातच् पुत्रार्थमर्हते । मातॄणां मातजादेशो वक्तव्यः संबुद्धौ, पुत्राय पुत्रमभिधातुं, कीदृशाय? अर्हते । मात्रा व्यपदेशमर्हति श्लाघनीयत्वाद्यः पुत्रस्तदर्थम्। हे गार्गीमात । नद्यृतश्चेति समासान्तापवादो मातजादेशः। चित्करणमन्तोदात्तार्थम् ॥

३५०४. ह्रस्वस्य गुणः ॥ १०८ ॥

संबुद्धाविति वर्त्तते । ह्रस्वान्तस्याङ्गस्य गुणो भवति संबुद्धौ परतः । हे अग्ने। हे वायो। हे पाटो । हे कुमारि, हे ब्रह्मबन्धु इत्येवमादीनां ह्रस्वविधानसामर्थ्याद् गुणो न भवति । यदि गुण इष्टः स्यात्, अम्बार्थानां ह्रस्व इत्युक्त्वा नदीह्रस्वयोर्गुण इत्येवं ब्रूयात् ॥

३५०५. जसि च ॥ १०९ ॥

जसि परतो ह्रस्वन्तस्याङ्गस्य गुणो भवति । अग्नयः । वायवः । पटवः । धेनवः । बुद्धयः । जसादिषु छन्दसि वावचनम् । प्राक् णौ चङ्युपधाया ह्रस्व इत्येतस्मादितः प्रकरणात् प्रभृति छन्दसि वेति वक्तव्यम् । कि प्रयोजनम्? अम्बे दर्वि शतक्रत्वः पश्वे भृत्यः किकिदीव्या। अम्बे । अम्ब । पूर्णा दर्वि । पूर्णा दर्वी। अधा शतक्रत्वः । शतक्रतवः । पश्वे भृत्यः । पशवे भृत्यः । किकिदीव्या । किकिदीविना ॥

३५०६. ऋतो डिसर्वनामस्थानयोः ॥ ११० ॥

गुण इति वर्त्तते । ऋकारान्तस्याङ्गस्य ङौ परतः सर्वनामस्थाने च गुणो भवति । ङौ- मातरि । पितरि । भ्रातरि । कर्तरि । सर्वनामस्थाने - कर्तारौ । कर्तारः। मातरौ । पितरौ । भ्रातरौ ॥

३५०७. घेङिति ॥ १११ ॥

घ्यन्तस्याङ्गस्य ङिति प्रत्यये परतो गुणो भवति । अग्नये । वायवे । अग्नेरागच्छति । वायोरागच्छति । अग्नेः स्वम् । वायोः स्वम् । घेरिति किम्? सख्ये पत्ये । ङितीति किम्? अग्निभ्याम् । सुपीत्येव-पट्वी । कुरुतः ॥

३५०८. आण् नद्याः ॥ ११२ ॥

नद्यन्तादङ्गदुत्तरस्य ङित्अः प्रत्ययस्याडागमो भवति । कुमार्यै । ब्रह्मबन्ध्वै । कुमार्याः। ब्रह्मबन्ध्वाः ॥

३५०९. याडापः ॥ ११३ ॥

आबन्तादङ्गादुत्तरस्य ङितः प्रत्ययस्य याडागमो भवति । खट्वायै । बहुराजायै । कारीषगन्ध्यायै । खट्वायाः । बहुराजायाः । कारीषगन्ध्यायाः । अतिखट्वायेत्यत्राकृते दीर्घे ङ्याब्ग्रहणेऽदीर्घ इति वचनाद्याडागमो न भवति । कृते तु लाक्षणिकत्वात् ॥

३५१०. सर्वनाम्नः स्याड्ढ्रस्वश्च ॥ ११४ ॥

सर्वनाम्न आबन्तादङ्गादुत्तरस्य ङितः प्रत्ययस्य स्याडागमो ह्रस्वश्च भवति । सर्वस्यै। विश्वस्यै । यस्यै । तस्यै । कस्यै । अन्यस्यै । सर्वस्याः । विश्वस्याः । यस्याः । तस्याः । कस्याः । अन्यस्याः । आप इत्येव । भवते । भवति ॥

३५११. विभाषा द्वितीयातृतीयाभ्याम् ॥ ११५ ॥

द्वितीया तृतीया इत्येताभ्यामुत्तरस्य ङितः प्रत्ययस्य विभाषा स्याडागमो भवति। द्वितीयातृतीययोश्च ह्रस्वो भवति । द्वितीयस्यै । द्वितीयायै । तृतीयस्यै । तृतीयायै ॥

३५१२. ङेराम्नद्याम्नीभ्यः ॥ ११६ ॥

नद्यन्तादाबन्तान्नीत्येतस्माच्चोत्तरस्य ङेरामित्ययमादेशो भवति । कुमार्याम् । गौर्याम्। ब्रह्मबन्ध्वाम् । धीबन्ध्वाम् । आपः - खट्वायाम् । बहुराजायाम् । कारीषगन्ध्यायाम्। नी-राजन्याम् । सेनान्याम् ॥

३५१३. इदुद्भ्याम् ॥ ११७ ॥

इकारोकाराभ्यां नदीसंज्ञकाभ्यामुत्तरस्य ङेरामादेशो भवति । कृत्याम् । धेन्वाम् ॥

३५१४. औत् ॥ ११८ ॥

इदुद्भ्यामुत्तरस्य डेरौकारादेशो भवति । यन्न नदीसंज्ञं नापि घिसंज्ञमिकारान्तं तदिहोदाहरणम् । सख्यौ । पत्यौ ॥

३५१५. अच्च घेः ॥ ११९ ॥

औदिति वर्त्तते । घिसंज्ञकादुत्तरस्य डेरौकारादेशो भवति, तस्य च घेरकारादेशो भवति। अग्नौ । वायौ । कृतौ । धेनौ । पटौ । अदिति तपरकरणं स्त्रियां टापो निवृत्त्यर्थम् । औदच्च घेरिति येषामेकमेवेदं सूत्रं ते प्रधानशिष्टमिदुद्भ्यामौत्त्वं वर्णयन्ति । अन्वाचयशिष्टं घेरकारमिति॥

३५१६. आङो नाऽस्त्रियाम् ॥ १२० ॥

घेरुत्तरस्याङो नाभावो भवति अस्त्रियाम् । अग्निना । वायुना । पटुना । पुंसि इति नोक्तममुना ब्राह्मणकुलेन । अस्त्रियामिति किम्? कृत्या । धेन्वा ॥

इति श्रीवामनकृतायां काशिकायां वृत्तौ
सप्तमाध्यायस्य तृतीयः पादः ॥

अथ सप्तमाध्यायस्य
चतुर्थः पादः ॥

३५१७. णौ चङ्युपधाया ह्रस्वः ॥ १ ॥

अङ्गस्येति वर्त्तते । चङ्परे णौ यदङ्गं तस्योपधाया ह्रस्वो भवति । अचीकरत्। अजीहरत् । अलीलवत् । अपीपठत् । अत्र द्विर्वचनोपधाह्रस्वत्वयोः प्राप्तयोः परत्वादुपधाह्रस्वत्वम्, तत्र कृते द्विर्वचनम् । इह तु मा भवानटिटदिति नित्यत्वाद् द्वितीयस्य द्विर्वचनं, प्राप्नोति । तथा सति ह्रस्वभाविनोऽङ्गस्याकारस्योपधात्वं विहतमिति ह्रस्वो न स्यात्? नैष दोषः । ओणेऋदित्करणं ज्ञापकं नित्यमपि द्विर्वचनमुपधाह्रस्वत्वेन बाध्यत इति ।

णाविति किम्? चङ्युपधाया ह्रस्व इत्युच्यमानेऽलीलवदित्यत्र वचनसामर्थ्यादन्तरङ्गामपि वृद्धिमादेशं च बाधित्वा ह्रस्वः स्यात् । अदीदपदित्यत्र ह्रस्वत्वेन पुको बाधः स्यात् । अपीपचदित्येवमादौ तु नैव स्यात् । चङीति किम्? कारयति । हारयति । उपधाया इति किम्? अचकाङ्क्षत् । अववाञ्छत् । तदेतदुपधाग्रहणमुत्तरार्थमवश्यं कर्त्तव्यं तदिहापि ह्रस्वत्वं निवर्त्तयतीत्येवमर्थं येन नाव्यवधानमित्येतन्नाश्रयितव्यमिति । उपधाह्रस्वत्वे णे णिच्युपसंख्यनम् । वादितवन्तं प्रयोजितवान् अवीवदद्वीणां परिवादकेन । योऽसौ णौ णिलोपस्तस्य स्थानिवद्भावेनाऽग्लोपित्वादङ्गस्यह्रस्वो न प्राप्नोति ? ण्याकृतिनिर्देशात् सिद्धम्॥

३५१८. नाग्लोपिशास्वृदिताम् ॥ २ ॥

अग्लोपिनामङ्गानां शासेऋदिताञ्च णौ चङ्युपधाया ह्रस्वो न भवति । अग्लोपिनां तावत्-मालामाख्यत् अममालत् । मातरमाख्यत् । अममातत् । राजानमतिक्रान्तवान् अत्यरराजत् । लोमान्यनुवृष्टवान् अन्वलुलोमत् । अगेव यत्र केवलो लुप्यते तत्र स्थानिवद्भावादपि सिद्धम् । हलचोरादेशे तु न सिद्ध्यतीति तदर्थमेतद्वचनम् । शासेः - अशसासत् । ऋदिताम्-बाधृ-अबबाधत् । याद - अययाचत् । ढौकृ - अडुढौकत् ॥

३५१९. भ्राजभासभापदीषजीवमीलपीडामन्यतरस्याम् ॥ ३ ॥

भ्राज भास भाष दीप जीव मील पीड इत्येतेषामङ्गानां णौ चङ्युपधाया ह्रस्वो भवत्यन्यतरस्याम् । भ्राज - अबिभ्रजत् । अबभ्राजत् । भास - अबीभसत् । अबभासत् । भास-अबीभषत् । अबभाषत् । दीप-अदीदिपत् । अदिदीपत् । जीव - अजीजिवत् । अजिजीवत्। मील - अमीमिलत् । अमिमीलत् । पीड- अपीपिडत् । अपिपीडत् । भ्राजभासोऋदित्करणमपाणिनीयम् । काण्यादीनां वेति वक्तव्यम् । अचीकणत् । अचकाणत् । अवीवणत् । अववाणत् ।

३५२०. लोपः पिबतेरीच्चाभ्यासस्य ॥ ४ ॥

पिवतेरङ्गस्य णौ चङ्युपधाया लोपो भवति अभ्यासस्येकारादेशो भवति । अपीप्यत् । अपीप्यताम् । अपीप्यन् । उपधालोपे कृते ओः पुयण्ज्वचनं ज्ञापकं णौ स्थानिवद्भावस्येति स्थानिवद्भावाद् द्विर्वचनम् ॥

३५२१. तिष्ठतेरित् ॥ ४ ॥

तिष्ठर्तेरङ्गस्य णौ चङ्युपधाया इकारादेशो भवति । अतिष्ठिपत् । अतिष्ठिपताम्। अतिष्ठिपम् ॥

३५२२. जिघ्रतेर्वा ॥ ६ ॥

जिघ्रतेरङ्गस्य णौ चङ्युपधाया इकारादेशो वा भवति । अजिघ्रिपत् । अजिघ्रिपताम्। अजिघ्रिपन् । अजिघ्रपत् । अजिघ्रपताम् अजिघ्रपन् ॥

३५२३. उऋत् ॥ ७ ॥

णौ चङ्युपधाया ऋवर्णस्य स्थाने वा ऋकारादेशो भवति । इररारामपवादः । इर्-अचिकीर्त्तत् । अचीकृतत् । अर्-अववर्त्तत् । अवीवृतत् । आर्-अममार्जत्। अमीमृजत् । वचनसामर्थ्यादन्तरङ्गा अपि इररारो बाध्यन्ते । तपरकरणं दीर्घेऽपि स्थानिनि ह्रस्व एव यथा स्यात् अचीकृतदिति । न चायं भाव्यमानः, किन्तु आदेशान्तरनिवृत्त्यर्थं स्वरूपमेवैतदभ्यनुज्ञायते ॥

३५२४. नित्यं छन्दसि ॥ ८ ॥

छन्दसि विषये णौ चङ्युपधाया ऋवर्णस्य स्थाने ऋकारादेशो भवति नित्यम्। अवीवृधत् पुरोडाशेन । अवीवृधताम् । अवीवृधन् ॥

३५२५. दयतेर्दिगि लिटि ॥ ९ ॥

दयतेरङ्गस्य लिटि परतो दिगीत्ययमादेशो भवति । अवदिग्ये । अवदिग्याते । अवदिग्यिरे । दयतेरिति दीङो ग्रहणं न तु दय दान इत्यस्य । तस्य हि लिट्याम् विहितः । दिग्यादेशेन द्विर्वचनस्य बाधनमिष्यते ॥

३५२६. ऋतश्च संयोगादेर्गुणः ॥ १० ॥

ऋकारान्तस्याङ्गस्य संयोगादेर्गुणो भवति लिटि परतः । स्वृ-सस्वरतुः । सस्वरुः । ध्वृ-दध्वरतुः । दध्वरुः । स्मृ-सस्मरतुः । सस्मरुः । ऋत इति किम्? चिक्षियतुः । चिक्षियुः । संयोगादेरिति किम्? चक्रतुः । चक्रुः । प्रतिषेधविषयेऽपि गुणो यथा स्यादित्ययमारम्भः । वृद्धिविषये तु पूर्वविप्रतिषेधेन वृद्धिरेवेष्यते । सस्वार । सस्मार । लिटीत्येव । स्मृतः । स्मृतवान् । संयोगादेर्गुणविधाने अयोगोपधग्रहणं कृत्रर्थं कर्त्तव्यम् । संचस्करतुः, संचस्करुः

इत्यत्र हि पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेणेत्यत्र दर्शने लिटि कृते तदाश्रये च द्विर्वचने पश्चादुपसर्गयोगे सत्यडभ्यासव्यवायेऽपीति सुट् क्रियते । एवञ्च कृत्वा संस्कृषीष्ट, उपस्कृषीष्टेत्यत्र सुटो बहिरङ्गलक्षणस्यासिद्धत्त्वाद्दतश्च संयोगादेरिति इडागमो न भवति ॥

३५२७. ऋच्छत्यृताम् ॥ ११ ॥

ऋच्छतेरङ्गस्य ऋइत्येतस्य ऋकारान्तानां च लिटि परतो गुणो भवति । ऋच्छा- आनर्च्छ । आनर्च्छतुः । आनर्च्छुः । ऋ - आर । आरतुः । आरुः । ऋकारान्तानाम् - निचकरतुः । निचकरुः । निजगरतुः । निजगरुः । ऋच्छेरलधूपधत्वादप्राप्तो गुणो विधीयते । ऋतां तु प्रतिषिद्धः । वृद्धिविषये तु पूर्वविप्रतिषेधेन वृद्धिरेवेष्यते - निचकार, निजगार ॥

३५२८. शृदृप्रां ह्रस्वो वा ॥ १२ ॥

शृ दृ पृ इत्येतेषामङ्गानां लिटि परतो वा ह्रस्वो भवति । विशश्रतुः । विशश्रुः । विशशरतुः । विशशरुः । विदद्रतुः । विदद्रुः । विददरतुः । विददरुः । निपप्रतुः । निपप्रुः । निपपरतुः । निपपरुः । ह्रस्ववचनमित्वोत्त्वनिवृत्त्यर्थम् । केचिदेतत् सूत्रं प्रत्याचक्षते । श्रा पाके, द्रा कुत्सायां प्रा पूरणे इत्येतेषामनेकार्था धातव इति शृदप्रामर्थे वर्तमानानां विशश्रतुः, विशश्रुः , विदद्रतुः, विदद्रुः, निपप्रतुः, निपप्रः इत्येतानि रूपाणि साधयन्ति । तथाच सति क्कसौ विशशृवानित्येतद्रूपं न स्यात् ॥

३५२९. केऽणः ॥ १३ ॥

के प्रत्यये परतोऽणो ह्रस्वो भवति । ज्ञका । कुमारिका । किशोरिका । अण इति किम्? गोका । नौका । राका, धाकेत्यत्र उणादयो बहुलमिति ह्रस्वो न भवति। न कपीति प्रतिषेधसामर्थ्यात् कनोऽपि सानुबन्धकस्य ग्रहणमिह भवति ॥

३५३०. न कपि ॥ १४ ॥

कपि प्रत्यये परतोऽणो ह्रस्वो न भवति । बहुकुमारीकः । बहुवधूकः । बहुलक्ष्मीकः । गोस्त्रियोरुपसर्जनस्येत्ययमपि ह्रस्वः कपि न भवति । समासार्थे ह्युत्तरपदे कपि कृते पश्चात् समासेन भवितव्यमिति स्त्रीप्रत्ययान्तसासप्रातिपदिकं न भवति ॥

३५३१. आपोन्यतरस्याम् ॥ १५ ॥

आबन्तस्याङ्गस्य कपि ह्रस्वो न भवत्यन्यतरस्याम् । बहुखट्वकः । बहुखट्वाकः बहुमालकः । बहुमालाकः ॥

३५३२. ऋदृशोऽङि गुणः ॥ १६ ॥

ऋवर्णान्तानां दृशेश्च अङि परतो गुणो भवति । शकलाङ्गुष्ठकोऽकरत् । अहं तेभ्योऽकरं नमः । असरत् । आरत् जरा । दृशेः - अदर्शत् । अदर्शताम् । अदर्शन् ॥

३५३३. अस्यतेस्थुक् ॥ १७ ॥

अस्यतेरङ्गस्य थुगागमो भवत्यङि परतः । आस्थत् । आस्थताम् । आस्थन् ।

३५३४. श्वयतेरः ॥ १८ ॥

श्वयतेरङ्गस्याकारादेशो भवत्यङि परतः । अश्वत् । अश्वताम् । अश्वन् ॥

३५३५. पतः पुम् ॥ १९ ॥

पतेरङ्गस्य पुमागमो भवत्यङि परतः । अपप्तत् । अप्ततताम् । अपप्तन् ॥

३५३६. वच उम् ॥ ३० ॥

वचेरङ्गस्य अङि परत उमागमो भवति । अवोचत् । अवोचतात् । अवोचन् ॥

३५३७. शीङः सार्वधातुके गुणः ॥ २१ ॥

शीङोऽङ्गस्य सार्वधातुके परतो गुणो भवति । शेते । शयाते । शेरते । सार्वधातुक इति किम्? शिश्ये ॥

३५३८. अयङ् यि क्ङिति ॥ २२ ॥

यकारादौ वङति प्रयये परतः शीङोऽङ्गस्यायङित्ययमादेशो भवति । शय्यते । शाशय्यते। पशय्य । उपशय्य । यीति किम्? शिश्ये । क्ङितीति किम्? शेयम् ॥

३५३९. उपसर्गाद्घ्रस्व ऊहतेः ॥ २३ ॥

उपसर्गादुत्तरस्य ऊहतेरङ्गस्य ह्रस्वो भवति यकारादौ क्ङिति प्रत्यये परतः । समुह्यते। समुह्य गतः । अभ्युह्यते । अभ्युह्य गतः । उपसर्गादिति किम्? ऊह्यते । ऊहतेरिति किम्? समीह्यते । यीत्येव । समूहितम् । क्ङितीत्येव । अभ्यूह्योऽयमर्थः । अण इत्येव । आ ऊत्द्यते ओह्यते । समोह्यते ॥

३५४०. एतेर्लिङि ॥ २४ ॥

एतेरङ्गस्योपसर्गादुत्तरस्य लिङि यकारादौ क्ङिति परतो ह्रस्वो भवति । उदियात् । समियात् । अन्वियात् । आशिर्षि लिङि अकृत्सार्वधातुकयोरिति दीर्घत्वे कृते ह्रस्वोऽनेन भवति। उपसर्गादित्येव - ईयात् । अण इत्येव - आ + ईयात् - एयात् । समेयात् ॥

३५४१. अकृत्सार्वधातुकयोर्दीर्घः ॥ २५ ॥

अकृद्यकारे असार्वधातुकयकारे च क्ङिति परतोऽजन्तस्याङ्गस्य दीर्घो भवति। भृशायते। सुखायते । दुःखायते । चीयते । चेचीयते । स्तूयते । तोष्टूयते । चीयात्। स्तूयात् । अकृदिति किम्? प्रकृत्य । प्रहृत्य । परत्वाद्दीर्घत्वेन तुको बाधः स्यात् । असार्वधातुक इति किम्? चिनुयात् । सुनुयात् । क्ङितीत्येव । उरुया । धृष्णुया ॥

३५४२. च्वौ च ॥ २६ ॥

च्विप्रत्यये परतोऽजन्तस्याङ्गस्य दीर्घो भवति । शुचीकरोति । शुचीभवति । शुचीस्यात्। पटूकर्रोति । पाट्पूभवति । पटूस्यात् ॥

३५४३. रीङ् ऋतः ॥ २७ ॥

ऋकारान्तस्याङ्गस्य अकृद्यकारेऽसार्वधातुके यकारे च्वौ च परतो रीङित्ययमादेशो भवति। मात्त्रियति । मात्त्रीयते । पित्रीयति । पित्त्रीयते । चेक्रीयते । मात्त्रीभूतः । क्ङितीत्येतन्निवृत्तम्, तेनेहापि भवति - पितुरागतं पित्र्यम् । ऋत इति तपरकरणं किम्? चेकीर्यते । निजेगिल्यते ॥

३५४४. रिङ् शयग्लिङ्क्षु ॥ २८ ॥

ऋकारान्तस्याङ्गस्य श यक् इत्येतयोर्लिङि च यकारादौ असार्वधातुके परतो रिङित्ययमादेशो भवति । श- आद्रियते । आध्रियते । यक् - क्रियते । ह्रियते । लिङ्-क्रियात् । ह्रियात् । असार्वधातुक इत्येव । बिभृयात् । यीत्येव । कृषीष्ट । हृषीष्ट ॥

३५४५. गुणोर्त्तिसंयोगाद्योः ॥ २९ ॥

ऋतो यकि लिङि इति वर्त्तते । श इत्यत्रासंभवान्नानुवर्त्तते । गुणो भवत्यर्त्तेः संयोगादीनामृकारान्तानां यकि परतो लिङि च यकारादावसार्वधातुके । अर्यते । अर्यात् । स्मर्यते। स्मर्यात् । इह संस्क्रियते, संस्क्रियादिति सुटो बहिरङ्गलक्षणस्यासिद्धत्वादभक्तत्वाद्वा संयोगादित्वमङ्गस्य नास्तीति गुणो न प्रवर्त्तते। यीत्येव । स्वृषीष्ट । ध्वृषीष्ट । असार्वधातुक इत्येव । इयृयात् ॥

३५४६. यङि च ॥ ३० ॥

यङि च परतः अर्तेः संयोगादेश्च ऋतो गुणो भवति । अरार्यते । सास्वर्यते । दाध्वर्यते। सास्मर्यते । अर्त्तेरट्यर्त्त्यशूर्णोतीनामुपसंख्यानमिति यङ् । नन्द्राः संयोगादय इति द्विर्वचनप्रतिषेधो यकारपरस्य नेष्यते ॥ हन्तेर्हिंसायां यङि घ्नीभावो वक्तव्यः । जेघ्नीयते । हिंसायामिति किम्? जङ्घन्यते ॥

३५४७. ईं घ्राध्मोः ॥ ३१ ॥

घ्रा ध्मा इत्येतयोर्यङि परत ईकारादेशो भवति । जेघ्रीयते । देध्मीयते ॥

३५४८. अस्य च्वौ ॥ ३२ ॥

ई इति वर्त्तते । अवर्णान्तस्याङ्गस्य च्वौ परत ईकारादेशो भवति । शुक्लीभवति। शुक्लीस्यात् । खट्वीकरोति । खट्वीस्यात् ॥

३५४९. क्यचि च ॥ ३३ ॥

अस्येति वर्त्तते । क्यचि परतोऽवर्णान्तस्याङ्गस्य ईकारादेशो भवति । पुत्रीयति। घटीयति । खट्वीयति । मालीयति । अकृत्सार्वधातुकयोर्दीर्घ इत्यस्यापवादः । पृथग्योगकरणमुत्तरार्थम् ॥

३५५०. अशनायोदन्यधनाया बुभुक्षापिपासागर्द्धेषु ॥ ३४ ॥

अशनाय उदन्य धनाय इत्येतानि निपात्यन्ते बुभुक्षा पिपासा गर्द्ध इत्येतेव्यर्थेषु। अशनायेत्यशनशब्दस्यात्वं क्यचि निपात्यते । अशनायतीति भवति बुबुक्षा चेत् । अशनीयतीत्येवान्यत्र । उदन्यातीति उदकशब्दस्य उदन्नादेशो निपात्यते । उदन्यतीति भवति पिपासा चेत् । उदकीयतीत्येवान्यत्र । धनायेति धनशब्दस्यात्वं तिपात्यते । धनायतीति भवति गर्द्धश्चेत् । धनीयतीत्येवान्यत्र ॥

३५५१. न च्छन्दस्यपुत्रस्य ॥ ३५ ॥

छन्दसि विषये पुत्रवर्जितस्यावर्णान्तस्याङ्गस्य क्यचि यदुक्तं तन्न भवति । किं चोक्तम्? दीर्घत्वमीत्वं च । मित्रयुः । संस्वेदयुः । देवाञ्जिगाति सुम्नयुः। अपुत्त्रस्येति किम्? पुत्त्रीयन्तः सुदानवः । अपुत्त्रादीनामिति वक्तव्यम् । जनीयन्तोऽन्वग्रवः ॥

३५५२. दुरस्युर्द्रविणस्युर्वृषण्यति रिषण्यति ॥ ३६ ॥

दुरस्युः द्गविणस्युः वृषण्यति रिषण्यति इत्येतानि छन्दसि निपात्यन्ते । दुष्ट शब्दस्य क्यचि दुरस्भावो निपात्यते । अवियोना दुरस्युः । दुष्टीयतीति प्राप्ते । द्रविणशब्दस्य द्रविणस् भावो निपात्यते । द्रविणस्युर्विपन्यया । द्रविणीयतीति प्राप्ते वृषशब्दस्य वृषण्भावो निपात्यते। वृषण्यति । वृषीयतीति प्राप्ते । रिष्टशब्दस्य रिषण्भावो निपात्यते । रिषण्यति । रिष्टीयतीति प्राप्ते ॥

३५५३. अश्वाघस्यात् ॥ ३७ ॥

अश्व अघ इत्येतयोः क्यचि परतश्छन्दसि विषये आकारादेशो भवति । अश्वायन्तो मघवन् । मा त्वा वृका अघायवो विदन् । एतदेवात्ववचनं ज्ञापकम् - न च्छन्दस्यपुत्त्रस्येति दीर्घप्रतिषेधो भवतीति ॥

३५५४. देवसुम्नयोर्यजुषि काठके ॥ ३८ ॥

देव सुम्न इत्येतयोः क्यचि परत आकरादेशो भवति यजुषि काठके । देवायन्तो यजमानाय । सुम्नायन्तो हवामहे । यजुषीति किम्? देवाञ्जिगाय सुम्नयुः । काठक इति किम्? सुम्नयुरिदमासीत् ॥

३५५५. कव्यध्वरपृतनस्यर्चि लोपः ॥ ३९ ॥

कवि अध्वर पृतना इत्येतेषामङ्गानां क्यचि परतो लोपो भवति ऋचि विषये। कवि - कव्यन्तः सुमनसः । अध्वर - अध्वर्यन्तः । पृतना - पृतन्यन्तस्तिष्ठन्ति ॥

३५५६. द्यतिस्यतिमास्थामित्ति किति ॥ ४० ॥

द्यति स्यति मा स्था इत्येतेषामङ्गानामिकारादेशो भवति तकारादौ किति प्रत्यये परतः। द्याति - निर्दितः । निर्दितवान् । स्यति - अवसितः । अवसितवान्। मा-मितः । मितवान् । स्था - स्थितः । स्थितवान् । तीति किम्? अवदाय । कितीति किम्? अवदाता ॥

३५५७. शाच्छोरन्यतरस्याम् ॥ ४१ ॥

शा छा इत्येतयोरन्यतरस्यामिकारादेशो भवति तकारादौ किति । शा - निशितम् । निशातम् । निशितवान् । निशातवान् । छा-अवच्छितम् । अवच्छातम्। अवच्छितवान् । अवच्छातवान् । श्यतेरित्वं व्रते नित्यमिति वक्तव्यम् । संशितो ब्राह्मणः । संशितव्रत इत्यर्थः। व्यवस्थितविभाषाविज्ञानात् सिद्धम् ॥

देवत्रातो गलो ग्राह इतियोगे च सद्विधिः ।
मिथस्ते न विभाष्यन्ते गवाक्षः संशितव्रतः ।

३५५८. दधातेर्हिः ॥ ४२ ॥

दधातेरङ्गस्य हीत्ययमादेशो भवति तकरादौ किति प्रत्यये परतः । हितः । हितवान् । हित्वा ॥

३५५९. जहातेश्च क्त्वि ॥ ४३ ॥

जहातेरङ्गस्य हीत्ययमादेशो भवति क्त्वाप्रत्यये परतः । हित्वा राज्यं वनं गतः । हित्वा गच्छति । जहातेर्निर्देशाज्जिहीतेर्न भवति - हात्वा ॥

३५६०. विभाषा छन्दसि ॥ ४४ ॥

जहातेरङ्गस्य विभाषा हीत्ययमादेशो भवति छन्दसि विषये क्त्वाप्रत्यये परतः। हित्वा शरीरं यातव्यम् । हात्वा ॥

३५६१. सुधितवसुधितनेमधितधिष्वधिषीय च ॥ ४५ ॥

सुधित वसुधित नेमधित धिष्व धिषीय इत्येतानि छन्दसि विषये निपात्यन्ते। तत्र सुधित वसुधित नेमधित इति सुवसुनेमपूर्वस्य दधातेः क्त्वाप्रत्यये इत्वमिडागमो वा प्रत्ययस्य निपात्यते । गर्भं माता सुधितम् । सुहितमिति प्राप्ते । वसुधितमग्नौ जुहोति । वसुहितमिति प्राप्ते । नेमधिता बाधन्ते । नेमहिता इति प्राप्ते । धिष्वेति लोण्मध्यमैकवचने दधातेरित्त्वमिडागमो वा प्रत्ययस्य द्विर्वचनाभावश्च निपात्यते । धिष्व सोमम् । धत्स्वेति प्राप्ते । धिषीयेति आशीर्लिङ्यात्मनेपदोत्तमैकवचने दधातेरित्वमिडागमो वा प्रत्ययस्य निपात्यते। धिषीर्यति । धासीयेति प्राप्ते ॥

३५६२. दो दद् घोः ॥ ४६ ॥

दा इत्येतस्य घुसंज्ञकस्य ददित्ययमादेशो भवति तकारादौ किति प्रत्यये परतः । दत्तः। दत्तवान् । दत्तिः । द इति किम्? धीतः । धीतवान् । धेट एतद्रूपम्। घोरिति किम्? दाप् लवने - दातम् बर्हिः । दैप् शोधने - अवदातं मुखम् । अयमादेशस्थान्त इष्यते । एवं ह्युक्तम्-

तान्ते दोषो दीर्घत्वं स्याद्धान्ते दोषो निष्ठानत्वम् ।

धान्ते दोषो धत्वप्राप्तिस्थान्तेऽदोषस्तस्मात्थान्तम् ॥

यदि तु दस्ति इति तकरादौ दीर्घत्वं तदा तान्तेऽप्यदोषः । दान्तधान्तयोरपि सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति नत्वधत्वे न भविष्यत इति न दोषः ॥

अवदत्तं विदत्तं च प्रदत्तं चादिकर्म्मणि ।

सुदत्तमनुदत्तं च निदत्तमिति चेष्यते ॥

अच उपसर्गात्त इति प्राप्ते निपात्यन्ते । अनुपसर्गा वा एते अवादयः क्रियान्तरविषया वेदितव्याः ॥

३५६३. अच उपसर्गात्तः ॥ ५७ ॥

अजन्तादुपसर्गादुत्तरस्य दा इत्येतस्य घुसंज्ञकस्य त इत्ययमादेशो भवति तकारादौ किति । प्रत्तम् । अवत्तम् । नीत्तम् । परीत्तम् । अच इति किम्? निर्दत्तम्। दुर्दत्तम् । उपसर्गादिति किम्? दधि दत्तम् । मधु दत्तम् । घोरित्येव । अवदातं मुखम् । अपसर्गादिति पञ्चमीनिर्देशादादेरलः प्राप्नोति । तत्र समाधिमाहुः - अच इत्येतदावर्त्तते । तत्रैकं पञ्चम्यन्तमुपसर्गविशेषणार्थम्, अपरमपि षष्ठ्यन्तं स्थानिनिर्देशार्थमित्याकारस्य स्थाने तकारो भवति । द्वितकारो वा संयोगोऽयमादिश्यते। सोऽनेकाल्त्वात् सर्वस्य भविष्यति । अपो भीत्यत्र

पञ्चम्यन्तमच इत्यनुवर्त्तते । तेन पकारमात्रस्य भविष्यति । द्यतेरित्वादचस्त इत्येतद्भवति विप्रतिषेधेन । अवत्तम् । प्रत्तं जुहोति ॥

३५६४. अपो भि ॥ ४८ ॥

अप् इत्येतस्याङ्गस्य भकारादौ प्रत्यये परतस्त इत्ययमादेशो भवति । अद्भिः । अद्भ्यः। भीति किम्? अप्सु । स्ववः स्वतवसोर्मास उषसश्च तकरादेश इष्यते छन्दसि भकारादौ। स्ववद्भिः । स्वतवद्भिः । माद्भिष्ट इन्द्रो वृत्रहा । समुषद्भिरजायथाः ॥

३५६५. सः स्यार्द्धधातुके ॥ ४९ ॥

सकारान्तस्याङ्गस्य सकारादावार्द्धधातुके परतस्तकारादेशो भवति । वत्स्यति । अवत्स्यत् । विवत्सति । जिघत्सति । स इति किम्? वक्ष्यति । सीति किम्? घासः । वासः । आर्द्धधातुक इति किम्? आस्से । वस्से ॥

३५६६. तासस्त्येर्लोपः ॥ ५० ॥

तासेरस्तेश्च सकारस्य सकारादौ प्रत्यये परतः लोपो भवति । तासेः - कर्त्तासि । कर्त्तासे। अस्तेः - त्वमसि । व्यतिसे । अस्तेरकारसकारयोर्लुप्तयोः से इति प्रत्ययमात्रमेतत्पदम् । तेन सात्पदाद्योरिति षत्वं न भवति ॥

३५६७. रि च ॥ ५१ ॥

रेफादौ च प्रत्यये परतः तासस्त्योः सकारस्य लोपो भवति । कर्त्तारौ । कर्त्तारः । अध्येतारौ । अध्येतारः । अस्तेर्लिटि - व्यतिरे ॥

३५६८. ह एति ॥ ५२ ॥

तासस्त्योः सकारस्य हकारादेशो भवति एति परतः । कर्त्ताहे । अस्तेः - व्यतिहे ॥

३५६९. यीवर्णयोर्दीधीवेव्योः ॥ ५३ ॥

यकारादाविवर्णादौ च परतो दीधीवेव्योर्लोपो भवति । यकारादौ - आदीध्य गतः । आवेव्य गतः । आदीध्यते । आवेव्यते । इवर्णादौ - आदीधिता । आवेविता । लिङि । आदीधीत। आवेवीत । यीवर्ण योरिति किम्? आदीध्यनम् । आवेव्यनम् ॥

३५७०. सनि मीमाघुरभलभशकपतपदामच इस् ॥ ५४ ॥

सनि प्रत्यये सकारादौ परतो मी म घु रभ लभ शक पत पद इत्येतेषामङ्गानामचः स्थाने इसित्ययमादेशो भवति । मी इति मीनातिमिनोत्योर्द्वयोरपि ग्रहणमिष्यते । मित्सति । प्रमित्सति । मा इति गामादाग्रहणेष्वविशेषः - मित्सते । अपमित्सते । घु-दित्सति । धित्सति। रभ - आरिप्सते । लभ - आलिप्सते । शक - शिक्षति पत-पित्सति । पद - प्रपित्सते । सनीति किम्? दास्यति । सीत्येव - पिपतिषति। तनिपतिदरिद्राणामुपसंख्यानमिति पतेरिडागमविकल्पः । सनि राधोहिंसायामच इस्वक्तव्यः । प्रतिरित्सति । हिंसायामिति किम्? आरिरात्सति ॥

३५७१. आप्ज्ञप्यृधामीत् ॥ ५५ ॥

आप् ज्ञपि ऋध् इत्येतेषामङ्गानामच ईकारादेशो भवति सनि सकारादौ परतः । आप् - ईप्सति । ज्ञपि - ज्ञीप्सति । ऋध्-ईर्त्सति । ज्ञपेर्द्वावचौ, तत्र णेः पूर्वविप्रतिषेधेन लोप इतरस्य त्वीत्वम् । सनीत्येव । प्राप्स्यति । सीत्येव । जिज्ञपयिषति। अर्दिधिषति । सनीवन्तर्द्धेति ज्ञपेः ऋधेश्चेटो विकल्पः ॥

३५७२. दम्भ इच्च ॥ ५६ ॥

दम्भेरच इकारादेशो भवति चकारादीच्च सनि सकारादौ परतः । धीप्सति । धिप्सति । सीत्येव - दिदम्भिषति ॥

३५७३. मुचोऽकर्मकस्य गुणो वा ॥ ५७ ॥

मुचोऽकर्म्मकस्य गुणो वा भवति सनि सकारादौ परतः । हलन्ताच्चेति कित्त्वप्रतिषेधो विकल्प्यते । मोक्षते वत्सः स्वयमेव । मुमुक्षते वत्सः स्वयमेव । अकर्म्मकस्येति किम्? मुमुक्षति वत्सं देवदत्तः । कर्म्मकर्तरि मुचिरकर्मको भवति कर्मविशेषस्याऽविवक्षितत्त्वाद्वा ॥

३५७४. अत्र लोपोऽभ्यासस्य ॥ ५८ ॥

यदेतत्प्रक्रान्तं सनि मीमेत्यादि मुचोऽकर्मकस्येति यावत्, अत्राभ्यासलोपो भवति । तथैवोदाहृतम् । अभ्यासस्येत्येतच्चाधिकृतं वेदितव्यमाध्यायपरिसमाप्तेः । इत उत्तरं यद्वक्ष्यामोऽभ्यासस्येत्येवं तद्वेदितव्यम् । वक्ष्यति - ह्रस्वः । डुढौकिषते । तुत्रौकिषते । सनि मीमाघुरभलभशकपतपदामच इस् अभ्यासलोपश्चेत्येवं सिद्धे यदत्रग्रहणमिह क्रियते तद्विषयावधारणार्थमत्रैवाभ्यासलोपो भवति, सन्वद्भावविषये न भवति - अमीमपत् । अदीदपत्।

सन्वल्लघुनि चङ्परे इति सन्वद्भावात्प्राप्नोति। सर्वस्याभ्यासस्यायं लोप इष्यते, तदर्थमेव केचिदत्रग्रहणं वर्णयन्ति । नानर्थकेऽलोन्त्यविधिरित्यपरे सर्वस्य कुर्वन्ति ॥

३५७५. ह्रस्वः ॥ ५९ ॥

ह्रस्वो भवत्यभ्यासस्य । डुढौकिषते । तुत्रौकिषते । डुढौके । तुत्रौके । अडुढौकत् । अतुत्रौकत् । अभ्यासस्यानचि । अभ्यासस्य यदुच्यते अनचि तद्भवतीति वक्तव्यम् । चराचरः । चलाचलः । पतापतः । वदावदः । हलादिः शेषो न भवति ॥

३५७६. हलादिः शेषः ॥ ६० ॥

अभ्यासस्य हलादिः शिष्यते अनादिर्लुप्यते । जग्लौ । मम्लौ । पपाच । पपाठ । आट। आटतुः । आटुः । आदिशेषनिमित्तोऽयमनादेर्लोपो विधीयते । तत्राभ्यासजातेराश्रयणात् क्वचिदपि वर्त्तमानो हलादिरनादेः षूर्वत्र निवृत्तिं करोति । अपरे ब्रुवते-शेषशब्दोऽयं निवृत्त्या विशिष्टमवस्थानमाह । तदवस्थानमुक्तितो यद्यपि प्रधानमवियेयत्वात्तु तदप्रधानम् । निवृत्तिरेव तु विधेयत्वात् प्रधानम् । तत्रायमर्थोऽस्य जायते-अभ्यासस्यानादेर्हलो निवृत्तिर्भवतीति । सा किमित्यादेरविधेयां सतीमनिवृत्तिमपेक्षिष्यत इति ॥

३५७७. शर्पूर्वाः खयः ॥ ६१ ॥

अभ्यासस्य शर्पूर्वाः खयः शिष्यन्ते, अन्ये हलो लुप्यन्ते । चुश्च्योतिषति । तिष्ठासति। पिस्पन्दिषते । शर्पूर्वा इति किम्? पपाच । खय इति किम्? सस्रौ । खर्पूर्वाः खय इति वक्तव्यम् । उचिच्छिषतीत्यत्र उच्छेरन्तरङ्गत्वात्तुकि कृते द्विर्वचनं, तत्र हलादिः शेषे सत्यभ्यासे तकारः श्रूयेत ॥

३५७८. कुहोश्चुः ॥ ६२ ॥

अभ्यासस्य कवर्गहकारयोश्चवर्गादेशो भवति । चकार । चखान । जगाम । जघान । हकारस्य - जहार । जिहीर्शति । जहौ ॥

३५७९. न कवतेर्यङि ॥ ६३ ॥

कवतेरभ्यासस्य यङि परतश्चुर्न भवति । कोकूयते उष्ट्रः । कोकूयते खरः । कवतेरिति विकरणनिद्र्देशः कौतेः कुवतेश्च निवृत्त्यर्थः । तयोश्चुत्वमेव भवति - चोकूयते । यङीति किम्? चुकुवे ॥

३५८०. कृषेश्छन्दसि ॥ ६४ ॥

कृषेश्छन्दसि विषये यङि परतोऽभ्यासस्य चुर्न भवति । करीकृष्यते यज्ञकुणपः। छन्दसीति किम्? चरीकृष्यते कृषीवलः ॥

३५८१. दाधर्तिदर्द्धर्तिदर्द्धर्षिबोभूतुतेतिक्तेऽलर्ष्यापनीफणत्संसनिष्य-दत्करिक्रत्कनिक्रदद्भरिभ्रद्दविध्वतोदविद्युतत्तरित्रतः सरीसृपतंवरीवृजन्मर्मृ-ज्यागनीगन्तीति च ॥६५॥

दाधर्त्ति दर्धर्ति दर्द्धर्षि बोभूतु तेतिक्ते अलर्षि आपनीफणत् संसनिष्यदत् करिक्रत् कनिक्रदत् भरिभ्रत् दविध्वतः दविद्युतत् तरित्रतः सरीसृपतं वरीवृजत् मर्मृज्य आगनीगन्ति इत्येतानि अष्टादश छन्दसि विषये निपात्यन्ते । दाधर्ति दर्द्धर्ति दर्द्धर्षीति धारयतेर्धृञो वा श्लौ यङ्लुकि वा अभ्यासस्य दीर्घत्वं णिलोपश्च । दाधर्ति । एवं दर्द्धर्ति । श्लौ रुगभ्यासस्य निपात्यते। तदा दर्द्धर्षीति । अत्र च यल्लक्षणेनानुपपन्नं तत्सर्वं निपातनात्सिद्धम्, बोभूत्विति । भवतेर्यङ्लुगन्तस्य लोटि गुणाभावो निपात्यते । नैतदस्ति प्रयोजनम्, अत्र भूसुवोस्तिङीति गुणाभावः सिद्धः? ज्ञापनार्थं तर्हि निपातनमेतत् । ज्ञापयति-अन्यत्र यङ्लुगन्तस्य गुणप्रतिषेधो न भवतीति-बोभोति । बोभवीति । तेतिक्ते । तिजेर्यङ्लुगन्तस्यात्मनेपदं निपात्यते । यङो ङित्वात्प्रत्ययलक्षणेनात्मनेपदं सिद्धमेव । ज्ञापनार्थं त्वात्मनेपदनिपातनमन्यत्र यङ्लुगन्तादात्मनेपदं न भवति । अलर्षीति । इयर्त्तेर्लटि सिपि अभ्यासस्य हलादिः शेषापवादो रेफस्य लत्वं निपात्यते । सिपा निर्द्देशोऽतन्त्रं, तिप्यपि दृश्यते-अलर्त्ति दक्षः । आपनीफणदिति। फणतेराङ्पूर्वस्य यङ्लुगन्तस्य शतर्यभ्यासस्य नीग्निपात्यते। संसनिठ्यददिति । स्यन्देः संपूर्वस्य यङ्लुक् शतयवाभ्यासस्य निक, धातुसकारस्य षत्वम् निपात्यते । न चास्य संपूर्वता तन्त्रम्, अन्यत्रापि हि दृश्यते-आसनिष्यददिति। करिक्रददिति करोतेर्यङ्लुगन्तस्य शतरि चुत्वाभावोऽभ्यासककारस्य रिगागमो निपात्यते। कनिक्रददिति । क्रन्देर्लुङि च्लेरङादेशो द्विर्वचनमभ्यासस्य चुत्वाभावो निगगमश्च निपात्यते । तथा चास्य विवरणं कृतम्-अक्रन्दीदिति भाषायाम् । भरिभ्रदिति बिभ्रतेर्यङ्लुगन्तस्य शतरिभृत्रामिति इत्वाभावो जश्त्वाभावोऽभ्यासस्य रिगागमो निपात्यते । दविध्वत इति ध्वरतेर्यङ्लुगन्तस्य शतरि जसि रूपमेतत् । अत्राभ्यासस्य विगागम ऋकारलोपश्च निपात्यते । दविध्वतो रश्मयः सूर्यस्य । दविद्युतदिति द्युतेर्यङलुगन्तस्य शतरि अभ्यासस्य सम्प्रसारणाभावः, अत्वं विगागमश्च निपात्यते । तरित्रत इति तरतेः शतरि श्लौ षष्ठ्येकवचनेऽभ्यासस्य रिगागमो निपात्यते। सरीसृपतमिति सृपेः शतरि श्लौ द्वितीयैकवचनेऽभ्यासस्य रीगागमो निपात्यते । वरीवृजदिति वृजेःशतरि श्लौ रीगागमो निपात्यतेऽभ्यासस्य । मर्मृज्येति मृजेर्लिटि णलि अभ्यासस्य

रुगागमो धातोश्च युगागमो निपात्यते । ततो मृजेर्वृद्धिर्न भवत्यलघूपधत्वात् । लघूपधगुणे प्राप्ते वृद्धिरारभ्यते । आगनीगन्तीति आङ्पूर्वस्य गमेर्लटि श्लौ अभ्यासस्य चुत्वाभावो नीगागमश्च निपात्यते । वक्ष्यन्ति वेदा गनीगन्ति कर्णम् । इतिकरणमेवंविधानामन्येषामप्युपसंग्रहार्थम् ॥

३५८२. उरत् ॥ ६६ ॥

ऋवर्णान्तस्याभ्यासस्याकारादेशो भवति । ववृते । ववृधे । नर्नर्ति । नरिनर्त्ति । नरीनर्त्ति इत्येवमादौ अभ्यासविकारेषु अपबादो नोत्सर्गान् विधीन् बाधत इत्युरदत्वे कृते रुगादय आगमाः क्रियन्ते ॥

३५८३. द्युतिस्वप्योः संप्रसारणम् ॥ ६७ ॥

द्यति स्वापि इत्येतयोरभ्यासस्य संप्रसारणं भवति । विदिद्युते । व्यदिद्युतत् । विदिद्योतिषते । विदिद्युतिषते । विदेद्युत्यते । स्वापेः - सुष्वापयिषति । स्वापिपर्य्यन्तो गृह्यते, तस्याभ्यासनिमित्तेन प्रत्ययेनानन्तर्ये सति संप्रसारणमिष्यते । इह न भवति- स्वापयतेर्ण्वुल्स्वापकः, तस्मात्क्यचि स्वापकीयति । स्वापकीयतेः सन्-सिष्वापकीयिषति ॥

३५८४. व्यथो लिटि ॥ ६८ ॥

व्यथेर्लिटि परतोऽभ्यासस्य संप्रसारणम् भवति । विव्यथे । विव्यथाते । विव्यथिरे । हलादिः शेषेण यकारस्य निवृत्तौ प्राप्तायां संप्रसारणं क्रियते । वकारस्य न संप्रसारणे संप्रसारणमिति प्रतिषिध्यते । लिटीति किम्? वाव्यथ्यते ॥

३५८५. दीर्घ इणः किति ॥ ६९ ॥

इणोऽङ्गस्य योऽभ्यासस्तस्य दीर्घो भवति किति लिटि परतः । ईयतुः । ईयुः । इणो यणिति यणादेशे कृते स्थानिवद्भावात् द्विर्वचनम् । कितीति किम्? इयाय । इययिथ ॥

३५८६. अत आदेः ॥ ७० ॥

अभ्यासादेरकारस्य दीर्घो भवति लिटि परतः अतो गुणे पररूपत्वस्यापवादः । आट । आटतुः । आटुः । आदेरिति किम्? पपाच । पपाठ ॥

३५८७. तस्मान्नुड् द्विहलः ॥ ७१ ॥

तस्मादतोऽभ्यासाद्दीर्घीभूतादुत्तरस्य द्विहलोऽङ्गस्य नुडागमो भवति । आनङ्ग। आनङ्ग्तुः । आनङ्गुः । आनञ्ज । आनञ्जतुः । आनञ्जुः । द्विहल इति किम्? आट । आटतुः । आटुः । ऋकारैकदेशो रेफो-हल्ग्रहणेन गृह्यते । तेनेहापि द्विहलोऽङ्गस्य नुडागमो भवति - आनृधतुः । आनृधुः ॥

३५८८. अश्नोतेश्च ॥ ७२ ॥

अश्नोतेश्च दीर्घीभूतादभ्यासादुत्तरस्य नुडागमो भवति । व्यानशे । व्यानशाते। व्यानशिरे। अश्नोतेरिति विकरणनिर्देशः अश्नातेर्मा भूदिति-आश । आशतुः । आशुः ॥

३५८९. भवतेरः ॥ ७३ ॥

भवतेरभ्यासस्याकारादेशो भवति लिटि परतः । बभूव । बभूवतुः । बभूवुः । भवतेरिति धातुनिर्देशादिहापि भवति - अनुबभूवे कम्बलो देवदत्तेन । बभूवे । लिटीत्येव । बुभूषति । बोभूयते ॥

३५९०. ससूवेति निगमे ॥ ७४ ॥

ससूव इति निपात्यते । सूतेर्लिटि परस्मैपदं वुगागमोऽभ्यासस्य चात्वं निपात्यते । ससूव स्थविरं विपश्चिताम् । सुषुवे इति भाषायाम् ॥

३५९१. निजां त्रयाणां गुणः श्लौ ॥ ७५ ॥

निजादीनां त्रयाणामभ्यासस्य गुणो भवति श्लौ सति । निजिर-नेनेक्ति । विजिर-वेवेक्ति । विष्लृ-वेवेष्टि । त्रिग्रहणमुत्तरार्थम् । एषां हि वृत्करणं समाप्त्यर्थं पट्यत एवेति । श्लाविति किम्? निनेज ॥

३५९२. भृञामित् ॥ ७६ ॥

भृञादीनां त्रयाणामभ्यासस्येकारादेशो भवति श्लौ सति । भृञ्-बिभर्ति । माङ-मिमीते । ओहाङ-जिहीते । त्रयाणामित्येव । जहाति । श्लावित्येव । बभार ॥

३५९३. अत्तिर्पिपर्त्योश्च ॥ ७७ ॥

अति पिपर्त्ति इत्येतयोरभ्यास्वयेकारादेशो भवति श्लौ । इयर्ति धूमम् । विपर्त्ति सोमम् ॥

३५९४. बहुलं छन्दसि ॥ ७८ ॥

छन्दसि विषयेऽभ्यासस्य श्लौ बहुलमिकारादेशो भवति । पूर्णा विवष्टि । वशेरेतद्रूपम् । तथा वचेः - जनिमा विवक्ति । सचेः - वत्सम् न माना सिषक्ति । जिघरिति सोमम् । न च भवति - ददातीत्येवं भ्रूयात् । जजनमिन्द्रम् माता यद्वीरं दधनद्धनिष्टा ॥

३५९५. सन्यतः ॥ ७९ ॥

सनि परतोऽकारान्ताभ्यासस्येकारादेशो भवति । पिपक्षति । यियक्षति । तिष्ठासति । पिपासति । सनीति किम्? पपाच । अत इति किम्? लुलूषति । तपरकरणं किम्? पापचिषते॥

३५९६. ओः पुयण्ज्यपरे ॥ ८० ॥

सनीति वर्त्तते इदिति च । उवर्णान्ताभ्यासस्य पवर्गे यणि जकारे चावर्णपरे परत इकारादेशो भवति सनि प्रत्यये परतः । पवर्गेपरे-पिपविषते । पिपावयिषति । बिभावयिषति । यण्यपरे-यियविषति । यियावयिषति । रिरावयिषति । लिलावयिषति । उयपरेज्जु इति सौत्रोऽयं धातुः - जिजावयिषति । एतदेव पुयण्ज्यपर इति वचनं ज्ञापकमद्विर्वचननिमित्तेऽपि णौ स्थानिवद्भवतीति । ओरिति किम्? पापच्यतेः सन्-पापचिषते । पुयण्जीति किम्? अवनुनावयिषति । जुहावयिषति । अपर इति किम्? बुभूषति ॥

३५९७. स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा ॥ ८१ ॥

स्रवति शृणोति द्रवति प्रवति प्लवति च्यवति इत्येतेषामभ्यासस्य ओरर्णपरे यणि वा इकारादेशो भवति सनि परतः । सिस्रावयिषति । सुस्रावयिषति । शृणोति-शिश्रावयिषति । शुश्रावयिषति । द्रवति-दिद्रावयिषति । दुद्रावयिषति । प्रवति-पिप्रावयिषति । पुप्रावयिषति । प्लवति-पिप्लवयिषति । पुप्लावयिषति । च्यवति-चिच्यावयिषति । चुच्यावयिषति । वचनसामर्थ्यादेकेन वर्णेन यणो व्यवधानमाश्रीयते । पूर्वसूत्रे त्वनन्तर एव यणि भवितव्यमित्यप्राप्तविभाषेयम् । अपर इत्येव । सुस्रूषति । शुश्रूषते ॥

३५९८. गुणो यङ्लुकोः ॥ ८२ ॥

यङि यङ्लुकि च इगन्तस्याभ्यासस्य गुणो भवति । चेचीयते । लोलूयते । यङ्लुकि-जोहवीति । यङो वेतीड्विकल्पः । चोक्रुशीति ॥

३५९९. दीर्घोऽकितः ॥ ८३ ॥

अकितोऽभ्यासस्य दीर्घो भवति यङि यङलुकि च । पापच्यते । पापचीति । यायज्यते । यायजीति । अकित इति किम्? यंयम्यते । यंयमीति । रंरम्यते । रंरमीति। ननु चात्रापवादत्वान्नुकि कृतेऽभ्यासस्यानजन्तत्वादेव दीर्घत्वं न भविष्यति? एवं तर्ह्यकित इत्यनेनैतज् ज्ञाप्यते-अभ्यासविकारेष्वपवादा नोत्सर्गान् विधीन् बाधन्त इति । किमेतस्य ज्ञापने प्रयोजनम? डोढौक्यत इत्यत्र दीर्घोऽकित इत्यनेन संध्यक्षरह्रस्वो न बाध्यते, अचीकरदित्यत्र दीर्घो लघोरित्यनेन सन्वदित्वं न बाध्यते, मान्प्रभृतीनां दीर्घेण सनीत्वं न बाध्यते-मीमांसते, ई च गण इतीत्वेन हलादिः शेषो न बाध्यते-अजीगणत् ॥

३६००. नीग्वञ्चुस्रंसुध्वंसुभ्रंसुकसपतपदस्कन्दाम् ॥ ८४ ॥

वञ्चु स्रंसु ध्वंसु भ्रंसु कस पत पद स्कन्द इत्येतेषामभ्यासस्य् नीगागमो भवति यङि यङलुकि च । वञ्चु-वनीवच्यते । वनीवञ्चीति । स्रंसु-सनीस्रस्यते। सनीस्रंसीति । ध्वंसु-दनीध्वस्यते । दनीध्वंसीति । भ्रंसु-बनीभ्रस्यते । बनीभ्रंसीति। कस-धनीकस्यते । धनीकसीति। पत-पनीपत्यते । पनीपतीति । पद-पनीपद्यते। पनीपदीति । स्कन्द-चनीस्कद्यते । चनीस्कन्दीति ॥

३६०१. नुगतोऽनुनासिकान्तस्य ॥ ८५ ॥

अनुनासिकान्तस्याङ्गस्य योऽभ्यासस्तस्याकारान्तस्य नुगागमो भवति यङ्यलुकोः परतः। तंतन्यते । तंतनीति । जंगम्यते । जंगमीति । यंयम्यते । यंयमीति । रंरम्यते। रंरमीति । नुगित्येतदनुस्वारोपलक्षणार्थं द्रष्टव्यम् । स्थानिना ह्यादेशो लक्ष्यते । तेन यंयम्यत इत्येवमादावझल्परत्वेऽप्यनुस्वरो भवति ॥ पदान्तवच्चेति वक्तव्यम् ॥ वा पादान्तस्येति परसवर्णविकल्पो यथा स्यादिति । अत इति किम्? तेतिम्यते । तपरकरणं तु भूतपूर्वस्यापि दीर्घस्य निवृत्त्यर्थम् । बाभाम्यते । अनुनासिकान्तस्येति किम्? पापच्यते ॥

३६०२. जपजभदहदशभञ्जपशां च ॥ ८६ ॥

जप जभ दह दश भञ्ज पश इत्येतेषामभ्यासस्य नुगागमो भवति यङ्यङ्लुकोः परतः । जप-जंजप्यते । जंजपीति । जभ-जंजभ्यते । जंजभीति । दह-दंदह्यते। दंदहीति । दश-

दंदश्यते। दंदशीति । दश इति दंशिरयं नकारलोपार्थमेव निर्दिष्टः । तेन यङ्लुक्यपि नकारलोपो भवति । भञ्ज-बंभज्यते । बंभञ्जीति । पश इति सौत्रो धातुः । पंपश्यते । पंपशीति ॥

३६०३. चरफलोश्च ॥ ८७ ॥

चर फल इत्येतयोरभ्यासस्य नुगागमो भवति यङ्यङ्लुकोः परतः । चंचूर्यते । चंचुरीति। पंफुल्यते । पंफुलीति ॥

३६०४. उत्परस्यातः ॥ ८८ ॥

चरफलोरभ्यासात्परस्यात उकारादेशो भवति यङयङ्लुकोः परतः । चंचूर्यते । चंचुरीति । पंफुल्यते । पंफुलीति । परस्येति किम्? अभ्यासस्य मा भूत् । अत इति किम्? अलोऽन्त्यस्य मा भूत् । उदिति तपरकरणं-चंचूर्ति, पंफुलीति इत्यत्र लघूपधगुणनिवृत्त्यर्थम् । दीर्घस्यासिद्धत्वादिह लघुत्वम् न निवर्त्तते ॥

३६०५. ति च ॥ ८९ ॥

तकारादौ प्रत्यये परतश्चरफलोरकारस्य उकारादेशो भवति । चरणं चूर्त्तिः । ब्रह्मणश्चूर्त्तिः । प्रफुल्तिः । प्रफुल्ताः सुमनसः । यङ्यङ्लुकोरभ्यासस्येति चानुवर्त्तमानमपि वचनसामर्थ्यादिह नाभिसंबध्यते ॥

३६०६. रीगृदुपधस्य च ॥ ९० ॥

ऋदुपधस्याङ्गस्य योऽभ्यासस्तस्य रीगागमो भवति यङ्यङ्लुकोः परतः । वरीवृत्यते । वरीवृद्ध्यते । वरीवृतीति । वरीवृधीति । नरीनृत्यते । नरीनृतीति । रीगृत्वत इति वक्तव्यम् । इहापि यथा स्यात्-वरीवृश्च्यते । परीपृच्छ्यते ॥

३६०७. रुग्रिकौ च लुकि ॥ ९१ ॥

यङ्लुकि ऋदुपधस्याङ्गस्य योऽभ्यासस्तस्य रुग्रिकावागमौ भवतश्चकाराद्रीक्च। नर्नर्त्ति। नरिनर्त्ति । नरीनर्त्ति । वर्वर्त्ति । वरिवर्त्ति । वरीवर्त्ति । उकार उच्चारणार्थः। मर्मृज्यते मर्मृज्यमानास इत्युपसंख्यानम् । मर्मृज्यते । मर्मृज्यमानासः ॥

३६०८. ऋतश्च ॥ ९२ ॥

ऋकारान्तस्याङ्गस्य योऽभ्यासस्तस्य रुग्रिकावागमौ भवतो रीक्च यङ्लुकि। चर्कर्ति । चरिकर्त्ति । चरीकर्त्ति । जर्हर्त्ति । जरिहर्ति । जरीहर्त्ति । तपरकरणं किम्? किरतेश्चाकर्त्ति॥

किरति चर्क्करीतान्तं पचतीत्यत्र यो नयेत् ।

प्राप्तिज्ञं तमहं मन्ये प्रारब्धस्तेन संग्रहः ॥

ततेयं प्राप्तिस्तपरकरणसामर्थ्यादङ्गविशेषणमृत इत्येतत्तथाप्राप्तिः किरतेरुगादीनामिति॥

३६०९. सन्वल्लघुनि चङ्परेऽनग्लोपे ॥ ९३ ॥

लघुनि धात्वक्षरे परतो योऽभ्यासस्तस्य चङ् परे णौ परतः सनीव कार्य भवति अनग्लोपे। सन्यत इत्युक्तं चङ्परेऽपि तथा-अचीकरत् । अपीपचत् । ओः पुयण्ज्यपर इत्युक्तं चङ्परेऽपि तथा-अपीपवत् । अलीलवत् । अजीजवत् । स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वेत्युक्तं चङ्परेऽपि तथा-असिस्रवत् । असुस्रवत् । अशिश्रवत् । अशुश्रवत् । अदिद्रवत् । अदुद्रवत् । अपिप्रवत् । अपुप्रवत् । अपिप्लवत् । अपुप्लवत् । अचिच्यवत् । अचुच्यवत् । लघुनीति किम्? अततक्षत्। अररक्षत् । जागरयतेः - अजजागरत् । अत्र केचिद् गशब्दं लघुमाश्रित्य सन्वद्भावमिच्छन्ति, सर्वत्रैव लघोरानन्तर्यमभ्यासेन नास्तीति व्यवधानेऽपि वचनप्रामाण्याद्भवितव्यम्, तदसत् । येन नाव्यवधानं तेन व्यवहितेपि वचनप्रामाण्यादित्येकेन व्यवधानमाश्रीयते न पुनरनेकेन । यद्येवं, कथमचिक्षणदिति? अचार्यप्रवृत्तिर्ज्ञापयति भवत्येवञ्जातीयकानामित्वमिति, यदयं तद्बाधनार्थं स्मरत्यादीनामत्वं विदधाति । चङ्पर इति किम्? अहं पपच । परग्रहणं किम्? चङ्येव केवले मा भूत्-अचकमत । अनग्लोप इति इति किम्? अचकथत् । दृषदमाख्यातवान् अददृषत् । वादितवन्तं प्रयोजितवान् अवीवददित्यत्र योऽसौ णौ णेर्लोपो नासावग्लोप इत्याश्रीयते । किं कारणम्? चङ्पर इति णिजातेर्निमित्तत्वेनाक्षेपात्ततोन्यस्याको लोपः परिगृह्यते । मीमादीनामत्रग्रहणात् सन्वद्भावेनाभ्यासलोपो न भवतीत्युक्तम् । किञ्च सन्वदिति सनाश्रयं कार्यमतिदिश्यते। न च लोपः सनमेवापेक्षते किं तर्हि? इस्भावाद्यपि । तदभावादमीमपदित्यादावभ्यास-लोपो न भविष्यति ॥

३६१०. दीर्घो लघोः ॥ ९४ ॥

दीर्घो भवति लघोरभ्यासस्य लघुनि णौ चङ्परेऽनग्लोपे । अचीकरत् । अजीहरत् । अलीलवत् । अपीपचत् । लघोरिति किम्? अबिभ्रजत् । लघुनीत्येव । अततक्षत् । अररक्षत् । चङीत्येव । अहं पपच । पर इत्येव । अचकमत । अनग्लोप इत्येव । अचकथत् ॥

३६११. अत्स्मृदृत्वरप्रथम्रदस्तॄस्पशाम् ॥ ९५ ॥

स्मृ दृ त्वर प्रथ म्रद स्तृ स्पश इत्येतेषामभ्यासस्यादित्ययमादेशो भवति चङ्परे णौ परतः । स्मृ-असस्मरत् । दृ - अददरत् । त्वर-अतत्वरत् । प्रथ-अपप्रथत् । म्रद्-अममम्रदत् । स्तृ-अतस्तरत् । स्पश-अपस्पशत् । सन्वद्भावादित्त्वं प्राप्तमनेन बाध्यते । तपरकरणसामर्थ्यादति कृते दीर्घो लघोरित्येतदपि न भवति-अददरत् ॥

३६१२. विभाषा वेष्टिचेष्ट्योः ॥ ९६ ॥

वेष्टि चेष्टि इत्येतयोरभ्यासस्य विभाषा अदित्ययमादेशो भवति चङ्परे णौ परतः । अववेष्टत् । अविवेष्टत् । अचचेष्टत् । अचिचेष्टत् । भ्यासह्रस्वत्वे कृते अत्वं पक्षे भवति ॥

३६१३. ई च गणः ॥ ९७ ॥

गणेरभ्यासस्य ईकारादेशो भवति चङ्परे णौ परतः चकारादच्च । अजीगणत् । अजगणत् ॥

इति वामनविरचितायाम् काशिकायां वृत्तौ
सप्तमाध्यायस्य चतुर्थः पादः ॥ ७ ॥ ४ ॥

समाप्तोऽध्यायश्च सप्तमः ॥ ७ ॥

अथ अष्टमाध्यायस्य

प्रथमः पादः

३६१४. सर्वस्य द्वे ॥ १ ॥

सर्वस्येति च द्वे इति चैतदधिकृतं वेदितव्यम् । इत उत्तरं यद्वक्ष्यामः पदस्येत्यतः प्राक् सर्वस्य द्वे भवत इत्येवं तद्वेदितव्यम् । वक्ष्यति-नित्यवीप्सयोरिति । तत्र सर्वस्य स्थाने द्वे भवतः । के द्वे भवतः? ये शब्दतश्चार्थतश्चोभयथान्तरतमे, एकस्य पचतिशब्दस्य द्वौ पचतिशब्दौ भवतः । पचति पचति । ग्रामो ग्रामो रमणीयः । यदा तु द्विःप्रयोगो द्विर्वचनं तदा स एव पचतिशब्दो द्विरावर्त्तते, तस्य द्वे आवृत्ती भवतः । सर्वस्येति किम्? विस्पष्टार्थम् । अथ पदस्येत्येव कस्मान्नोच्यते? नैवं शक्यमिह हि न स्यात् प्रपचति प्रपचतीति (१) । इह द्रोग्धा (२) द्रोढा इति घत्वढत्वयोरसिद्धत्वादकृतयोरेव तयोर्द्विवचनं प्राप्नोति, तत्र पश्चाद्विकल्पे सत्यनिष्टमपि स्यात्-द्रोग्धा द्रोढा । द्रोढा द्रोग्धेति । तस्माद्वक्तव्यमेतत् पूर्वत्रासिद्धीयमद्विर्वचन इति । सर्वस्येत्येतदेव वा कृतं सर्वकार्यप्रतिपत्त्यर्थं (३) द्रष्टव्यम् ॥

३६१५. तस्य परमाम्रेडितम् ॥ २ ॥

तस्य द्विरुक्तस्य यत्परं शब्दरूपं तदाम्रेडितसंज्ञं भवति । चौर चौर चौर । वृषल वृषल वृषल । दस्यो दस्यो दस्यो घातयिष्यामि त्वा, बन्धयिष्यामि त्वा । आम्रेडितप्रदेशा "आम्रेडितं भर्त्सने" इत्येवमादयः ॥

३६१६. अनुदात्तं च ॥ ३ ॥

अनुदात्तं च तद्भवति यदाम्रेडितसंज्ञम् । भुङ्क्ते भुङ्क्ते । पशून् पशून् ॥

३६१७. नित्यवीप्सयोः ॥ ४ ॥

नित्ये चार्थे वीप्सायां च यद्वर्त्तते तस्य द्वे भवतः । केषु नित्यता? तिङ्क्षु अव्ययकृत्सु (४) च । कुत एतत्? आभीक्ष्ण्यमिह नित्यता । आभीक्ष्ण्यं च क्रियाधर्मः । यां क्रियां कर्त्ता प्राधान्येनानुपरमन् करोति तन्नित्यम् । पचति पचति। जल्पति जल्पति । भुक्त्वा भुक्त्वा व्रजति । भोजं भोजं व्रजति । लुनीहि लुनीहीत्येवायं लुनाति । क्त्वाणमुलोर्लोटश्च द्विर्वचनापेक्षायामेव पौनःपुन्यप्रकाशने शक्तिः । यङ् तु तन्निरपेक्षः प्रकाशयति-पुनः पुनः पचति पापच्यत (१) इति । यदा तु तत्र द्विर्वचनं तदा क्रियासमभिहारे

पौनःपुन्यं द्रष्टव्यं पापच्यते पापच्यत इति । अथ केषु वीप्सा? सुप्सु वीप्सा । का पुनः सा? व्याप्तिविशेषविषया प्रयोक्तुरिच्छा वीप्सा । का पुनरसौ? नानावाचिनामधिकरणानां (२) क्रियागुणाभ्यां युगपत्प्रयोक्तुर्व्याप्तुमिच्छा वीप्सा । नानाभूतार्थवाचिनां शब्दानां यान्यधिकरणानि वाच्यानि तेषां क्रियागुणाभ्यां युगपत्प्रयोक्तुमिच्छा वीप्सा । ग्रामो ग्रामो रमणीयः । जनपदो जनपदो रमणीयः। पुरुषः पुरुषो (३) निधनमुपैति । यत्तिङन्तं नित्यतया प्रकर्षेण च युक्तं ततः कृतद्विर्वचनात् प्रकर्षप्रत्यय इष्यते । पचति पचतितरामिति। इह तु आढ्यतरमाढ्यतरमानयेति प्रकर्षयुक्तस्य वीप्सायोग इष्यते ॥

३६१८. परेर्वर्जने ॥ ५ ॥

परीत्येतस्य वर्जनेऽर्थे द्वे भवतः । परि परि त्रिगर्तेभ्यो वृष्टो देवः । परि परि सौवीरेभ्यः। परि परि सर्वसेनेभ्यः । वर्जनं परिहारः । वर्जन इति किम्? ओदनं परिषिञ्चति । परेर्वर्जनेऽसमासे वेति वक्तव्यम् । परि परि त्रिगर्तेभ्यो वृष्टो देवः । परि त्रिगर्तेभ्यः । समासे तु तेनैवोक्तत्वाद्वर्जनस्य नैव भवति-परित्रिगर्त्तं वृष्टो देव इति ॥

३६१९. प्रसमुपोदः पादपूरणे ॥ ६ ॥

प्र सम् उप उत् इत्येतेषां पादपूरणे द्वे भवतो द्विर्वचनेन चेत्पादः पूर्यते । प्रप्रायमग्निर्भरतस्य शृण्वे । संसमिद्युवसे वृषन् । उपोप मे परामृश । किं नोदुदु हर्षसे दातवा उ। (४) पादपूरण इति किम्? प्र देवं देव्या धिया । सामर्थ्याच्छन्दस्ये-वैतद्विधानम् । भाषायामनर्थकं स्यात् प्रयोगाभावात् ॥

३६२०. उपर्यध्यधसः सामीप्ये ॥ ७ ॥

उपरि अधि अधस् इत्येतेषां द्वे भवतः सामीप्ये विवक्षिते । सामीप्यं (५) प्रत्यासत्तिः, कालकृता देशकृता च । (६) उपर्युपरि दुःखम् । उपर्युपरि ग्रामम् । अध्यधि ग्रामम् । अधोधो नगरम् । सामीप्य इति किम्? उपरि चन्द्रमाः । इह कस्मान्न भवति-उपरि शिरसो घटं धारयति? औत्तराधर्यमेव विवक्षितं न सामीप्यमिति द्विर्वचनं न भवति ॥

३६२१. वाक्यादेरामन्त्रितस्यासूयासंमतिकोपकुत्सनभर्त्सनेषु ॥ ८ ॥

एकार्थः (१) पदसमूहो वाक्यम् । वाक्यादेरामन्त्रितस्य द्वे भवतः, असूया संमति-कोप-कुत्सन-भर्त्सन इत्येतेषु यदि तद्वाक्यं भवति । तत्र परगुणानामसहनमसूया । पूजा संमतिः । कोपः क्रोधः । निन्दनं कुत्सनम् । अपकारशब्दैर्भयोत्पादनं भर्त्सनम् । एते च प्रयोक्तृधर्मा

नाभिधेयधर्माः । असूयायां तावत्-माणवक ३ माणवक अभिरूपक ३ अभिरूपक रिक्तं ते आभिरूप्यम् । संमतौ-माणवक ३ माणवक अभिरूपक ३ अभिरूपक शोभनः खल्वसि । कोपे-माणवक ३ माणवक अविनीतक ३ अविनीतक इदानीं ज्ञास्यसि जाल्म । कुत्सने-शक्तिके ३ शक्तिके यष्टिके ३ यष्टिके रिक्ता ते शक्तिः । भर्त्सने-चौर ३ चौर वृषल३ वृषल घातयिष्यामि त्वा बान्धयिष्यामि त्वाम् । असूयादिषु स्वरितमाम्रेडितेऽसूयासंमतिकोपकुत्सनेष्विति पूर्वपदस्य प्लुतः । भर्त्सने तु "आम्रेडितं भर्त्सने" इत्याम्रेडितस्यैव प्लुतः । वाक्यादेरिति किम्? अन्तस्य मध्यस्य च मा भूत् । शोभनः खल्वसि माणवक । आमन्त्रितस्येति किम्? उदारो देवदत्तः । असूयादिष्विति किम्? देवदत्त गामभ्याज शुक्लाम् ॥

३६२२. एकं बहुव्रीहिवत् ॥ ९ ॥

एकमित्येतच्छब्दरूपं द्विरुक्तं बहुव्रीहिवद्भवति । बहुव्रीहिवत्त्वे प्रयोजनं सुब्लोपपुंवद्भावौ। एकैकमक्षरं पठति । एकैकया आहुत्या जुहोति । सर्वनामसंज्ञाप्रतिषेधस्वरसमासान्ताः समासाधिकारविहिते बहुव्रीहौ विज्ञायन्ते, तेनातिदेशिके बहुव्रीहौ न भवन्ति । एकैकस्मै । न बहुव्रीहाविति प्रतिषेधो न भवति । बहुव्रीहिरेव यो बहुव्रीहिरिति विज्ञानात् । न न । सु सु । नञ्सुभ्यामित्यन्तोदात्तत्वम् न भवति । ऋक् ऋक् । पूः पूः । ऋक्पूरिति समासान्तो न भवति॥

३६२३. आबाधे च ॥ १० ॥

आबाधनमाबाधः पीडा, प्रयोक्तृधर्मः नाभिधेयधर्मः, (२) तत्र वर्त्तमानस्य द्वे भवतः बहुव्रीहिवच्चास्य कार्यं भवति । गतगतः । नष्टनष्टः । पतितपतितः । गतगता। नष्टनष्टा । पतितपतिता । प्रियस्य चिरगमनादिना पीड्यमानः कश्चिदेवम् प्रयुङ्क्ते प्रयोक्ता ॥

३६२४. कर्मधारयवदुत्तरेषु ॥ ११ ॥

इत उत्तरेषु द्विर्वचनेषु कर्मधारयवत्कार्यं भवतीत्येतद्वेदितव्यम् । कर्मधारयत्वे प्रयोजनं सुब्लोपपुंवद्भावान्तोदात्तत्वानि । सुब्लोपः - पटुपटुः । मृदुमृदुः । पण्डितपण्डितः । पुंवद्भावः - पटुपट्वी । मृदुमृद्वी । कालककालिका । कोपधाया अपि हि कर्मधारयवद्भावात् "पुंवत्कर्म्मधारयेति" पुंवद्भावो भवति । अन्तोदात्तत्वम्-पटुपटुः पटुपट्वी । समासान्तोदात्तत्वमनेनैव विधीयत इति परत्वादाम्रेडितानुदात्तत्त्वं बाध्यते । अधिकारेणैव सिद्धे यदुत्तरेष्विति वचनं तद्विस्पष्टार्थम् ॥

३६२५. प्रकारे गुणवचनस्य ॥ १२ ॥

प्रकारो भेदः सादृश्यं च । तदिह सादृश्यं प्रकारो गृह्यते । प्रकारे वर्त्तमानस्य गुणवचनस्य द्वे भवतः । पटुपटु । मृदुमृदु । पण्डितपण्डित । अपरिपूर्णगुण इत्यर्थः । परिपूर्णगुणेन न्यूनगुणस्योपमाने सत्येवं प्रयुज्यते । जातीयरोऽनेन द्विर्वचनेन बाधनं नेष्यते । पटुजातीयः, मृदुजातीयः इत्यपि हि भवति । तत्कथम्? वक्ष्यमाणमन्यतरस्यांग्रहणमुभयोः शेषो विज्ञायते । प्रकार इति किम्? पटुर्देवदत्तः । गुणवचनस्येति किम्? अग्निर्माणवकः । गौर्वाहीकः । यद्यप्यत्राग्निशब्दो गोशब्दश्च मुख्यार्थसम्बन्धादवद्दतभेदं (१) तैक्ष्ण्यजाड्यादिकमर्थान्तरे गुणविशेषमेव प्रतिपादयितुं प्रवृत्तस्तथापि सर्वदा गुणवचनो न भवतीति न द्विरुच्यते । आनुपूर्व्ये द्वे भवत इति वक्तव्यम् । मूले मूले स्थूलाः । अग्रे अग्रे सूक्ष्माः । ज्येष्ठं ज्येष्ठं प्रवेशय । स्वार्थे अवधार्यमाणेऽनेकस्मिन् द्वे भवत इति वक्तव्यम् । अस्मात् कार्षापणादिह भवद्भ्यां माषं माषं देहि । स्वार्थ एतद्द्विर्वचनं न वीप्सायाम् । अत्र हि द्वावेव माषौ दीयेते न सर्वे कार्षापणसंबन्धिनो माषाः, तेन वीप्सा न विद्यते । अवधार्यमाण इति किम्? अस्मात् कार्षापणादिह भवद्भ्यां माषमेकं देहि । द्वौ माषौ देहि । त्रीन् वा माषान् देहि । अनेकस्मिन्निति किम्? अस्मात् कार्षापणादिह भवद्भ्यां माषमेकं देहि । चापले द्वे भवत इति वक्तव्यम् । संभ्रमेण प्रवृत्तिश्चापलम् । अहिरहिः, बुध्यस्व बुध्यस्व । नावश्यं द्वावेव शब्दौ प्रयोक्तव्यौ किं तर्हि? यावद्भिः शब्दैः सोऽर्थोऽवगम्यते तावन्तः प्रयोक्तव्याः । अहिः अहिः अहिः, बुध्यस्व बुध्यस्व बुध्यस्व इति । क्रियासमभिहारे द्वे भवत इति वक्तव्यम्। स भवान् लुनीहिलुनीहीत्येवायं लुनाति । आभीक्ष्ण्ये द्वे भवत इति वक्तव्यम् । भुक्त्वा भुक्त्वा व्रजति । भोजंभोजं व्रजति । नित्य (२) इत्येव सिद्धमिति तत्रोक्तम् । डाचि द्वे भवत इति वक्तव्यम् । पटपटा करोति । पटपटायते । अव्यक्तानुकरणडाजन्तस्य द्विर्वचनमिष्यते । इह न भवति - द्वितीया करोति, तृतीया करोति । तदर्थं केचिड्डाचि बहुलमिति पठन्ति । पूर्वप्रथमयोरर्थातिशयविवक्षायां द्वे भवत इति वक्तव्यम् । पूर्वं पूर्वं पुष्प्यन्ति । प्रथमं प्रथमं पच्यन्ते । आतिशायिकोऽपि दृश्यते - पूर्वतरं पुष्प्यन्ति । प्रथमतरं पच्यन्त इति ॥ डतरडतमयोः (१) समसंप्रधारणयोः स्त्रीनिगदे भावे द्वे भवत इति वक्तव्यम्। उभाविमावाढ्यौ, कतरा कतरा अनयोराढ्यता । सर्व इमे आढ्याः । कतमा कतमा एषामाढ्यता। डतरतडतमाभ्यामन्यत्रापि, हि दृश्यते - उभाविमावाढ्यौ, कीदृशी कीदृशी अनयोराढ्यता । तथा स्त्रीनिगदाद्भावादन्यत्रापि हि दृश्यते-उभाविमावाढ्यौ, कतरः कतरोऽनयोर्विभव इति । कर्म्मव्यतिहारे सर्वनाम्नो द्वे भवत इति वक्तव्यम् । समासवच्च बहुलम् । यदा न समासवत्प्रथमैकवचनं तदा पूर्वपदस्य । अन्यमन्यमिमे ब्राह्मणा भोजयन्ति । अन्योन्यमिमे ब्राह्मणा भोजयन्ति । अन्योऽन्यस्य ब्राह्मणा भोजयन्ति। इतरेतरं भोजयन्ति इतरेतरस्य

भोजयन्ति ॥ स्त्रीनपुंसकयोरुत्तरपदस्य चाम्भावो वक्तव्यः । अन्योन्यामिमे ब्राह्मण्यौ भोजयतः । अन्योन्यं भोजयतः । इतरेतरं भोजयतः । इतरेतरां भोजयतः । अन्योन्यामिमे ब्राह्मणकुले भोजयतः । इतरेतरामिमे ब्राह्मणकुले भोजयतः ।

३६२६. अकृच्छ्रे प्रियसुखयोरन्यतरस्याम् ॥ १३ ॥

प्रिय सुख इत्येतयोरन्यतरस्यां द्वे भवतः अकृच्छ्रे द्योत्ये । कृच्छ्रं दुःखं, तदभावोऽकृच्छ्रम् । प्रियप्रियेण ददाति(२) । सुखसुखेन ददाति । प्रियेण ददाति । सुखेन ददाति। अखिद्यमानो ददातीत्यर्थः । अकृच्छ्र इति किम्? प्रियः पुत्रः । सुखो रथः ॥

३६२७. यथास्वे यथायथम् ॥ १४ ॥

यो य आत्मा यद्यदात्मीयं तत्तद्यथास्वं तस्मिन् यथायथमिति निपात्यते । यथाशब्दस्य द्विर्वचनं नपुंसकलिङ्गता च निपात्यते । ज्ञाताः सर्वे पदार्था यथायथम् । यथास्वभावमित्यर्थः। सर्वेषां तु यथायथं यथात्मीयमित्यर्थः (३) ॥

३६२८. द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु ॥ १५ ॥

द्वन्द्वमिति द्विशब्दस्य द्विर्वचनं पूर्वपदस्याम्भावः अत्वं चोत्तरपदस्य निपात्यते रहस्य मर्यादावचन व्युत्क्रमण यज्ञपात्रप्रयोग अभिव्यक्ति इत्येतेषु अर्थेषु । तत्र रहस्यं द्वन्द्वशब्दवाच्यमितरे विषयीभूताः । द्वन्द्वं मन्त्रयन्ते (१) । मर्यादा स्थित्यनतिक्रमः । आचतुरं हीमे पशवो द्वन्द्वं मिथुनायन्ते । माता पुत्रेण मिथुनं गच्छति, पौत्रेण तत्पुत्रेणापीति मर्यादार्थः । व्युत्क्रमणे-द्वन्द्वं व्युत्क्रान्ताः । व्युत्क्रमणं भेदः, पृथगवस्थानम् । द्विवर्गसंबन्धेन पृथगवस्थिता द्वन्द्वं व्युत्क्रान्ता इत्युच्यन्ते । यज्ञपात्रप्रयोगे-द्वन्द्वं न्यञ्चि यज्ञपात्राणि प्रयुनक्ति धीरः । अभिव्यक्तौ-द्वन्द्वं नारदपर्वतौ । द्वन्द्वं संकर्षणवासुदेवौ । द्वावप्यभिव्यक्तौ साहचर्येणेत्यर्थः । अन्यत्रापि द्वन्द्वमित्येतद् दृश्यते, तदर्थं योगविभागः कर्तव्यः । द्वन्द्वं युद्धं वर्त्तते । द्वन्द्वानि सहते धीरः । चार्थे द्वन्द्व इति ॥

३६२९. पदस्य ॥ १६ ॥

पदस्येत्ययमधिकारः प्रागपदान्ताधिकारात् । यदित ऊर्ध्वमनुक्रमिष्यामः पदस्येत्येवं तद्वेदितव्यम् । वक्ष्यति-संयोगान्तस्य लोपः । पचन् । यजन् । पदस्येति किम्? पचन्तौ यजन्तौ । वक्ष्यमाणवाक्यापेक्षया पदस्याधिकृतस्य षष्ठ्यर्थव्यवस्था द्रष्टव्या-क्वचित् स्थानषष्ठी, क्वचिदवयवषष्ठी ॥

३६३०. पदात् ॥ १७ ॥

पदादित्ययमधिकारः प्राक् "कुत्सने च सुप्यगोत्रादौ" इत्येतस्मात् । यदित ऊर्ध्वमनुक्रमिष्यामः पदादित्येवं तद्वेदितव्यम् । वक्ष्यति - "आमन्त्रितस्य" । आमन्त्रितस्य पदात्परस्यानुदात्तादेशो भवतीति । पचसि देवदत्त । पदादिति किम्? देवदत्त पचसि ॥

३६३१. अनुदात्तं सर्वमपादादौ ॥ १८ ॥

अनुदात्तमिति च, सर्वमिति च, अपादादाविति च एतत् त्रयमधिकृतं वेदितव्यमापादपरिसमाप्तेः । इत उत्तरं यद्वक्ष्यामः अनुदात्तं सर्वमपादादावित्येवं तद्वेदितव्यम् । वक्ष्यति-"आमन्त्रितस्य चे" ति । पचसि देवदत्त । अपादादाविति किम्? यत्ते नियतं रजसं मृत्यो अनवधृष्यम् । "बहुवचनस्य वस्नसौ" । ग्रामो वः स्वं जनपदो नः स्वम् । अपादादाविति किम्?

रुद्रो विश्वेश्वरो देवो युष्माकं कुलदेवता ।
स एव नाथो भगवानस्माकं शत्रुमर्दनः ॥

पादग्रहणेनात्र ऋक्पादः श्लोकपादश्च गृह्यते । सर्वग्रहणं सर्वमनूद्यमानं विधीयमानं चानुदात्तं यथा स्यादिति । तेन युष्मदादेशानामपि वाक्यभेदेनानुदात्तत्वं विधीयते । युष्मदस्मदादेशाश्च सर्वस्य सुबन्तस्य पदस्य यथा स्युः । यत्रापि स्वादिषु (१) पदसंज्ञं भवति। ग्रामो वां दीयते । जनपदो नौ दीयते ॥

३६३२. आमन्त्रितस्य च ॥ १९ ॥

आमन्त्रितस्य पदस्य पदात्परस्यापादादौ वर्त्तमानस्य सर्वस्यानुदात्तो भवति । पचसि देवदत्त । पचसि यज्ञदत्त । आमन्त्रिताद्युदात्तत्वे प्राप्ते वचनम् । समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः । इह मा भूवन्-अयं दण्डो हरानेन (२) ओदनं पच तव भविष्यति । ओदनं पच मम भविष्यति । इह च यथा स्यात्-इह देवदत्त माता ते कथयति । नद्यास्तिष्ठति कूले, शालीनां त ओदनं दास्यामि इति । आमन्त्रितान्तं तिङन्तं युष्मदस्मदादेशाश्च यस्मात् पराणि न तेषां सामर्थ्यमिति तदाश्रया निघातयुष्मदस्मदादेशा न स्युः, समर्थः पदविधिरिति वचनात् ॥

३६३३. युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ ॥ २० ॥

युष्मदस्मद् इत्येतयोः षष्ठीचतुर्थीद्वितीयास्थयोर्यथासंख्यं वान्नौ इत्येतावादेशौ भवतस्तौ चानुदात्तौ । पदस्य, पदादनुदात्तं सर्वमपादादाविति सर्वमिह संबध्यते । ग्रामो वां

स्वम् । जनपदो नौ स्वम् । ग्रामो वां दीयते । जनपदो नौ दीयते । ग्रामो वां पश्यति । जनपदो नौ पश्यति । एकवचनबहुवचनान्तयोरादेशान्तरविधानाद् द्विवचनान्तयोरेतावादेशौ विज्ञायेते । षष्ठीचतुर्थीद्वितीयास्थयोरिति किम्? ग्रामे युवाभ्यां कृतम् । स्थग्रहणं श्रूयमाणविभक्त्यर्थम् । इह मा भूत् - (३) इति युष्मत्पुत्र(४) इति ॥

३६३४. बहुवचनस्य वस्नसौ ॥ २१ ॥

बहुवचनान्तयोर्युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्यथासंख्यं वस् नस् इत्येतावादेशौ भवतः । ग्रामो वः स्वम् । जनपदो नः स्वम् । ग्रामो वो दीयते । जनपदो नो दीयते । ग्रामो वः पश्यति । जनपदो नः पश्यति ॥

३६३५. तेमयावेकवचनस्य ॥ २२ ॥

युष्मदस्मदोरेकवचनान्तयोः षष्ठीचतुर्थीस्थयोर्यथासंख्यं ते मे इत्येतावादेशौ भवतः । ग्रामस्ते स्वम् । ग्रामो मे स्वम् । ग्रामस्ते दीयते । ग्रामो मे दीयते । द्वितीयान्तस्यादेशान्तरविधानसामर्थ्यात् षष्ठीचतुर्थ्योरेवायं योगः ॥

३६३६. त्वामौ द्वितीयायाः ॥ २३ ॥

एकवचनस्येति वर्त्तते । द्वितीयाया यदेकवचनं तदन्तयोर्युष्मदस्मदोर्यथासंख्यं त्वा मा इत्येतावादेशौ भवतः । ग्रामस्त्वा पश्यति । ग्रामो मा पश्यति ॥

३६३७. न चवाहाहैवयुक्ते (१) ॥ २४ ॥

च वा ह अह एव एभिर्योगे युष्मदस्मदोर्वान्नावादयो न भवन्ति । पूर्वेण प्रकरणेन प्राप्ताः प्रतिषिद्ध्यन्ते । ग्रामस्तव च स्वम् । ग्रामो मम च स्वम् । युवयोश्च स्वम् । आवयोश्च स्वम्। युष्माकं च स्वम् । अस्माकं च स्वम् । ग्रामस्तुभ्यं च दीयते । ग्रामो मह्यं च दीयते । युवाभ्यां च दीयते । आवाभ्यां च दीयते । युष्मभ्यं च दीयते । अस्मभ्यं च दीयते। ग्रामस्त्वां च पश्यति । ग्रामो मां च पश्यति । युवां च पश्यति । आवां च पश्यति । युष्मांश्च पश्यति । अस्मांश्च पश्यति । वा-ग्रामस्तव वा स्वम् । ग्रामो मम वा स्वम् । युवयोर्वा स्वम् । आवयोर्वा स्वम् । युष्माकं वा स्वम् । अस्माकं वा स्वम् । ग्रामस्तुभ्यं वा दीयते । ग्रामो मह्यं वा दीयते । युवाभ्यां वा दीयते । आवाभ्यां वा दीयते । युष्मभ्यं वा दीयते । अस्मभ्यं वा दीयते । ग्रामस्त्वां वा पश्यति । ग्रामो मां वा पश्यति । युवां वा पश्यति। आवां वा पश्यति । युष्मान् वा पश्यति । अस्मान्वा पश्यति ।

ह-ग्रामस्तव ह स्वम् । ग्रामो मम ह स्वम् । युवयोर्ह स्वम् । आवयोर्ह स्वम् । युष्माकं ह स्वम् । अस्माकं ह स्वम् । ग्रामस्तुभ्यं ह दीयते । ग्रामो मह्यं ह दीयते । युवाभ्यां ह दीयते। आवाभ्यां ह दीयते । युष्मभ्यं ह दीयते । अस्मभ्यं ह दीयते । ग्रामस्त्वां ह पश्यति । ग्रामो मां ह पश्यति । युवां ह पश्यति । आवां ह पश्यति । युष्मान् ह पश्यति । अस्मान् ह पश्यति ।

अह-ग्रामस्तवाह स्वम् । ग्रामो ममाह स्वम् । युवयोरह स्वम् । आवयोरह स्वम् । युष्माकमह स्वम् । अस्माकमह स्वम् । ग्रामस्तुभ्यमह दीयते । ग्रामो मह्यमह दीयते । युवाभ्यामह दीयते । आवाभ्यामह दीयते । युष्मभ्यमह दीयते । अस्मभ्यमह दीयते । ग्रामस्त्वामह पश्यति । ग्रामो मामह पश्यति । युवामह पश्यति । आवामह पश्यति । युष्मानह पश्यति । अस्मानह पश्यति ।

एव-ग्रामस्तवैव स्वम् । ग्रामो ममैव स्वम् । युवयोरेव स्वम् । आवयोरेव स्वम् । युष्माकमेव स्वम् । अस्माकमेव स्वम् । ग्रामस्तुभ्यमेव दीयते । ग्रामो मह्यमेव दीयते । युवाभ्यामेव दीयते । आवाभ्यामेव दीयते । युष्मभ्यमेव दीयते । अस्मभ्यमेव दीयते । ग्रामस्त्वामेव पश्यति । ग्रामो मामेव पश्यति । युवामेव पश्यति । आवामेव पश्यति । युष्मानेव पश्यति । अस्मानेव पश्यति । युक्तग्रहणं साक्षाद्योगप्रतिपत्त्यर्थम्, (२) युक्तयुक्ते प्रतिषेधो न भवति-ग्रामश्च ते स्वम् । नगरं च मे स्वम् ॥

३६३८. (१) पश्यार्थैश्चानालोचने ॥ २५ ॥

पश्यार्था दर्शनार्थाः । दर्शनं ज्ञानम् । आलोचनं चक्षुर्विज्ञानम् । तैः पश्यार्थैरनालोचने वर्त्तमानैर्युक्ते युष्मदस्मदोर्वान्नावादयो न भवन्ति । ग्रामस्तव स्वं समीक्ष्यागतः (२) । ग्रामो मम स्वं समीक्ष्यागतः । ग्रामस्तुभ्यं दीयमानं समीक्ष्यागतः । ग्रामो मह्यं दीयमानं समीक्ष्यागतः। ग्रामस्त्वां समीक्ष्यागतः । ग्रामो मां समीक्ष्यागतः । अनालोचन इति किम्? ग्रामस्त्वा पश्यति । ग्रामो मा पश्यति । पश्यार्थैर्युक्तयुक्तेऽपि च प्रतिषेध इष्यते । तथा चैवोदाहृतम् ॥

३६३९. सपूर्वायाः प्रथमाया विभाषा ॥ २६ ॥

विद्यमानपूर्वात् प्रथमान्तात् पदादुत्तरयोर्युष्मदस्मदोर्विभाषा वान्नावादयो न भवन्ति । ग्रामे कम्बलस्ते स्वम् । ग्रामे कम्बलस्तव स्वम् । ग्रामे कम्बलो मे स्वम् । ग्रामे कम्बलो मम स्वम् । ग्रामे कम्बलस्ते दीयते । ग्रामे कम्बलस्तुभ्यं दीयते । ग्रामे कम्बलो मे दीयते । ग्रामे कम्बलो मह्यं दीयते । ग्रामे छात्रास्त्वा पश्यन्ति । ग्रामे छात्रास्त्वाम् पश्यन्ति । ग्रामे

छात्रा मा पश्यन्ति । ग्रामे छात्रा मां पश्यन्ति । सपूर्वाया इति किम्? कम्बलस्ते स्वम् । कम्बलो मे स्वम् । प्रथमाया इति किम्? कम्बलो ग्रामे ते स्वम् । कम्बलो ग्रामे मे स्वम् ।

(८९४) युष्मदस्मदोर्विभाषा अनन्वादेश इति वक्तव्यम् । (म.भा. ३.३७३)

इह मा भूत्, अथो ग्रामे कम्बलस्ते स्वम्, अथो ग्रामे कम्बलो मे स्वम् । अपर आह-

(८९५) सर्व एव वान्नावादयोऽनन्वादेशे विभाषा वक्तव्याः ।

कम्बलस्ते स्वम्, कम्बलम्तव स्वम् । कम्बलो मे स्वम्, कम्बलो मम स्वम् । अनन्वादेशे इति किम्? अथो कम्बलस्ते स्वम् । अथो कम्बलो मे स्वम् । न तर्हि इदानीमिदं वक्तव्यम् 'सपूर्वायाः प्रथमाया विभाषा इति ? वक्तव्यं च । किं प्रयोजनम् ? अन्वादेशार्थम् । अन्वादेशे हि विभाषा यथा स्यात् । अथो ग्रामे कम्बलस्ते स्वम्, अथो ग्रामे कम्बलस्तव स्वम्। अथो ग्रामे कम्बलो मे स्वम्, अथो ग्रामे कम्बलो मम स्वम् ॥

३६४०. तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः ॥ २७ ॥

तिङन्तात् पदात् पराणि गोत्रादीनि कुत्सने आमीक्ष्ण्ये चार्थे वर्त्तमानानि अनुदात्तानि भवन्ति । पचति गोत्रम् (३) । जल्पति गोत्रम् । आभीक्ष्ण्ये-पचति पचति गोत्रम् (४) । जल्पति जल्पति गोत्रम् । ब्रुवः - पचति ब्रुवम् । जल्पति ब्रुवम् । पचति पचति ब्रुवम् । जल्पति जल्पति ब्रुवम् । ब्रुव इति ब्रुवः कन्निपातनाद् वच्यादेशाभावश्च । गोत्र । ब्रुव । प्रवचन। प्रसहन । प्रकथन । प्रत्ययन । प्रचक्षण । प्राय । विचक्षण । अवचक्षण । स्वाध्याय। भूयिष्ठ। नाम वा (१) । नामेत्येतद्वा निहन्यते । पक्षे आद्युदात्तमेव भवति-पचति नाम । पठति नाम। गोत्रादिः । तिङ इति किम्? कुत्सितं गोत्रम् । गोत्रादीनीति किम्? पचति पापम् । कुत्सनाभीक्ष्ण्ययोरिति किम्? खनति गोत्रं समेत्य कूपम् (२) । कुत्सनाभीक्ष्ण्ययोरिति पाठविशेषणं द्रष्टव्यम् । तेनान्यत्रापि गोत्रादिग्रहणेन कुत्सनाभीक्ष्ण्ययोरेव कार्यं भवति ॥

३६४१. तिङ्ङतिङः ॥ २८ ॥

तिङन्तं पदमतिङन्तात् पदात् परमनुदात्तं भवति । देवदत्तः पचति । यज्ञदत्तः पचति। तिङिति किम्? नीलमुत्पलम् । शुक्लं वस्त्रम् । अतिङ इति किम्? भवति पचति (३) ॥

३६४२. न लुट् ॥ २९ ॥

पूर्वेणातिप्रसक्ते प्रतिषेध आरभ्यते । लुडन्तं नानुदात्तं भवति । श्वः कर्ता श्वः कर्त्तारौ। मासेन कर्त्तारः । तासेः परस्य लसार्वधातुकस्यानुदात्तत्वे सति सर्वतासिरेवोदात्तः । यत्र तु टिलोपस्तत्रोदात्तनिवृत्तिस्वरो भवति ॥

३६४३. (४) निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तम् ॥ ३० ॥

नेति वर्त्तते । यत् यदि हन्त कुवित् नेत् चेत् चण् कच्चित् यत्र इत्येतैर्निपातैर्युक्तं तिङन्तं नानुदात्तं भवति । यत्करोति । यत्पचति । यदि-यदि करोति । यदि पचति । हन्त-हन्त करोति । हन्त पचति । कुवित् - कुवित्करोति । कुवित्पचति । नेत्-नेज्जिह्मायन्तो नरकं पताम । चेत्-स चेद्भुङ्क्ते । स चेदधीते । चेण्-णिद्विशिष्टोऽयं चेदर्थे वर्तते । अयं च मरिष्यति । अयञ्चेन्मरिष्यतीत्यर्थः । समुच्चयादिषु तु यः चशब्दः तेन योगेन विधिरयं न भवति । कच्चिद् भुङ्क्ते । कच्चिदधीते । यत्र-यत्र भुङ्क्ते । यत्राधीते । निपातैरिति किम्? यत्कूजति शकटम् । गच्छत्कूजति शकटमित्यर्थः । इणः शतरि रूपमेतत् । युक्तमिति किम्? यत्र क्व च ते मनो दक्षं दधस उत्तरम् ॥

३६४४. नह प्रत्यारम्भे ॥ ३१ ॥

नह इत्येतेन युक्ते प्रत्यारम्भे तिङन्तं नानुदात्तं भवति । (१) चोदितस्यावधीरणे उपलिप्सया प्रतिषेधयुक्तः प्रत्यारम्भः क्रियते । नह भोक्ष्यसे । नहाध्येष्यसे । प्रत्यारभ्भ इति किम्? नह वै तस्मिंश्च लोके दक्षिणामिच्छन्ति ॥

३६४५. सत्यं प्रश्ने ॥ ३२ ॥

सत्यमित्यनेन युक्तं तिङन्तं नानुदात्तं भवति प्रश्ने । सत्यं भोक्ष्यसे । सत्यमध्येष्यसे। प्रश्न इति किम्? सत्यं वक्ष्यामि नानृतम् ॥

३६४६. अङ्गाप्रातिलोम्ये ॥ ३३ ॥

अङ्ग इत्यनेन युक्तं तिङन्तमप्रातिलोम्ये गम्यमाने नानुदात्तं भवति । अङ्ग कुरु । अङ्ग पच । अङ्ग पठ । अप्रातिलोम्य इति किम्? अङ्ग कूज ३ वृषल इदानीं ज्ञास्यसि जाल्म । कूजनमनभिमतमसौ कुर्वन् प्रतिलोमो भवति ॥

३६४७. हि च ॥ ३४ ॥

हि इत्यनेन युक्तं तिङन्तमप्रातिलोम्ये नानुदात्तं भवति । स हि कुरु । स हि पच । स हि पठ । अप्रातिलोम्य इत्येव । स हि कूज वृषल इदानीं ज्ञास्यसि जाल्म ॥

३६४८. छन्दस्यनेकमपि साकाङ्क्षम् ॥ ३५ ॥

हि चेति वर्त्तते । छन्दसि विषये हियुक्तं तिङन्तं साकाङ्क्षमनेकमपि नानुदात्तं भवति एकमपि । कदाचिदेकं कदाचिदनेकमित्यर्थः । तत्रानेकं तावत्-अनृतं हि मत्तो वदति, पाप्मा एनं विपुनाति । तिङन्तद्वयमप्येतन्न निहन्यते । एकं खल्वपि-अग्निर्हि अग्ने उदजयत् । तिङन्तद्वयमपि हिशब्दयुक्तमेतत् । तत्रैकमुदजयदित्यादिरुदात्तम् । अपरमनुदात्तम् । अजा ह्यग्नेरजनिष्ट गर्भम् । सा वा अपश्यज्जनितारमग्ने । अजनिष्टेत्याद्युदात्तमपश्यदित्यनुदात्तम् ॥

३६४९. यावद्यथाभ्याम् ॥ ३६ ॥

यावद्यथा इत्येताभ्यां युक्तं तिङन्तं नानुदात्तं भवति । यावद्भुङ्क्ते । यथा भुङ्क्ते । यावदधीते । यथाधीते । देवदत्तः पचति यावत् । देवदत्तः पचति यथा । परेणापि योगे भवति प्रतिषेधः ॥

३६५०. पूजायां नानन्तरम् ॥ ३७ ॥

यावद्यथा इत्येताभ्यां युक्तमनन्तरं तिङन्तं पूजायां विषये नानुदात्तं न भवति । किं तर्हि? अनुदात्तमेव । यावत्पचति शोभनम् । यथा पचति शोभनम् । यावत् करोति चारु । यथा करोति चारु । पूजायामिति किम्? यावद्भुङ्क्ते । यथा भुङ्क्ते । अनन्तरमिति किम्? यावद्देवदतः पचति शोभनम् । यथा देवदत्तः करोति चारु । पूर्वेणात्र निघातः प्रतिषिद्ध्यते ॥

३६५१. उपसर्गव्यपेतं च ॥ ३८ ॥

यावद्यथाभ्यां युक्तमुपसर्गव्यपेतं च पूजायां विषये नानुदात्तं न भवति । किं तर्हि? अनुदात्तमेव भवति । पूर्वमनन्तरमित्युक्तमुपसर्गव्यवधानार्थोयमारम्भः । यावत्प्रपचति शोभनम्। यथा प्रपचति शोभनम् । यावत्प्रकरोति चारु । यथा प्रकरोति चारु । अनन्तरमित्येव। यावद्देवदत्तः प्रपचति शोभनम् । यथा विष्णुमित्त्रः प्रकरोति चारु ॥

३६५२. तुपश्यपश्यताहैः पूजायाम् ॥ ३९ ॥

तु पश्य पश्यत अह इत्येतैर्युक्तं तिङन्तं नानुदात्तं भवति पूजायां विषये । तु-माणवकस्तु भुङ्क्ते शोभनम् । पश्य-पश्य माणवको भुङ्क्ते शोभनम् । पश्यत-पश्यत माणवको भुङ्क्ते शोभनम् । अह-अह माणवको भुङ्क्ते शोभनम् । पूजायामिति किम्? पश्य मृगो

धावति । पूजायामिति वर्त्तमाने पुनः पुजायामित्युच्यते निघातप्रतिषेधार्थम् । तद्धि प्रतिषेधस्य प्रतिषेधेन संबद्धमिति ॥

३६५३. अहो च ॥ ४० ॥

अहो इत्यनेन युक्तं तिङन्तं नानुदात्तं भवति पूजायां विषये । अहो देवदत्तः पचति शोभनम् । अहो विष्णुमित्रः करोति चारु । पृथग्योगकरणमुत्तरार्थम् ॥

३६५४. शेषे विभाषा ॥ ४१ ॥

अहो इत्यनेन युक्तं तिङन्तं शेषे विभाषा नानुदात्तं भवति । कश्च शेषः? यदन्यत्पूजायाः। कटमहो करिष्यसि । मम गेहमेष्यसि । असूयावचनमेतत् । पूजायामित्यस्य पूर्वत्र चानुकृष्टत्वादनधिकारे सिद्धे शेषवचनं विस्पष्टार्थम् ॥

३६५५. पुरा च परीप्सायाम् ॥ ४२ ॥

पुरा इत्यनेन युक्तं तिङन्तं परीप्सायामर्थे विभाषा नानुदात्तं भवति । परीप्सा त्वरा अधीष्व माणवक पुरा, विद्योतते विद्युत् । पुरा स्तनयति स्नतयित्नुः । पुराशब्दोऽत्र भविष्यदासत्तिं द्योतयति । परीप्सायामिति किम्? न तेन स्म पुराधीयते । अत्र भूतकालविप्रकर्षं पुराश्ब्दो द्योतयति । ऊर्णया स्म पुराधीयते ॥

३६५६. नन्वित्यनुज्ञैषणायाम् ॥ ४३ ॥

ननु इत्यनेन युक्तं तिङन्तं नानुदात्तं भवति अनुज्ञैषणायां विषये । अनुज्ञाया एषणा प्रार्थना अनुज्ञैषणा । (१) अनुज्ञाप्रार्थनेत्यर्थः । ननु करोमि भोः । ननु गच्छामि भोः । अनुजानीष्व मां, करणं प्रतीत्यर्थः । अनुज्ञैषणायामिति किम्? अकार्षीः कटं देवदत्त? ननु करोमि भोः । पृष्टप्रतिवचनमेतन्नानुज्ञैषणा ॥

३६५७. किं क्रियाप्रश्नेऽनुपसर्गमप्रतिषिद्धम् ॥ ४४ ॥

किमित्येतत्क्रियाप्रश्ने यदा वर्त्तते तदानेन युक्तं तिङन्तमनुपसर्गमप्रतिषिद्धं नानुदात्तं भवति। किं देवदत्तः पचति, आहोस्विद्भुङ्क्ते? किं देवदत्तः शेते आहोस्विदधीते? अत्र केचिदाहुः - पूर्व किंयुक्तमिति तन्न निहन्यते । उत्तरं तु न किंयुक्तमिति तन्निहन्यत एवेति। अपरे त्वाहुः - यद्यप्येकस्याख्यातस्य समीपे किंशब्दः श्रूयते तथापि सर्वस्य संशयविषयस्य तेन योग इति उभयत्र प्रतिषेधेन भवितव्यमिति । क्रियाग्रहणं किम्? साधनप्रश्ने माभूत् किं

देवदत्त ओदनं पचति अहोस्विच्छाकमिति? प्रश्न इति किम्? किमधीते देवदत्तः । क्षेपे किंशब्दोऽयं न प्रश्ने । अनुपसर्गमिति किम्? किं देवदत्तः प्रपचति आहोस्वित्प्रकरोति? अप्रतिषिद्धमिति किम्? किं देवदत्तो न पठति आहोस्विन्न करोति ॥

३६५८. लोपे विभाषा ॥ ४५ ॥

किमो लोपे क्रियाप्रश्ने तिङन्तमनुपसर्गमप्रतिषिद्धं विभाषा नानुदात्तं भवति । क्व चास्य लोपः? यत्र गम्यते चार्थो न च प्रयुज्यते किंशब्दः । देवदत्तः पचति आहोस्वित्पठति? विनैव किमा प्रश्नोऽवगम्यते । प्राप्तविभाषेयं किमर्थेन योगात् । पूर्ववत् प्रत्युदाहरणानि (२) ॥

३६५९. एहि मन्ये प्रहासे लृट् ॥ ४६ ॥

एहिमन्ये इत्यनेन युक्तं तिङन्तं नानुदात्तं भवति प्रहासे । प्रकृष्टो हासः प्रहासः, क्रीडा। एहि मन्ये ओदनं भोक्ष्यसे, नहि भोक्ष्यसे भुक्तः सोऽतिथिभिः । एहि मन्ये रथेन यास्यसि, नहि यास्यसि यातस्तेन पिता । प्रहास इति किम्? एहि मन्यसे ओदनं भोक्ष्ये इति । सुष्ठु च मन्यसे । साधु च मन्यसे । गत्यर्थलोटा लृडित्येव सिद्धे सत्यारम्भो नियमार्थः - एहिमन्येयुक्तं प्रहास एव यथा स्यात्, अन्यत्र मा भूदिति-एहि मन्यसे ओदनं भोक्ष्य इति । एहिमन्य इत्युत्तमोपादानमतन्त्रम् । प्रहास एव हि मन्यतेरुत्तमो विहितस्ततोऽन्यत्र मध्यम एव भवति । तत्रानेन नियमेन निवृत्तिः क्रियते । एहि मन्यसे ओदनं भोक्ष्य इति ॥

३६६०. जात्वपूर्वम् ॥ ४७ ॥

जातु इत्येतदविद्यमानपूर्वं तेन युक्तं तिङन्तं नानुदात्तं भवति । जातु भोक्ष्यसे । जातु करिष्यामि । अपूर्वमिति किम्? कटं जातु करिष्यति ॥

३६६१. किंवृत्तं च चिदुत्तरम् ॥ ४८ ॥

किमो वृत्तं किंवृत्तं, किंवृत्तग्रहणेन तद्विभक्त्यन्तं प्रतीयात्, डतरडतमौ च प्रत्ययौ, तत्किंवृत्तं चिदुत्तरमविद्यमानपूर्वं यत्तेन युक्तं तिङन्तं नानुदात्तं भवति । कश्चिद्भुङ्क्ते । कश्चिद्भोजयति । कश्चिदधीते । केन चित्करोति । कस्मै चिद्ददाति । कतरश्चित्करोति । कतमश्चिद्भुङक्ते । चिदुत्तरमिति किम्? को भुङ्क्ते । अपूर्वमित्येव । देवदत्तः किंचित्पठति ॥

३६६२. आहो उताहो चानन्तरम् ॥ ४९ ॥

निघातप्रतिषेधोऽनुवर्त्तते, अपूर्वमिति च । आहो उताहो इत्येताभ्यामपूर्वाभ्यां युक्तमनन्तरं तिङन्तं नानुदात्तं भवति । आहो भुङ्क्ते । उताहो भुङ्क्ते । आहो पठति । उताहो (१) पठति । अनन्तरमिति किम्? शेषे विभाषां वक्ष्यति । अपूर्वमित्येव । देवदत्त आहो भुङ्क्ते । देवदत्त उताहो भुङ्क्ते ॥

३६६३. शेषे विभाषा ॥ ५० ॥

आहो उताहो इत्येताभ्यां युक्तं तिङन्तं नानुदात्तं शेषे विभाषा भवति । कश्च शेषः? यदन्यदनन्तरात् । आहो देवदत्तः पचति २ । उताहो देवदत्तः पचति २ । आहो देवदत्तः पठति २। उताहो देवदत्तः पठति २ ॥

३६६४. गत्यर्थलोटा लृण्न चेत्कारकं सर्वान्यत् ॥ ५१ ॥

गमिना समानार्था गत्यर्थाः, (२) गत्यर्थानां लोट् गत्यर्थलोट्, तेन । गत्यर्थलोटा युक्तं लृङन्तं तिङन्तं नानुदात्तं भवति न चेत्कारकं सर्वान्यद्भवति । यत्रैव कारके कर्त्तरि कर्म्मणि वा लोट् तत्रैव यदि लृङपि भवतीत्यर्थः । कर्तृकर्मणी एवात्र तिङन्तवाच्ये कारकग्रहणेन गृह्येते । न करणादि कारकान्तरम् । आगच्छ देवदत्त ग्रामं द्रक्ष्यस्येनम् । आगच्छ देवदत्त ग्राममोदनं भोक्ष्यसे । उह्यन्तां देवदत्तेन शालयः तेनैव भोक्ष्यन्ते । उह्यन्तां देवदत्तेन शालयः, यज्ञदत्तेन भोक्ष्यन्ते । गत्यर्थग्रहणं किम्? पच देवदत्तौदनं भोक्ष्यस एनम् । लोटेति किम् । आगच्छेः देवदत्त ग्रामम्, द्रक्ष्यसि एनम् । लृट् इति किम्? आगच्छ देवदत्त ग्रामम् । पस्यसि एनम् । न चेत्कारकं सर्वान्यदिति किम्? आगच्छ देवदत्त ग्रामं पिता ते ओदनं भोक्ष्यते । उह्यन्तां देवदत्तेन शालयः सक्तवस्तेन पास्यन्ते । सर्वग्रहणं किम्? आगच्छ देवदत्त ग्रामं त्वं चाहं च द्रक्ष्याव एनमित्यत्रापि निघातप्रतिषेधो यथा स्यात् । लृङन्तवाच्ये हि सर्वस्मिन् कारकेऽन्यस्मिन्न भवितव्यम् । इह तु यल्लोडन्तस्य कारकं तच्चान्यच्च लृङन्तेनोच्यते इति॥

३६६५. लोट् च ॥ ५२ ॥

लोडन्तं तिङन्तं गत्यर्थलोटा युक्तं नानुदात्तं भवति, न चेत्कारकं सर्वान्यद्भवति । लोडन्तयोरेकं कारकं यदि भवतीत्यर्थः । आगच्छ देवदत्त ग्रामं पश्य । आव्रज विष्णुमित्र ग्रामं शाधि । आगम्यतां देवदत्तेन ग्रामो दृश्यताम् यज्ञदत्तेन । गत्यर्थानामित्येव-पच देवदत्तौदनं भुङ्क्ष्वैनम् । लोटेत्येव - आगच्छेर्देवदत्त ग्रामं पश्यैनम् । न चेत्कारकं सर्वान्यदित्येव ।

आगच्छ देवदत्त ग्रामं पश्यत्वेनं यज्ञदत्तः । सर्वग्रहणानुवृत्तेस्त्विह भवत्येव । आगच्छ देव ग्रामं त्वम् चाहं च पश्याव । पृथग्योगकरणमुत्तरार्थम् ॥

३६६७. विभाषितं सोपसर्गमनुत्तमम् ॥ ५३ ॥

सर्वं पूर्वमनुवर्त्तते । प्राप्तविभाषेयम्, लोडन्तं सोपसर्गमुत्तमवर्जितं गत्यर्थलोटा युक्तं तिङन्तं विभाषितं नानुदात्तं भवति, न चेत्कारकं सर्वान्यद्भवति । आगच्छ देवदत्त ग्रामं प्रविश २। आगच्छ देवदत्त ग्रामं प्रशाधि २ । सोपसर्गमिति किम्? आगच्छ देवदत्त ग्रामं पश्य । अनुत्तममिति किम्? आगच्छानि देवदत्त ग्रामं प्रविशानि ॥

३६६८. हन्त च ॥ ५४ ॥

पूर्वं सर्वमनुवर्त्तते गर्यर्थलोटं वर्जयित्वा । हन्त इत्यनेन युक्तं लोडन्तं सोपसर्गमुत्तमवर्ज्जितं विभाषितं नानुदात्तं भवति । हन्त प्रविश २ । हन्त प्रशाधि २ । सोपसर्गमित्येव, हन्त कुरु । निपातैर्यद्यदिहन्तेति नित्यमत्र निघातप्रतिषेधो भवति । अनुत्तममित्येव, हन्त प्रभुञ्जावहै । हन्त प्रभुञ्जामहै ॥

३६६९. आम एकान्तरमामन्त्रितमनन्तिके ॥ ५५ ॥

आम उत्तरमेकपदान्तरमामन्त्रितान्तमनन्तिके नानुदात्तं भवति । आम् पचसि देवदत्त ३। आम् भो देवदत्त ३ । भो इत्यामन्त्रितान्तमपि, नामन्त्रिते समानाधिकरणे सामान्यवचनमिति नाविद्यमानवद्भवति । आम इति किम्? शाकं पचसि देवदत्त ३ । एकान्तरमिति किम् । आम् प्रपचसि देवदत्त ३ । आमन्त्रितमिति किम् ? आम्पचति देवदत्तः। अनन्तिक इति किम्? आम् देवदत्त । आम एकान्तरमामन्त्रितं यत्तस्य एकश्रुतेरनुदात्तस्य च प्रतिषेध इष्यते । तदुभयमनेन क्रियत इति केचिदाहुः । प्लुतोदात्तः पुनरसिद्धत्वान्न प्रतिषिद्ध्यते । अपरेषां दर्शनमनन्तिक इत्यनेन यन्न दूरं न संन्निकृष्टं तत्परिगृह्यते । तेनास्मिन्नेकश्रुतेः प्राप्तिरेव नास्ति । प्लुतोदात्तोऽपि नोदाहर्त्तव्य इति ॥

३६७०. यद्धितुपरं छन्दसि ॥ ५६ ॥

आमन्त्रितमित्येतदस्वरितत्वान्नानुवर्त्तते । तिङिति वर्त्तत एव । यत्परं हिपरं तुपरं च तिङन्तं छन्दसि नानुदात्तं भवति । यत्परं तावत् - गवां गोत्रमुदसृजो यदङ्गिरः । हिपरम्-इन्दवो वामुशन्ति हि । तुपरम्-आख्यास्यामि तु ते । निपातैर्यद्यदिहन्तेति हि चेति तुपश्यपश्यताहैरिति च निघातप्रतिषेधे सिद्धे वचनमिदं नियमार्थम्-एभिरेव परैर्योगे प्रतिषेधो

भवति, नान्यैरिति । इह न भवति - जाये स्वो रोहावैहि । एहीत्यनेन गत्यर्थलोटा युक्तस्य रोहावेत्यस्य लोडन्तस्य निघातो भवत्येव ॥

३६७१. चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः ॥ ५७ ॥

चन चिद् इव गोत्रादि तद्धित आम्रेडित इत्येतेषु परतः अगतेरुत्तरं तिङन्तं नानुदात्तं भवति । चन - देवदत्तः पचति चन । चित्-देवदत्तः पचति चिद् । इव-देवदत्तः पचतीव । गोत्रादि-देवदत्तः पचति गोत्रम् । देवदत्तः पचति ब्रुवम् । देवदत्तः पचति प्रवचनम् । इहापि गोत्रादयः कुत्सनाभीक्ष्ण्ययोरेव गृह्यन्ते । तद्धित-देवदत्तः पचतिकल्पम् । देवदत्तः पचतिरूपम्। अनुदात्तस्तद्धित इह उदाहरणमन्यत्र तद्धितस्वरेण तिङ्स्वरो बाध्यते-पचतिदेश्यः । आम्रेडित-देवदत्तः पचति २ । अगतेरिति किम्? देवदत्तः प्रपचति चन । अत्र अगतिग्रहणे सगतिरपि तिङ् इत्यत्र च उपसर्गग्रहणं द्रष्टव्यम् । इह मा भूत् । शुक्लीकरोति चन । यत्काष्ठं शुक्लीकरोति । यत्काष्ठं कृष्णीकरोति ॥

३६७२. चादिषु च ॥ ४८ ॥

चादिषु च परतः तिङन्तमगतेः परं नानुदात्तं भवति । चादयो नचवाहाहैवयुक्ते इत्यत्र ये निर्दिष्टाः त इह परिगृह्यन्ते । चशब्दे तावत्-देवदत्तः पचति च खादति च । वा-देवदत्तः पचति वा खादति वा । ह - देवदत्तः पचति ह खादति ह ।

अह-देवदत्तः पचत्यह खादत्यह । एव-देवदत्तः पचत्येव खादत्येव । अगतेरित्येव । देवदत्तः प्रपचति च प्रखादति च । प्रथमस्यात्र तिङन्तस्य चवायोगे प्रथमेति निघातः प्रतिषिद्ध्यते एव । परंतु निहन्यते ॥

३६७३. चवायोगे प्रथमा ॥ ५९ ॥

अगतेरिति पूर्वसूत्रे चानुकृष्टमित्यत्र नानुवर्त्तते । च वा इत्येताभ्यां योगे प्रथमा तिङ्विभक्तिर्नानुदात्ता भवति । गर्दभांश्च कालयति । वीणां च वादयति । गर्दभान् वा कालयति । वीणां वा वादयति । योगग्रहणं पूर्वाभ्यामपि योगे निघातप्रतिषेधो यथा स्यादिति । प्रथमाग्रहणं द्वितीयादेस्तिङन्तस्य मा भूदिति । चवायोगो हि द्विसमुच्चये विकल्पे च सति भवति । स चानेकस्य धर्म इति ॥

३६७४. हेति क्षियायाम् ॥ ६० ॥

ह इत्यनेन युक्ता प्रथमा तिङ्विभक्तिर्नानुदात्ता भवति क्षियायां गम्यमानायाम् । क्षिया धर्मव्यतिक्रमः, आचारभेदः । स्वयं ह रथेन याति ३, उपाध्यायं पदातिं गमयति । स्वयं हौदनं भुङ्क्ते ३ उपाध्यायं सक्तून् पाययति । प्रथमस्य तिङन्तस्यात्र निघातः प्रतिषिध्यते । क्षियाशीःप्रैषेषु तिङाकाङ्क्षमिति च प्लुतो भवति ।

३६७५. अहेति विनियोगे च ॥ ६१ ॥

अह इत्यनेन युक्ता प्रथमा तिङ्विभक्तिर्नानुदात्ता भवति विनियोगे गम्यमाने, चशब्दात् क्षियायां च । नानाप्रयोजनो नियोगो विनियोगः । त्वमह ग्रामं गच्छ । त्वमहारण्यं गच्छ । क्षियायाम्-स्वयमह रथेन याति ३ उपाध्यायं पदातिं गमयति । स्वयमहौदनं भुङ्क्ते ३ उपाध्यायं सक्तून्पाययति । पूर्ववन्निघातप्रतिषेधः प्लुतश्च ॥

३६७६. चाहलोप एवेत्यवधारणम् ॥ ६२ ॥

चलोपे अहलोपे च प्रथमा तिङ्विभक्तिर्नानुदात्ता भवति । एवेत्येतच्चेदवधारणार्थं प्रयुज्यते। क्व चास्य लोपः? यत्र गम्यते चाऽर्थो न च प्रयुज्यते, तत्र लोपः । तत्र चशब्दः समुच्चयार्थः, अहशब्दः केवलार्थ इति समानकर्तृके चलोपः नानाकर्तृके अहलोपः । चलोपे-देवदत्त एव ग्रामं गच्छतु देवदत्त एवारण्यं गच्छतु । ग्रामं चारण्यं च गच्छत्वित्यर्थः । अहलोपे-देवदत्त एव ग्रामं गच्छतु यज्ञदत्त एवारण्यं गच्छतु । ग्रामं केवलमरण्यं केवलमित्यर्थः। अवधारणमिति किम्? देवदत्तः क्वेव भोक्ष्यते । अनवक्लृप्तावयमेवशब्दः । न क्विचिद्भोक्ष्यत इत्यर्थः । एवे चानियोग इति पररूपम् ॥

३६७७. चादिलोपे विभाषा ॥ ६३ ॥

चादयो नचवाहाहैवयुक्त इति सूत्रनिर्दिष्टा गृह्यन्ते, तेषां लोपे प्रथमा तिङ्विभक्तिर्नानुदात्ता भवति विभाषा । चलोपे-शुक्ला व्रीहयो भवन्ति २ श्वेता गा आज्याय दुहन्ति । भवन्तीत्येतद्विकल्पेन न निहन्यते । वालोपे-व्रीहिभिर्यजेत । यवैर्यजेत । एवं शेषेष्वपि यथादर्शनमुदाहार्यम् ॥

३६७८. वैवावेति च च्छन्दसि ॥ ६४ ॥

वै वाव इत्येताभ्यां युक्ता प्रथमा तिङ्विभक्तिर्विभाषा नानुदात्ता भवति छन्दसि विषये। अहर्वै देवानामासीत् २ रात्रीरसुराणामासीत् । बृहस्पतिर्वै देवानाम् पुरोहित आसीत् २, छण्डामर्कावसुराणाम् । वाव-अयं वाव हस्त आसीत् २ नेतर आसीत् ॥

३६८०. एकान्याभ्यां समर्थाभ्याम् ॥ ६५ ॥

एक अन्य इत्येताभ्याम् समर्थाभ्यां युक्ता प्रथमा तिङ्विभक्तिर्विभाषा नानुदात्ता भवतिच्छन्दसि विषये । प्रजामेका जिन्वति २ ऊर्जमेका रक्षति, राष्ट्रमेका रक्षति । जिन्वतीत्येतपक्षे न निहन्यते । तयोरन्यः पिप्पलं स्वाद्वत्ति २ अनश्नन्नन्यो अभिचाकशीति। अत्तीत्येतत् पक्षे न निहन्यते । समर्थाभ्यामिति किम्? एको देवानुपातिष्ठत् । एक इति संख्यापदमेतद् अन्यार्थे न वर्त्तते । एकशब्दस्य व्यवस्थार्थं च समर्थग्रहणं व्यभिचारित्वात्तस्य॥

३६८१. यद्वृत्तान्नित्यम् ॥ ६६ ॥

प्रथमा छन्दसीति निवृत्तं, निघातप्रतिषेध इत्येव । यदो वृत्तं यद्वृत्तम् । यत्र पदे यद्वर्त्तते तत्सर्वं यद्वृत्तम् । इह वृत्तग्रहणेन तद्विभक्त्यन्तं प्रतीयात् । डतरडतमौ च प्रत्ययौ इत्येतन्नाश्रीयते । तस्माद्यद्वृत्तादुत्तरं तिङन्तं नानुदात्तं भवति नित्यम् । यो भुङ्क्ते । यं भोजयति । येन भुङ्क्ते । यस्मै ददाति । यत्कामास्ते जुहुमः । यद्र्यङ् वायुर्वाति। यद्वायुः पवते । पञ्चमीनिर्देशेऽप्यत्र व्यवहिते कार्यमिष्यते ॥ यथा काम्ये वेति वक्तव्यम् । यत्र क्वचन यजन्ते ।

३६८२. पूजनात्पूजितमनुदात्तं काष्ठादिभ्यः ॥ ६७ ॥

पूजनेभ्यः काष्ठादिभ्य उत्तरपदं पूजितमनुदात्तं भवति । काष्ठ-काष्ठाध्यापकः । काष्ठाभिरूपकः । दारुण-दारुणाध्यापकः । दारुणाभिरूपकः । अमातापुत्र-अमातापुत्राध्यापकः । अयुत-अयुताभिरूपकः । अयुताध्यापकः । अद्भुत-अद्भुताध्यापकः । अनुक्त-अनुक्ताध्यापकः । भृश-भृशाध्यापकः । घोर-घोराध्यापकः.। परम-परमाध्यापकः । सु-स्वध्यापकः । अति-अत्यध्यापकः (१) । मलोपश्च । इति वार्तिककारमतम् । मयूरव्यंसकादित्वात्समासः । समासे चैतदनुदात्तत्वम् । समासान्तोदात्तत्वापवाद इष्यते । दारुणमध्यापक इत्येवमादिषु न भवति । मलोपश्चेत्यनेनाप्ययमेव विषय आख्यायते । यत्र विभक्तेरभावात् मकारो न श्रूयते तत्रानुदात्तत्वमिति । असमासे हि मलोपो नैवेष्यते । दारुणमधीते दारुणमध्यापक इति ।

पूजनादित्येव पूजितपरिग्रहे सिद्धे पूजितग्रहणमनन्तरपूजितप्रतिपत्त्यर्थम् । एतदेव ज्ञापकमिह प्रकरणे पञ्चमीनिर्द्देशेऽपि नानन्तर्यमाश्रीयते इति । तथा च यद्वृत्तान्नित्यमित्यत्रोदाहृतम् । अनुदात्तमिति वर्त्तमाने पुनरनुदात्तग्रहणं प्रतिषेधनिवृत्त्यर्थम् ॥

३६८३. सगतिरपि तिङ् ॥ ६८ ॥

सगतिरगतिरपि पूजनेभ्यः काष्ठादिभ्यः परं पूजितं तिङन्तमनुदात्तं भवति । यत्काष्ठं पचति । यत्काष्ठं प्रपचति । यद्दारुणं पचति । यद्दारुणं प्रपचति । तिङ्ङतिङ इति निघातस्य निपातैर्यद्यदिहन्तेति प्रतिषेधे प्राप्ते पुनर्विधानम् । सगतिग्रहणाच्च गतिरपि निहन्यते । गतिग्रहणे चात्र उपसर्गग्रहणमिष्यते । इह न भवति - यत्काष्ठं शुक्लीकरोति । यत्काष्ठं कृष्णीकरोति ॥

३६८४. कुत्सने च सुप्यगोत्रादौ ॥ ६९ ॥

पदादिति निवृत्तम् । सगतिरपि तिङिति वर्त्तते । कुत्सने च सुबन्ते गोत्रादिवर्जिते परतः सगतिरपि तिङ् अगतिरप्यनुदात्तो भवति । पचति पूति । प्रपचति पूति । पचति मिथ्या। प्रपचति मिथ्या । कुत्सन इति किम्? पचति शोभनम् । सुपीति किम्? पचति क्लिश्नाति । अगोत्रादाविति किम्? पचति गोत्रम् । पचति ब्रुवम् । पचति प्रवचनम् । क्रियाकुत्सन इति वक्तव्यम् । कर्त्तुः कुत्सने मा भूत्-पचति पूतिर्देवदत्तः । प्रपचति पूति । पूतिश्च चानुबन्धो भवतीति वक्तव्यम् । तेनायं चकारानुबन्धकत्वात् अन्तोदात्तो भवति । विभाषितं चापि बहृवर्थमनुदात्तं भवतीति वक्तव्यम् । पचन्ति पूति २ । प्रपचन्ति पूति २ ॥

सुपि कुत्सने क्रियाया मलोप इष्टोऽतिङीति चोक्तार्थम् ।

पूतिश्च चानुबन्धो विभाषितं चापि बहृवर्थम् ॥

३६८५. गतिर्गतौ ॥ ७० ॥

गतिर्गतौ परतोऽनुदात्तो भवति । अभ्युद्धरति । समुदानयति । अभिसंपर्याहरति । गतिरिति किम्? देवदत्तः प्रपचति । गताविति किम्? आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः। याहीत्येतत् प्रति क्रियायोगादाङित्येष गतिः, तस्य गतावित्येतस्मिन्नसति गतिरित्यनाश्रितपरनिमित्तकमनुदात्तत्वं स्यात् ॥

३६८६. तिङि चोदात्तवति ॥ ७१ ॥

गतिरिति वर्त्तते । तिङन्ते उदात्तवति परतो गतिरनुदात्तो भवति । यत्प्रपचति । यत्करोति । तिङ्ग्रहणमुदात्तवतः परिमाणार्थम् । अन्यथा हि यं प्रति गतिस्तत्रानुदात्तो भवतीति धातावेवोदात्तवति स्यात्, प्रत्यये न स्यात् - यत्प्रकरोतीति । यत्क्रियाप्रयुक्ताः प्रादयस्तेषां तं प्रति गत्युपसर्गसंज्ञे भवत इति तिङन्ते धातुमेव प्रति गतिसंज्ञा । आमन्ते तर्हि न प्राप्नोति-प्रपचतितराम्, प्रपचतितमामिति? अत्र केचिदामन्तेन गतेः समासं कुर्वन्ति । तेषामव्ययपूर्वपदप्रकृतिस्वरत्वे सत्यक्रियमाणेऽपि तिङ्ग्रहणे परमनुदात्तवद्भावतीति गतिनिघातो नैव सिद्ध्यति । अथ तरबन्तस्य गतिसमास एवमपि सतिशिष्टत्वादाम एव स्वरे सति गतेरनुदात्तं पदमेकवर्जमित्येवानुदात्तत्वं सिद्धम् । येषां गतिकारकोपपदानां कृद्भिः समासवचनं प्राक्सुबुत्पत्तेरित्यनेन वचनेन कृदन्तेनैव प्राक्क्सुबुत्पत्तेः समासो भवति नान्येनेति दर्शनम्, तेषामेवंविधे विषये समासेन नैव भवितव्यमिति । पृथक् स्वरप्रवृत्तौ सत्यामनेन प्रकरोति । निघातेन प्रयोजनमस्ति । तदर्थं यत्नः कर्त्तव्यः । उदात्तवतीति किम्? प्रपचति ।

३६८७. आमन्त्रितं पूर्वमविद्यमानवत् ॥ ७२ ॥

आमन्त्रितं पूर्वमविद्यमानवद्भवति तस्मिन् सति यत्कार्यं तन्न भवति । असति यत्तद्भवति । कानि पुनरविद्यमानवत्त्वे प्रयोजनानि । आमन्त्रिततिङ्निघातयुष्मदस्मदादेशाभावाः। देवदत्त यज्ञदत्तेत्यत्रामन्त्रितस्य पदात्परस्येति निघातो न भवति । षाष्ठिकामन्त्रिताद्युदात्तत्वं भवति । देवदत्त पचसीत्यत्र तिङ्ङतिङ इति निघातो न भवति देवदत्त तव ग्रामः स्वम्, देवदत्त मम ग्रामः स्वमित्येवमादिषु युष्मदस्मदादेशा न भवन्ति । पूजायामनन्तरप्रतिषेधः प्रयोजनम् । यावद्देवदत्त पचसीत्यत्रापि पूजायां नानन्तरमित्येव प्रतिषेधो भवति । जात्वपूर्वमित्येतद्- देवदत्त जातु पचसीत्यत्रापि भवति । आहो उताहो चानन्तरमिति-आहो देवदत्त पचसि, उताहो देवदत्त पचसीत्यत्रापि भवति । आम एकान्तरमामन्त्रितमनन्तिक इति-आम् भो पचसि देवदत्त इत्यत्रापि भवति । आमन्त्रितमिति किम्? देवदत्तः पचति । पूर्वमिति किम्? देवदत्त इत्येतस्यामन्त्रिताद्युदात्तत्वे कर्त्तव्ये नाविद्यमानवद्भवति । पूर्वत्वं च परापेक्षं भवतीति परस्यैव कार्ये स्वनिमित्तेऽन्यनिमित्ते वा तदविद्यमानवद्भवति, न तु स्वकार्ये । देवदत्त पचसीत्यत्रापि ह्यामन्त्रिताद्युदात्तत्वं भवत्येव। इह इमं मे गङ्गे यमुने इति गङ्गेशब्दः पूर्वमामन्त्रितं ततः परस्य यमुने शब्दस्यानुदात्तत्वे कर्त्तव्ये स्वयमविद्यमानवत्त्वान्निमित्तं न भवति । मेशब्दस्य निमित्तभावं न प्रतिबध्नाति॥

३६८८. नामन्त्रिते समानाधिकरणे सामान्यवचनम् ॥ ७३ ॥

अविद्यमानवत्त्वस्य प्रतिषेधः । आमन्त्रितान्ते समानाधिकरणे परतः पूर्वमामन्त्रितान्तं सामान्यवचनं नाविद्यमानवद्भवति । किं तर्हि? विद्यमानवदेव । अग्ने गृहपते । माणवक जटिलकाध्यापक । पूर्वस्य विद्यमानवत्त्वात्परमनुदात्तमेव भवति । आमन्त्रित इति किम्? देवदत्त पचसि । समानाधिकरण इति किम्? देवदत्त पण्डितयज्ञदत्त । अत्र यज्ञदत्तविशेषणं पण्डितशब्दः न पूर्वेण समानाधिकरणः । सामान्यवचनमिति किम्? पर्यायेषु मा भूत्-अघ्न्ये देवि सरस्वति ईडे काव्ये विहव्ये । पर्यायशब्दा एते । एवं ह्युक्तमेतानि ह्यघ्न्ये नामानीति ॥

३६८९. विभाषितं विशेषवचने बहुवचनम् ॥ ७४ ॥

पूर्वेणाविद्यमानवत्त्वे प्रतिषिद्धे विकल्प उच्यते । विशेषवचने समानाधिकरणे आमन्त्रितान्ते परतः पूर्वमामन्त्रितं बहुवचनान्तं विभाषितमविद्यमानवद्भवति । देवाः शरण्याः २। ब्राह्मणा वैयाकरणाः २ । सामान्यवचनाधिकारादेव विशेषवचन इति सिद्धे विशेषवचनग्रहणं विस्पष्टार्थम् । बहुवचनमिति किम्? माणवक । जटिलक । नित्यमेतद्विद्यमानवदेव ॥

इति श्रीवामनविरचितायां काशिकायां वृत्तावष्ट
माध्यायस्य प्रथमः पादः ॥

अथ अष्टमाध्यायस्य
द्वितीयः पादः ॥

३६९०. पूर्वत्रासिद्धम् ॥ १ ॥

पूर्वत्रासिद्धमित्यधिकारोयमा अध्यायपरिसमाप्तेः । यदित ऊर्ध्वमनुक्रमिष्यामः पूर्वत्रासिद्धमित्येवं तद्वेदितव्यम् । तत्र येयं सपादसप्ताध्याय्यनुक्रान्ता एतस्यामयं पादोनोऽध्यायोऽसिद्धो भवति । इत उत्तरं चोत्तरोत्तरो योगः पूर्वत्र पूर्वत्रासिद्धो भवति । असिद्धवद्भवति (१) । सिद्धकार्यं न करोतीत्यर्थः । तदेतदसिद्धत्ववचनमादेशलक्षणप्रतिषेधार्थम्, उत्सर्गलक्षणभावार्थं च । अस्मा उद्धर । द्वा अत्र । द्वा आनय । असा आदित्यः इत्यत्र व्यलोपस्यासिद्धत्वाद् आद्गुण इत्यकः सवर्णे दीर्घ इति च न भवति । अमुष्मै । अमुष्मात् । अमुष्मिन् इति उत्वस्यासिद्धत्वात् स्मायादयो भवन्ति ॥

शुष्किका शुष्कजङ्घा च क्षामिमानौजढत्तथा ।
मतोर्वत्त्वे झलां जश्त्वे गुडलिण्मान्निदर्शनम् ॥

शुष्किकेत्यत्र शुषः क इयस्यासिद्धत्वाद् उदीचामातः स्थाने यकपूर्वाया इत्येतन्न भवति। शुष्कजङ्घा इति न कोपधाया इति पुंवद्भावप्रतिषेधो न भवति । क्षामिमानिति क्षामस्यापत्यम् क्षामिः, क्षामो वा अस्यास्तीति क्षामी । क्षामिः क्षामी वा यस्यास्तीति क्षामिमान् । क्षायो म इत्यस्यासिद्धत्वान्मादुपधायाश्चेति वत्वं न भवति । औजढदिति वहेर्निष्ठायामूढः तमाख्यदिति णिच् तदन्ताल्लुङ् । चङीति द्विर्वचने कर्त्तव्ये ढत्वधत्वष्टुत्वढलोपानामसिद्धत्वाण्णौ च यष्टिलोपस्तस्य स्थानिवद्भावाद् हृत इत्येतद् द्विरुच्यते । अनग्लोप इति प्रतिषेधात्सन्वदित्त्वं नास्ति । तेन औजढदिति भवति । औजिढदित्येतत्तु क्तिन्नन्तस्य उढिशब्दस्य भवति । गुडलिण्मानिति गुडलिहोऽस्य सन्ति इति मतुप् । तत्र ढत्वजश्त्वयोरसिद्धत्वाद् झय इति वत्वं न भवति । येऽत्र षष्ठीनिर्देशाः सप्तमीनिर्देशाः पञ्चमीनिर्देशाश्च तेषां षष्ठी स्थानेयोगा, तस्मिन्निति निर्दिष्टे पूर्वस्य, तस्मादित्युत्तरस्येति च कर्त्तव्ये नासिद्धत्वं भवति । कार्यकालं हि संज्ञापरिभाषमिति पूर्वत्वमासां परिभाषाणां नास्तीति । विप्रतिषेधे परमित्येषा तु परिभाषा येन पूर्वेण लक्षणेन सह स्पर्द्धते परं लक्षणं तत्प्रति तस्यासिद्धत्वान्न प्रवर्त्तते । तथाच सति विस्फोर्यमवगोर्यमिति गुणः परेण हलिचेति दीर्घत्वेन न बाध्यते । अपवादस्य तु परस्यापि उत्सर्गे कर्त्तव्ये वचनप्रामाण्यादसिद्धत्वं न भवति । तेन दोग्धा, दोग्धुम् इत्यत्र घत्वस्य असिद्धत्वात् हो ढः इति न भवति ।

३६९१. नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति ॥ २ ॥

नलोपः पूर्वत्रासिद्धो भवति सुब्विधौ स्वरविधौ संज्ञाविधौ तुग्विधौ च कृति । विधिशब्दोऽयं प्रत्येकमभिसंबध्यमानः स्वरसंज्ञातुकां विधेयत्वात्तैः कर्म्मषष्ठीयुक्तैर्भावसाधनोऽभिसंबध्यते । सुपा तु सम्बन्धसामान्यवचनषठ्यन्तेन कर्म्मसाधनः। तेन सुपः स्थाने यो विधिः सुपि च परभूते, सर्वोऽसौ सुब्विधिरिति सर्वत्रासिद्धत्वं भवति । सुब्विधौ तावत्-राजभिः तक्षभिरित्यत्र नलोपस्यासिद्धत्वादतो भिस ऐसिति न भवति । राजभ्याम्, तक्षभ्याम्, राजसु, तक्षस्विति, सुपि चेति, बहुवचने झल्येदिति दीर्घत्वमेत्वं च न भवति । स्वरविधौ-राजवतीत्यत्र नलोपस्यासिद्धत्वादन्तोऽवत्या इति न भवति । पञ्चार्मं दशार्ममिति । अत्र नलोपस्यासिद्धत्वाद् अर्मे चावर्णद्व्यजिति पूर्वपदस्याद्युदात्तत्वं न भवति । पञ्चदण्डीत्यत्र नलोपस्यासिद्धत्वादिगन्त द्विगाविति पूर्वपदप्रकृतिस्वरो न भवति । संज्ञाविधौ-पञ्च ब्राह्मण्यो, दश ब्राह्मण्य इति नलोपस्यासिद्धत्वात् ष्णान्ता षडिति षट्संज्ञा भवति । ततश्च न षट्स्वस्रादिभ्य इति टापः प्रतिषेधो भवति । तदेतत् प्रयोजनं कथं भवति, यदि

प्रतिकार्यं संज्ञाप्रवृत्तिरित्येतद्दर्शनम् । या हि जश्शसोर्लुगर्था षट्संज्ञा प्रवृत्ता तया स्त्रीप्रत्ययप्रतिषेधो न क्रियत इति सा पुनः प्रवर्त्तयितव्येति । तुग्विधौ - वृत्रहभ्याम्, वृत्रहभिरिति नलोपस्यासिद्धत्वात् ह्रस्वस्य पिति कृति तुगिति तुग्न भवति । अत्र केचित् सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति तुकं प्रति नलोपस्यानिमित्तत्वाद् बहिरङ्गलक्षणेन वाऽसिद्धत्वात्तुग्विधिग्रहणमनर्थकमिति प्रतिपन्नाः, तत्तु क्रियते परिभाषाद्वयस्यानित्यत्वं ज्ञापयितुम् । कृतीति किम्? वृत्रहच्छत्रम् । वृत्रहच्छाया । छे चेति तुग्भवति । अत्र सिद्धे सत्यारभ्भो नियमार्थः । एतेष्वेव नलोपोऽसिद्धो भवति, नान्यत्र । तेन राजीयति, राजायते, राजाश्व इति ईत्वं दीर्घत्वमेकादेशश्च सिद्धो भवति ॥

३६९२. न मु ने ॥ ३ ॥

मुभावो नाभावे कर्त्तव्ये नासिद्धो भवति । किं तर्हि? सिद्ध एव । अमुना । मुभावस्यासिद्धत्वाद् घिलक्षणो नाभावो न स्यात् । कृते तु नाभावे मुभावस्यासिद्धत्वात्, सुपि चेति दीर्घत्वं यत्प्राप्नोति तत्सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न भवति । अथवा योगद्वयमिदमुभयार्थं तन्त्रेणोच्चारितम् । अथवा ने परतो यत्प्राप्नोति तस्मिन् कर्त्तव्ये मुभावो नासिद्ध इत्येष एवात्र सूत्रार्थः । ने तु कर्त्तव्ये मुभावस्य यत्सिद्धत्वं तदर्थतो गृहीतम् । तेनात्र मुभावस्य सिद्धत्वान्नाभावश्च भवति । दीर्घत्वम् च न भवति । एकादेशस्वरोऽन्तरङ्गः सिद्धो वक्तव्यः । किं प्रयोजनम्? अयायावेकादेशशतृस्वरैकाननुदात्तसर्वानुदात्तार्थम् । वृक्ष इदम्, प्लक्ष इदम् । अत्र प्रातिपदिकान्तसप्तम्येकवचनयोरुदात्तानुदात्तयोरेकादेशः । स एकादेश उदात्तेनोदात्त इत्युदात्तः । तस्य सिद्धत्वं वक्तव्यम् । आन्तर्यतः अयादेश उदात्तो यथा स्यात् । आय्-कुमार्या इदम् । कथमिदमुदाहरणम्? यदि उदात्तयणो हल्पूर्वादित्युदात्तत्वे कृते विभक्तेराटश्चेत्येकादेशस्तदा भवतीदमुदाहरणम् । अथ कृते एकादेश उदात्तयणो हल् पूर्वादिति स्वरस्तदा नैतदस्य प्रयोजनं भवति । आव्-वृक्षाविदं प्लक्षाविदम् । एकादेशस्वरः - गाङ्गेऽनूप इति गाङ्गे शब्दे एकार एकादेश उदात्तेन इत्युदात्तः । तस्य सिद्धत्वाद् यः पुनरेङः पदान्तादतीति एकादेशः स एकादेश उदात्तेनोदात्त इति, स्वरितो वाऽनुदात्त पदादाविति, एतद्भवति। शतृस्वरः - तुदती । नुदती । अदुपदेशादिति लसार्वधातुकानुदात्तत्वे कृते एकादेशः तदुदात्तस्य सिद्धत्वात्, शतुरनुमो नद्यजादी, अन्तोदात्तादिति, एष स्वरो भवति । अनुम इति प्रतिषेधो ज्ञापकः - एकादेशस्वरः शतृस्वरे सिद्ध इति । न हि सनुमं शत्रन्तं किंचिदेकादेशस्वरमन्तरेणान्तोदात्तमस्ति । एकाननुदात्तः - तुदन्ति । लिखन्ति । एकादेशस्वरस्य सिद्धत्वाद् अनुदात्तं पदमेकवर्जमिति वर्ज्यमानता भवति । सर्वानुदात्तः - ब्राह्मणास्तुदन्ति । ब्राह्मणा लिखन्ति । एकादेशस्वरस्य सिद्धत्वाद् कृते तस्मिंस्तिङ्ङतिङ इति

निघातो भवति । अन्तरङ्ग इति वचनाद् बहिरङ्गस्यासिद्धत्वमेव पचतीति । प्रपचतीति । संयोगान्तस्य लोपो रोरुत्वे सिद्धो वक्तव्यः । किं प्रयोजनम्? हरिवो मेदिनं त्वा । हरिव इति मतुबन्तमेतत् । तत्र छन्दसीर इति वत्वे संयोगान्तस्य लोपे च कृते, मतुवसो रु संबुद्धौ छन्दसीर इति रुत्वम् । तस्य संयोगान्तस्य लोपस्यासिद्धत्वाद्धशि चेत्युत्वं न प्राप्नोति । सिज्लोप एकादेशे सिद्धो वक्तव्यः । अलावीत् । अपावीत् । इट ईटीति सिज्लोपस्य सिद्धत्वात् सवर्णदीर्घत्वं भवति । निष्ठादेशः षत्वस्वरप्रत्ययविधीड्विधिषु सिद्धो वक्तव्यः । वृक्णः । वृक्णवान् । निष्ठादेशस्य सिद्धत्वात् झलीति षत्वं न भवति । कुत्वं प्रत्यसिद्ध एवेति तद्भवति। स्वरप्रत्ययविधीड्विधिषु क्षीवशब्द उदाह्रियते । तत्र च निपातनमनेकधा समाश्रीयते । यदा क्षीबेर्निष्ठायामिटि कृते इत्शब्दलोपो निपात्यते तदा क्षिब इति संज्ञायामित् शब्दलोपस्याऽसिद्धत्वान्निष्ठा च द्व्यजनादित्येष स्वरो न प्राप्नोति । क्षीबेन तरति क्षीबिक इति द्व्यज्लक्षणष्ठन्न प्राप्नोति । यदा तु तकारलोपो निपात्यते तदा तस्यासिद्धत्वादिडागमः प्राप्नोति । प्लुतविकारस्तुग्विधौ छे सिद्धो वक्तव्यः । अग्नाऽ इच्छत्रम् । पटाऽ उच्छत्रम् । प्लुतविकारस्या-सिद्धत्वाच्छे चेति ह्रस्वलक्षणस्तुग्नित्यं न प्राप्नोति । श्चुत्वं धुटि सिद्धं वक्तव्यम्। श्च्युतिर् क्षरणे इत्ययं धातुः सकारादिः पठ्यते । तस्य श्चुत्वस्यासिद्धत्वाद् अट्श्च्योतति, रट्श्च्योतति इति डः सि धुट् इति प्राप्नोति । अटतीत्यड् । रटतीतिरड् । क्विबन्तोऽयम् । किमर्थं पुनरयं सकरादिः पठ्यते? इह मधु श्च्योततीति मधुश्च्युत् । क्विबन्तः। मधुश्च्युतमाचष्टे इति णिच् । मधुश्च्ययति । मधुश्च्ययतेः पुनः क्विपि कृते संयोगादित्वात् सलोपः संयोगान्तत्वात् यलोपः । चकारस्य कुत्वम् । मधुग् इति सिद्धम् । शकारादौ पुनरेतस्मिन् संयोगान्तलोपेन यकारचकारयोर्लुप्तयोः शकारस्य षत्वे सति मधुडिति स्यात् । अभ्यासजश्त्वचर्त्वे एत्वतुकोः सिद्धे वक्तव्ये । बभणतुः । बभणुः । अभ्यासजश्त्वस्यासिद्धत्वादनादेशादेरित्येत्वम् प्राप्नोति (१) । छिदेः - विचिच्छित्सति, उच्छेः - उचिच्छिषतीति अभ्यासादेशस्यासिद्धत्वात् छे चेति तुक् न प्राप्नोति । द्विर्वचने परसवर्णत्वं सिद्धं वक्तव्यम् । सयँ्यन्ता सवँ्वत्सरः, यलँ्ल्लोकम्, तलँ्ल्लोकमिति परसवर्णस्यासिद्धत्वाद्यर इति द्विर्वचनं न स्यात् । पदाधिकारश्चेल्लत्वघत्वढत्वनत्वरुत्वषत्वणत्वानुनासिकच्छत्वानि सिद्धानि वक्तव्यानि । लत्वम्-गलो गलः । गरो गरः । घत्वम्-द्रोग्धा २ । ढत्वं-द्रोढा २ । नत्वं - नुन्नो नुन्नः । रुत्वम्-अभिनोऽभिनः, अभिनदभिनत् । षत्वम्-मातुष्ष्वसा२ । मातुःस्वसा२ । णत्वं - माषवापाणि२ । माषवापानि२ । अनुनासिकं वाड्नयनम् । वाग्नयनम् । छत्वं - वाक्छयनम्२ । वाक्शयनम्२ । लत्वादीनां विकल्पितानामसिद्धत्वात् कृते द्विर्वचने सत्युपरिष्टाद्विकल्पे सति गरोगलः गलोगरः इत्येवं रूपमपि द्विरुक्तं स्यात् । तदेतत् सर्वं न

मुने इति योगविभागेन साध्यते । न इत्येतावदनिष्टे विषये पूर्वत्रासिद्धत्वस्य प्रतिषेधार्थम् । ततो मु ने इति । नेत्येतदनुवर्त्तते ॥

३६९३. उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य ॥ ४ ॥

उदात्तयणः स्वरितयणश्च परस्यानुदात्तस्य स्वरित आदेशो भवति । उदात्तयणः - कुमार्यौ। कुमार्यः । उदात्तनिवृत्तिस्वरेणायमीकार उदात्तः, तस्य स्थाने यणादेशः स उदात्तयण्, तस्मात् परस्यानुदात्तस्य स्वरित आदेशो भवति । स्वरितयणः - सकृल्ल्व्याशा । खलप्व्याशा । सकृल्लूः, खलपूरिति कृत्स्वरेणान्तोदात्तौ, तयोरोःसुपीति यणादेशः स उदात्तयण्। ततः परस्य सप्तम्येकवचनस्य स्वरितत्वम्, तस्य यणादेशः स्वरितयण्, तस्मात् स्वरितयणः परस्याशाशब्दाकारस्यानुदात्तस्य स्वरितो भवति । ननु च सप्तम्येकवचनस्य यदुदात्तयण इति स्वरितत्वं तदसिद्धं यणादेशे । तत्कथमयं स्वरितयण् भवति? आश्रयात् सिद्धत्वं भविष्यति । यद्येवम् उदात्तादनुदात्तस्य स्वरित इति, एतस्याप्याश्रयात्सिद्धत्वं प्राप्नोति । ततश्च दध्याशेत्यत्रापि स्वरितः स्यात् । तस्मादयमेव यण्स्वरो यणादेशे सिद्धो वक्तव्यः । केचित्तु ब्रुवते, उदात्तात् स्वरितयणोऽपि परस्यानुदात्तस्य स्वरितत्वं दृश्यते । तथाच तैत्तिरीयके शाखान्तरे पठ्यते-यास्ते विश्वाः समिधः सन्त्यग्ने इति । अग्ने इत्ययमकारः स्वरितः पठ्यते । तथा ब्राह्मणेऽपि-दध्याशयतीत्याकारः स्वरितः पठ्यते इति । यथा तु वार्त्तिकं भाष्यं च तथा उदात्तात् स्वरितयणः परस्यानुदात्तस्यानेन स्वरितत्वं न भवतीति स्थितम् । तथाच भाष्ये स्वरितयण्ग्रहणमिदं प्रत्याख्यायते । सकृल्ल्व्याशेत्येवमादावुदात्तयण इत्येव स्वरितस्य सिद्धत्वात्। स्वरितयण्व्यवधानमव्यवधानमेव, स्वरविधौ व्यञ्जनमविद्यमानवदिति । तत्तु क्रियते, पूर्वस्मादपि विधौ स्थानिवद्भावाद् व्यवधानमस्ति । स्वरदीर्घयलोपेषु च लोपाजादेशस्य स्थानिवद्भावः प्रतिषिद्ध्यते इति । उदात्तस्वरितयोरिति किम्? बैदी आशा बैद्याशा । शार्ङ्गरव्याशा । अनुदात्तयणादेशोऽयम् । अनुदात्तस्येति किम्? कुमार्यत्र । किशोर्यत्र । अत्रेत्ययमाद्युदात्तो लित्स्वरेण ॥

३६९४. एकादेश उदात्तेनोदात्तः ॥ ५ ॥

उदात्तेन सहानुदात्तस्य य एकादेशः स उदात्तो भवति । अनुदात्तस्येति वर्त्तते । अग्नी । वायू । वृक्षैः । प्लक्षैः । उदात्तेनेति किम्? पचन्ति । यजन्ति । लसार्वधातुकानुदात्तत्वे कृते द्वयोरनुदात्तयोरयमेकादेशः । पररूपे कर्त्तव्ये स्वरितस्यासिद्धत्वात्॥

३६९५. स्वरितो वाऽनुदात्ते पदादौ ॥ ६ ॥

अनुदात्ते पदादौ उदात्तेन सह य एकादेशः स स्वरितो वा भवत्युदात्तो वा । सु उत्थितः - सूत्थितः२ । वि ईक्षते-वीक्षते२ । वसुकः असि-वसुकोऽसि२। सूत्थित इति सुशब्दः सुः पूजायामिति कर्म्मप्रवचनीयः तस्य प्रादित्वात् समासे सति अव्ययपूर्वपदप्रकृतिस्वरत्वेनाद्युदात्तः शेषमनुदात्तमिति चानुदात्ते पदादावेकादेशो भवति । वीक्षते । वसुकोऽसीति । अत्रापि तिङ्ङतिङ इति निघाते कृतेऽनुदात्ते पदादावेकादेशः । स्वरितग्रहणं विस्पष्टार्थम् । उदात्ते हि विकल्पिते तस्मिन्नसत्यान्तर्यत एव स्वरितो भविष्यतीति । अनुदात्त इति किम्? देवदत्तोऽत्र । पदादाविति किम्? वृक्षौ, वृक्षाः ॥

३६९६. नलोपः प्रातिपदिकान्तस्य ॥ ७ ॥

पदस्येति वर्त्तते । प्रातिपदिकस्य पदस्य योऽन्त्यो नकारस्तस्य लोपो भवति । राजा । राजभ्याम् । राजभिः । राजता । राजतरः । राजतमः । प्रातिपदिकग्रहणं किम्? अहन्नहिम् । अन्तग्रहणं किम्? राजानौ । राजानः । प्रातिपदिकग्रहणमसमस्तमेव सुपां सुलुगिति षष्ठ्या लुका निर्द्दिष्टम् । अहनो नलोपप्रतिषेधो वक्तव्यः । अहः । अहोभ्याम् । अहोभिः । रोऽसुपि, अहन्निति रेफरुत्वयोरसिद्धत्वाद् नलोपः प्राप्नोति । सावकाशं तदुभयं संबुद्धौ-हेऽहः । हे दीर्घाहो निदाघेति । तत्र समाधिमाहुः - अहन्निति रुविधौ यदुपादीयते प्रथमैकवचनान्तमकृतनलोपं तदावर्त्त्यते, तत्रैकयाऽऽवृत्त्या तदेवं रूपं नलोपाभावार्थमन्वाख्यायते, द्वितीययापि तस्य रुर्विधीयते॥

३६९७. न ङिसम्बुद्ध्योः ॥ ८ ॥

ङौ परतः संबुद्धौ च नकारलोपो न भवति । आर्द्रे चर्म्मन् । लोहिते चर्मन् । सुपां सुलुगिति ङेर्लुक् । संबुद्धौ-हे राजन् । हे तक्षन् । एतस्मादेव नलोपप्रतिषेधवचनादप्रत्यय इति प्रत्ययलक्षणेन प्रातिपदिकसंज्ञा न प्रतिषिद्ध्यते इति ज्ञाप्यते । भसंज्ञा च न भवतीति । तथा च राज्ञः पुरुषो राजपुरुष इत्यत्र नलोपश्च भवति । अल्लोपश्च न भवति ॥ डावुत्तरपदे प्रतिषेधस्य प्रतिषेधो वक्तव्यः । चर्मणि तिला अस्य चर्मतिलः । हे राजवृन्दारक इत्यत्र समुदायार्थसंबोधनं, न पूर्वपदार्थसंबोधनं प्रतीयत इति संबुद्ध्यन्तं पूर्वपदं नैव समस्यते । वा नपुंसकानामिति वक्तव्यम् । हे चर्मन् । हे चर्म ॥

३६९८. मादुपधायाश्च मतोर्वोऽयवादिभ्यः ॥ ९ ॥

मतोरिह कार्यित्वेनोपादानात् सामर्थ्यलब्धं प्रातिपदिकं तन्मादिति मकारावर्णाभ्यां विशिष्यते । मकारावर्णविशिष्टया चोपधया इत्ययमर्थो भवति - मकारान्ताद् मकारोपधादवर्णान्तादवर्णोपधाच्चोत्तरस्य मतोर्व इत्ययमादेशो भवति, यवादिभ्यस्तु परतो न भवति । मकारान्तात् तावत् किंवान् । शंवान् । मकारोपधात्-शमीवान् । दाडिमीवान् । अवर्णान्तात् - वृक्षवान् । प्लक्षवान् । खट्वावान् । मालावान् । अवर्णोपधात् - पयस्वान् । यशस्वान् । भास्वान् । मादुपधायाश्चेति किम्? अग्निमान् । वायुमान् । अयवादिभ्य इति किम्? यवमान् । दल्मिमान् । ऊर्म्मिमान् । यव । दल्मि । ऊर्मि । भूमि । कृमि । क्रुञ्चा । वशा । द्राक्षा (१) एतेषां मादुपधायाश्चेति प्राप्नोति । ध्रजि । ध्वजि । सञ्जि (२) इत्येतेषां छन्दसीर इति । हरित् ककुत् गरुत् इत्येतेषां झय इति । इक्षु मधु द्रम मण्ड धूम इत्येतेषां संज्ञायामिति । आकृतिगणश्च यवादिः । अकृतवत्वो मतुप् यवादिषु द्रष्टव्यः । यस्य सति निमित्ते मतुपो वत्वं न दृश्यते स यवादिषु द्रष्टव्यः (३) । इह नृमत इदं नार्मतमिति बहिरङ्गलक्षणत्वादवर्णोपधस्य मतुपो वत्वं न भवति ॥

३६९९. झयः ॥ १० ॥

झयन्तादुत्तरस्य मतोर्व इत्ययमादेशो भवति । अग्निचित्वान् ग्रामः । उदश्वित्वान् घोषः। विद्युत्वान् बलाहकः । इन्द्रो मरुत्वान् । दृषद्वान् देशः ॥

३७००. संज्ञायाम् ॥ ११ ॥

संज्ञायां विषये मतोर्व इत्ययमादेशो भवति । अहीवती । कपीवती । ऋषीवती । मुनीवती ॥

३७०१. आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती ॥ १२ ॥

आसन्दीवद् अष्ठीवत् चक्रीवत् कक्षीवद् रुमण्वत् चर्म्मण्वती इत्येतानि संज्ञायां निपात्यन्ते । वत्वं पूर्वेणैव सिद्धमादेशार्थानि निपातनानि । आसन्दीवदिति । आसनशब्दस्यासन्दीभावो निपात्यते । आसन्दीवान् ग्रामः । आसन्दीवदहिस्थलम् । आसनवानित्येवान्यत्र । अपरे त्वाहुः - आसन्दीशब्दोऽपि प्रकृत्यन्तरमेवास्ति । तथा चोक्तमौदुम्बरी राजासन्दी भवतीति । तस्य संज्ञायामिति वत्वेन सिद्धम् । आसन्दीवदित्येतत्प्रपञ्चार्थमिह पठ्यते । अष्ठीवदिति । अस्थ्नोऽष्ठीभावः । अष्ठीवानिति शरीरैकदेशसंज्ञा । अस्थिमानित्येवान्यत्र । चक्रीवदिति । चक्रशब्दस्य चक्रीभावो निपात्यते ।

चक्रीवान् राजा । चक्रवानित्येवान्यत्र । चक्रीवन्ति सदो हविर्द्धानानि भवन्तीत्येतत्तु छान्दसत्वात् अनुगन्तव्यम् । कक्षीवदिति । कक्ष्यायाः संप्रसारणं निपात्यते । कक्षीवान्नाम ऋषिः । कक्ष्यावानित्येवान्यत्र । रुमण्वदिति लवणशब्दस्य रुमण्भावो निपात्यते । लवणवानित्येवान्यत्र। अपरे त्वाहुः - रुमन्निति प्रकृत्यन्तरमस्ति । तस्यैतन्निपातनं नकारलोपाभावार्थं णत्वार्थं च । मतोर्वा नुडर्थमिति । चर्मण्वतीति । चर्मणो नलोपाभावो णत्वं च निपात्यते । मतोर्वा नुडागमः । चर्मण्वती नाम नदी । चर्म्मवतीत्येवान्यत्र ॥

३७०२. उदन्वानुदधौ च ॥ १३ ॥

उदन्वानित्युदकशब्दस्य मतावुदन्भावो निपात्यते उदधावर्थे, संज्ञायां च विषये । उदन्वान्नाम ऋषिर्यस्यौदन्वतः पुत्रः । उदधौ-उदन्वान् । यस्मिन्नुदकं धीयते स एवमुच्यते । उदधाविति किम्? उदकवान् घट इत्यत्र तु दधात्यर्थो न विवक्ष्यते, किं तर्हि? उदकसत्तासंबन्धसामान्यम् ॥

३७०३. राजन्वान् सौराज्ये ॥ १४ ॥

राजन्वानिति निपात्यते सौराज्ये गम्यमाने । शोभनो राजा यस्मिन्निति स राजन्वान् देशः । राजन्वती पृथ्वी । राजवानित्येवान्यत्र ॥

३७०४. छन्दसीरः ॥ १५ ॥

छन्दसि विषये इवर्णान्ताद्रेफान्ताच्चोत्तरस्य मतोर्वत्वं भवति । इवर्णान्तात्तावत्-त्रिवती याज्यानुवाक्या भवति । हरिवो मेदिनं त्वा । अधिपतिवती जुहोति । चरुरग्निवानिव । आरेवानेतु मा विशत् । रयेर्मताविति संप्रसारणम् । सरस्वतीवान् । भारतीवान् । दधीवांश्चरुः । छन्दसि सर्वे विधयो विकल्प्यन्त इतीह न भवति-सप्तर्षिमन्तम् । ऋषिमान् । ऋतीमान् । सूर्यं ते द्यावापृथिवीमन्तमिति । रेफान्तात् - गीर्वान् । भूर्वान् । आशीर्वान् ॥

३७०५. अनो नुट् ॥ १६ ॥

छन्दसीति वर्तते । अनन्तादुत्तरस्य मतोर्नुडागमो भवति छन्दसि विषये । अक्षण्वन्तः कर्णवन्तः सखायः । अस्थन्वन्तं यदनस्था बिभर्त्ति । अक्षण्वता लाङ्गलेन । शीर्षण्वती । मूर्द्धन्वती । नुटोऽसिद्धत्वात्तस्य च वत्वं न भवति । ततः परस्य च भवति ॥

३७०६. नाद् घस्य ॥ १७ ॥

नकारान्तादुत्तरस्य घसंज्ञकस्य नुडागमो भवति छन्दसि विषये । सुपथिन्तरः । दस्युहन्तमः । भूरिदाव्नस्तुड्वक्तव्यः । भूरिदावत्तरः । ईद्रथिनः । रथिन ईकारान्तादेशो घे परतः। रथीतरः । रथशब्दादेव मत्वर्थीयोऽयमीकारः छन्दसीवनिपाविति ॥

३७०७. कृपो रो लः ॥ १८ ॥

कृपेर्द्धातो रेफस्य लकारादेशो भवति । र इति श्रुतिसामान्यमुपादीयते । तेन यः केवलो रेफो यश्च ऋकारस्तयोर्द्वयोरपि ग्रहणम् । ल इत्यपि सामान्यमेवोपादीयते । ततोऽयं केवलस्य रेफस्य स्थाने लकारादेशो विधीयते, ऋकारस्याप्येकदेशविकारद्वारेण लृकारस्तथा च लुटि च क्लृप इत्येवमादयो निर्देशा उपपद्यन्ते । कल्प्ता । कल्प्तारौ । कल्प्तारः । क्लृप्तः । क्लृप्तवान् । कृपा इत्येतत्क्रपेः संप्रसारणं चेति भिदादिषु पाठाद्भवति । तस्य हि कृतसंप्रसारणस्य लाक्षणिकत्वात् इह कृप इति ग्रहणं नास्ति । कृपणकृपाणकृपीटकर्पूरादयोऽपि क्रपेरेव द्रष्टव्याः उणादयो बहुलमिति वा कृपेरेव लत्वाभावः । बालमूलघ्वसुरालमङ्गुलीनां वा रो लमापद्यत इति वक्तव्यम् । बालः । बारः । मूलम् । मूरम् । लघु । रघु । असुरः । असुलः । अलम् । अरम्। अङ्गुलिः । अङ्गुरिः । कपिलकादीनां संज्ञाछन्दसोर्वा रो लमापद्यत इति वक्तव्यम् । कपिरकः । कपिलकः । तिल्पिलीकम् । तिर्पिलीकम् । लोमानि । रोमाणि । पांशुरम् । पांशुलम् । कर्म । कल्म । रलयोरेकत्वस्मरणमिति केचित् । किमिदमेकत्वस्मरणमिति? समानविषयत्वमेव तयोः स्मर्यत इत्यर्थः ॥

३७०८. उपसर्गस्यायतौ ॥ १९ ॥

अयतौ परत उपसर्गस्य यो रेफस्तस्य लकार आदेशो भवति । प्लायते । पलायते । अत्र च योऽयमेकादेशस्तस्य स्यानिवद्भावादयतेरुपसर्गस्य च विभागे सति यद्ययतिग्रहणं रेफस्य विशेषणं तदा येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यादिति एकेन वर्णेन व्यवधानेऽपि सति लत्वं भवति । तथा च पल्ययते इत्यत्रापि भवति । उपसर्गस्य विशेषणे त्वयतिग्रहणे सिद्धमेवैतत् सर्वं प्रतेरपि तु व्यवहितेऽपि प्राप्नोति । तत्र केषांचिद्दर्शनं भवितव्यमेव प्लत्ययत इति । प्रथमपक्षदर्शनाभिनिविष्टास्तु प्रत्ययत इत्येव भवतीति मन्यन्ते । अपरे तु प्रतिशब्दोपसृष्टस्यायतेः प्रयोगमेव नेच्छन्ति । दुस् निस् इत्येतयोस्तु रुत्वस्यासिद्धत्वाल्लत्वेन नैव भवितव्यम् । निरयणम् । दुरयणम् ॥

३७०९. ग्रो यङि ॥ २० ॥

गृ इत्येतस्य धातोः रेफस्य लकार आदेशो भवति यङि परतः । निजेगिल्यते । निजेगिल्येते । निजेगिल्यन्ते । भावगर्हयां ग्रो यङ् विहितः (१) । केचित् ग्र इति गिरतेर्गृणातेश्च सामान्येन ग्रहणमिच्छन्ति । अपरे तु गिरतेरेव, न गृणातेः । गृणातेर्हि यङेव नास्ति, अनभिधानादिति । यङीति किम्? निगीर्यते ॥

३७१०. अचि विभाषा ॥ २१ ॥

अजादौ प्रत्यये परतो ग्रो रेफस्य विभाषा लकारादेशो भवति । निगिरति । निगिलति । निगरणम् । निगलनम् । निगारकः । निगालकः । इयं तु व्यवस्थितविभाषा । तेन गल इति प्राण्यङ्गे नित्यं लत्वं भवति । गर इति विषे नित्यं न भवति । निगार्यते । निगाल्यत इति । णिलोपस्य स्थानिवद्भावादचि विभाषेति लत्वविकल्पः । पूर्वत्रासिद्धे न स्थानिवदिति एतदपि सापवादमेव, तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति । अन्तरङ्गत्वाद्वा कृते लत्वविकल्पे णिलोपो भविष्यति । गिरौ गिर इत्यत्र धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानमिति लत्वं न भवति । गिरतिर्वा लत्वविधावधिकृतो गृणातेरेतद्रूपम् ॥

३७११. परेश्च घाङ्कयोः ॥ २२ ॥

परि इत्येतस्य यो रेफस्तस्य घशब्देऽकशब्दे च परतो विभाषा लकार आदेशो भवति । परिघः । पलिघः । पर्यङ्कः । पल्यङ्कः । घ इति स्वरूपग्रहणमत्रेष्यते, न तरप्तमपौ घ इति। योगे चेति वक्तव्यम् । परियोगः । पलियोगः ॥

३७१२. संयोगान्तस्य लोपः ॥ २३ ॥

संयोगान्तस्य पदस्य लोपो भवति । गोमान् । यवमान् । कृतवान् । हृतवान् । इह श्रेयान् भूयानिति रुत्वं परमप्यसिद्धत्वात् संयोगान्तस्य लोपं न बाधते । जश्त्वे तु नाप्राप्ते तदारभ्यत इति तस्य बाधकं भवति - यशः पय इति । दध्यत्र मध्वत्रेत्यत्र तु यणादेशस्य बहिरङ्गलक्षणस्यासिद्धत्वात् संयोगान्तलोपो न भवति । पदस्येति किम्? गोमन्त इति ॥

३७१३. रात्सस्य ॥ २४ ॥

संयोगान्तपदस्य यो रेफस्तस्मादुत्तरस्यान्तस्य सकारस्य लोपो भवति । गोभिरक्षाः, प्रत्यञ्चमत्साः, क्षरतेः त्सरतेश्च लुङि सिचश्छान्दसत्वादीडभावो बहुलं छन्दसीति वचनात् दीर्घे सति रूपमेतत् । मातुः पितुरिति ऋत उदिति उत्वे कृते रपरत्वे च सति रात्सस्येति सलोपः ।

सिद्धे सत्यारम्भो नियमार्थः - रात्सस्यैव लोपो भवति नान्यस्येति । ऊर्जेः क्विप्-ऊर्क् । मृजेर्लङि-अमार्ट् ॥

३७१४. धि च ॥ २५ ॥

धाकारादौ प्रत्यये परतः सकारस्य लोपो भवति । अलविध्वम् । अलविढ्वम् । अपविध्वम् । अपविढ्वम् । यद्यत्र सकारलोपो न स्यात्, सिचः षत्वे जश्त्वे च विभाषेट इति मूर्द्धन्याभावपक्षेऽपि न धकारः श्रूयेत । इतः प्रभृति सिचः सकारस्य लोप इष्यते । इह न भवति - चकाद्धि पलितं शिर इति । तथा पयो धावतीत्येवमादीनामपि न भवति । सग्धिर्बब्धामिति छान्दसो वर्णलोपः । भाष्यकारस्त्वाह - चकाधीत्येव भवितव्यमिति । तेन पयो धावतीत्येवमादौ यत्नान्तरमास्थेयम् ॥

धि सकारे सिचो लोपश्चकाद्धीति प्रयोजनम् ।
आशाध्वं तु कथं जश्त्वं सकारस्य भविष्यति ।
सर्वमेव प्रसिद्धं स्याच्छ्रुतिश्चापि न विद्यते ।
लुङश्चापि न मूर्द्धन्ये ग्रहणं सेटि दुष्यति ॥
घसिभसोर्न सिध्येत तस्मात् सिज्ग्रहणं न तत् ।
छान्दसो वर्णलोपो वा यथेष्कर्त्तारमध्वरे ॥
निष्कर्त्तारमध्वरस्येत्येवं प्राप्ते ॥

३७१५. झलो झलि ॥ २६ ॥

झल उत्तरस्य सकरस्य झलि परतो लोपो भवति । अभित्त । अभित्थाः । अच्छित्त । अच्छित्थाः । अवात्ताम् , अवात्तेत्यत्र वा सिचः सकारलोपस्यासिद्धत्वात् सः स्यार्द्धधातुक इति सकारस्य तकारः । झल इति किम्? अमंस्त । अमंस्थाः । झलीति किम्? अभित्साताम् । अभित्सत । अयमपि सिच एव लोपस्तेनेह न भवति - सोमसुत् स्तोता । दृषत् स्थानमिति ॥

३७१६. ह्रस्वादङ्गात् ॥ २७ ॥

ह्रस्वान्तादङ्गादुत्तरस्य लोपो भवति झलि परतः । अकृथाः । अह्रथाः । ह्रस्वादिति किम्? अष्योष्ट । अप्लोष्ट । अङ्गादिति किम्? अलाविष्टाम् । अलाविषुः.। झलीत्येव । अकृषाताम् । अकृषत । अयमपि सिच एव लोपस्तेनेह न भवति - द्विष्टरां द्विष्टमामिति । सुजन्ताद् द्विशब्दात्तरप्तमपौ । अद्रव्यप्रकर्शे आतिशयिक आम् प्रत्ययः ॥

३७१८. इट ईटि ॥ २८ ॥

इट उत्तरस्य सकारस्य लोपो भवति ईटि परतः । अदावीत् । असेवीत् । अकोषीत् । अमोषीत् । इट इति किम्? अकार्षीत् । ईटीति किम्? अलाविष्टाम् । अलाविषुः ॥

३७१९. स्कोः संयोगाद्योरन्ते च ॥ २९ ॥

पदस्यान्ते यः संयोगः झलि परतो वा यः संयोगस्तदाद्योः सकवाककारयोर्लोपो भवति। लस्जेः - लग्नः । लग्नवान् । साधुलक् । ककारस्य-तक्षेः, तट् । तष्टवान् । कष्ठतट् । झलि सडीति वक्तव्यम् । किमिदं सडीति? सनः सात्प्रभृति महिडो डकारेणप्रत्याहारः । इह मा भूत्-काष्ठशक्स्थातेति थकारे झलि ककारस्य संयोगादेर्लोपः प्राप्नोति । तदत्र लकेः किबन्तस्य प्रयोग एव नास्तीत्याह । कष्ठशगेव नास्ति कुतोऽयं काष्ठशकि तिष्ठेविति । वास्यर्थं, काक्वर्थमिति । अत्रापि बहिरङ्गलक्षणस्य यणादेशस्यासिद्धत्वात् संयोगादिलोपो न भवति । स्कोरिति किम्? नर्नत्ति, वर्वर्ति । संयोगद्योरिति किम्? पयः शक् । अन्ते चेति किम्? तक्षिता। तक्षकः ॥

३७२०. चो कुः ॥ ३० ॥

चवर्गस्य कवर्गादेशो भवति झलि परतः पदान्ते च । पक्ता । पक्तुम् । पक्तव्यम् । ओदनपक् । वक्ता । वक्तुम् । वक्तव्यम् । वाक् । कुञ्चत्यत्र सडीति वचनात् ञकारस्य चकारे झलि कुत्वं न भवति । युजिक्रञ्चां चेति निपातनाद्वा । नकारोपधो वा धातुरयं रेफरहितश्च कृञ्च कौटिल्यालपीभावयोरिति पठ्यते । नकारलोपे हि निकुचिरिति दृश्यते । युजिकुञ्चां चेति तस्यैव रेफोऽधिको नकारस्य लोपाभावश्चेति निपात्यते । तत्रानुस्वारस्य परसवर्णस्य चासिद्धत्वात् ञकार एव नास्तीति कुत्वं न भविष्यति ॥

३७२१. हो ढः ॥ ३१ ॥

हकारस्य ढकारादेशो भवति झलि परतः पदान्ते च । सोढा । सोढुम् । सोढ्व्यम् । तुराषाट् । वोढा । वोढुम् । प्रष्ठवात् । दित्यवाट् ।

३७२२. दादेर्धातोर्घः ॥ ३२ ॥

दकारादेर्धातोर्हकारस्य घकारादेशो भवति झलि परतः पदान्ते च । दग्धा । दग्धुम् । दग्धव्यम् । काष्टधक् । दोग्धा । दोग्धुम् । दोग्धव्यम् । गोधुक् । दादेरिति किम्? लेढा । लेढुम् । लेढव्यम् । गुडलिट् । धातोरिति दादिसमानाधिकरणमेतन्न, किं तर्हि?

तद्विशेषणमवयवष्ठ्यन्तं धातोरवयवो यो दादिः शब्दस्तवयवस्य हकारस्येति । किमेवं कुतं भवति? अधोगित्यत्रापि घकारः सिद्धो भवति । कथं दोग्धा दोग्धुमिति? व्यपदेशिवद्भावात् । अथवा धातूपदेशे यो दारिदित्येवं विज्ञायते । तथा च दामलिहमिच्छति दामलिह्यति, दामलिह्यतेः किप् प्रत्ययः, दामलिडित्यत्रापि न भवति ॥

३७२३. वा द्रुहमुहष्णुहष्णिहाम् ॥ ३३ ॥

द्रुह मुह ष्णुह ष्णिह इत्येतेषां धातूनां हकारस्य वा घकारादेशो भवति झलि परतः पदान्ते च । द्रुह्-द्रोग्धा । द्रोढा । मित्रध्रुक् । मित्रध्रुट् । मुह-उन्मोग्धा । उन्मोढा । उन्मुक् । उन्मुट् । स्नुह् - उत्स्नोग्धा । उत्स्नोढा । उत्स्नुक् । उत्स्नुट् । स्निह्-स्नेग्धा । स्नेढा । स्निक्। स्निट् । द्रुहेर्दादित्वात् घत्वं नित्यं प्राप्तमितरेषाम-प्राप्तमेव घत्वं विकल्प्यते ॥

३७२४. नहो धः ॥ ३४ ॥

नहो हकारस्य धकारादेशो भवति झलि परे पदान्ते च । नद्धम् । नद्धुम् । नद्धव्यम् । उपानत् । परीणत् ॥

३७२५. आपस्थः ॥ ३५ ॥

आहो हकारस्य थकारादेशो भवति झलि परतः । इदमात्थ । किमात्थ । आदेशान्तरकरणं झषस्तथोर्द्धोऽघ इत्यस्य निवृत्त्यर्थम् । झलीत्येव । आह । आहतुः । आहुः । ह्वग्रहोर्भश्छन्दसि हस्येति वक्तव्यम् । गर्दभेन - संभरति । प्रभीता । जभ्रिरे । उद्ग्राभं च निगाभं च ब्राह्म देवा अवीवृधन् ॥

३७२६. व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः ॥ ३६ ॥

व्रश्च भ्रस्ज सृज मृज यज राज भ्राज इत्येतेषां छकारान्तानां शकारान्तानां च षकार आदेशो भवति झलि परतः पदान्ते च । व्रश्च-व्रष्टा । व्रष्टुम् । व्रष्टव्यम् । मूलवृट् । भ्रस्ज-भ्रष्टा। भ्रष्टुम् । भ्रष्ठव्यम् । धानाभृट् । सृज-स्रष्टा । स्रष्टुम् । रज्जुसृट् । मृज-मार्ष्टा । मार्ष्टुम् । मार्ष्टव्यम् । कंसपरिमृट् । यज-यष्टा । यष्टुम् । यष्टव्यम् । उपयट् । राज-सम्राट। स्वराट् । विराट् । भ्राज-विभ्राट् । राजभ्राजयोः पदान्तार्थं ग्रहणं, झलादिराभ्यामिटा पर्यवपद्यते। केचित्तु राष्टिरिति क्तिन्नन्तमिच्छन्ति । छकारान्तानाम् - प्रच्छ-प्रष्टा । प्रष्टुम्। प्रष्टव्यम् । शब्दप्राट् । च्छवोः शूडनुनासिके चेत्यत्र क्ङितीत्यनुवर्त्तते इति छग्रहणमिह

क्रियते । शकारान्तानाम् - लिश्-लेष्टा । लेष्टुम् । लिट् । विश्-वेष्टा । वेष्टुम् । वेष्टव्यम् । विट् ॥

३७२७. एकाचो बशो भष् झषन्तस्य स्ध्वोः ॥ ३७ ॥

धातोरवयवो व एकाच् झषन्तः तदवयवस्य बशः स्थाने भष् आदेशो हवति झलि सकारे ध्वशब्दे च परतः पदान्ते च । अत्र चत्वारोबशः स्थानिनो भशादेशाश्चत्वार एव, तत्र सङ्ख्यातानुदेशे प्राप्ते डकारस्य स्थानिनोऽभावात् ढकारदेशो न भवति? आन्तर्यतो व्यवस्था विज्ञास्यते । बुध-भोत्स्यन्ते । अभुद्ध्वम् । अर्थभुत् । गुह-निघोक्ष्यते । न्यघूढ्वम् । पर्णघुट्। दुह-धोक्ष्यते । अधुग्ध्वम् । गोधुक् । अजर्घाः - गृधेर्यङ्लुगन्तस्य लङि सिपि अटि लघूपधगुणे कृते सिपो हलङ्यादिलोपे च धातोरवयवस्यैकाचो बशः स्थाने भष्भावस्ततो धकारस्य जश्त्वं दश्चेति रुत्वं, रोरीति पूर्वरेफस्य लोपः, ढ्रलोपे पूर्वस्य दीर्घोऽण इति दीर्घत्वम् । गद् र्दभयतेरप्रत्ययः - गर्द्धप् । एकाच इति किम्? दामलिहमिच्छति दामलिहयति, दामलिहयतेरप्रत्ययः - दामलिट् । असति हयेकाज्ग्रहणे धातोरित्येतद्बशो विशेषणं स्यात् । बश इनि किम्? क्रुध-क्रोत्स्यति । झषन्तस्येति किम्? दास्यति । स्ध्वोरिति किम्? बोद्धा । बोद्धुम्। बोद्धव्यम् । धकारस्य वकारोपसृष्टस्य ग्रहणं किम्? दादद्धि । दध धारण इत्येतस्य यङ्लुकि लोटि हुझल्भ्योहेधिरिति धिभावे सत्येतद्भवति ।

३७२८. दधस्तथोश्च ॥ ३८ ॥

दध इति दधातिः कृतद्विर्वचनो निर्द्दिश्यते । तस्य झलन्तस्य बश स्थाने भश आदेशो भवति तकारथकारयोः परतश्चकारात् स्ध्वोश्च परतः । धप्तः । धत्थः । धत्से । धत्स्व । धद्ध् वम् । वचनसामर्थ्यादातो लोपस्य स्थानिवद्भावो न भवति । अभ्यासजश्त्वस्य चासिद्धत्वम् । तथोरिति किम्? आनन्तर्यात्स्ध्वोरेव विज्ञायेत । चकारस्तयोरनुवृत्त्यर्थः । झषन्तस्येत्येव-दधाति ।

३७२९. झलां जशोन्ते ॥ ३९ ॥

झलां जश आदेशा भवन्ति पदस्यान्ते वर्त्तमानानाम् । वागत्र । श्वलिडत्र । अग्निचिदत्र। त्रिष्टुबत्र । अन्तग्रहणं झलीत्येतस्य निवृत्त्यर्थम् । वस्ता । वस्तव्यम् ॥

३७३०. झपस्तथोर्द्धोऽधः ॥ ४० ॥

झष उत्तरयोस्तकारथकारयोः स्थाने धकार आदेशो भवति दधातिर वर्जयित्वा । लब्धा। लब्धुम । लब्धव्यम् । अलब्ध । अलब्धाः । दुह-दोग्धा । दोग्धुम् । दोग्धव्यम् । अदुग्ध अदुग्धाः । लिह-लेढा । लेढुम् । लेढव्यम् । अलीढ । अलीढाः । बुध-बोद्धा । बोद्धुम् । बोद्धव्यम्। अबुद्ध । अबुद्धाः । अध इति किम्? धत्तः । धत्थः ॥

३७३१. षढोः कः सि ॥ ४१ ॥

षकारढकारयोः ककारादेशो भवति सकारे परतः । षकारस्य-पिष्-विवेक्षयति । अवेक्ष्यत्। विवक्षति । ढकारस्य-लिह-लेक्ष्यति । अलेक्ष्यत् । लिलिक्षति । सीति किम्? पिनष्टि । लेढि ॥

३७३२. रदाभ्यां निष्ठातो नः पूर्वस्य च दः ॥ ४२ ॥

रेफदकाराभ्यामुत्तरस्य निष्ठातकारस्य नकार आदेशो भवति पूर्वस्य च दकारस्य.। रेफान्तात्तावत्-आस्तीर्णम् । विस्तीर्णम् । विशीर्णम् । निगीर्णम् । अवगूर्णम् । दकारात्-भिन्नः। मिन्नवान् । छिन्नः । छिन्नवान् । रदाभ्यामिति किम्? कृतः । कृतवान् । र इत्यत्र रश्रुतिसामान्यं नोपादीयते, किं तर्हि व्यञ्जनमात्रम् । रेफसामान्यनिद्देशेऽपि सति रेफात् परा याज्विभक्तितदव्यवधानान्नत्वं न भवति । निष्ठेति किम्? कर्त्ता । हर्त्ता । त इति किम्? चरितम् । मुदितम् । पूर्वस्येति । किम्? परस्य मा भूत् । भिन्नवद्भ्यम् । भिन्नवद्भिः । इह कृतस्याप्यं कातिरिति वृद्धेर्बहिरङ्गलक्षणाया असिद्धभ्वान्नत्वे कर्त्तव्ये रेफस्यासिद्धत्वम् ॥

३७३३. संयोगादेरातो धातोर्यण्वतः ॥ ४३ ॥

संयोगादिर्यो धातुराकारान्तो यण्वान् तस्मादुत्तरम्य निष्ठातकारस्य नकारादेशो भवति । प्रद्राणः । प्रद्राणवान् । ग्लानः । ग्लानवान् । संयोगादेरिति किम्? यातः.। यातवान् । आत इति किम्? च्युतः । च्युतवान् । प्लुतः । प्लुतवान् । धातोरिति किम्? निर्यातः । निर्वातः । यण्वत इति किम्? स्नातः । स्नातवान् ॥

३७३४. ल्वादिभ्यः ॥ ४४ ॥

लृञ् छेदने इत्येतत्प्रभृति वृञ वरणे इति यावत् वृत्करणेन समापिता ल्वादयो गृह्यन्ते। तेभ्य उत्तरस्य निष्ठातकारस्य नकारादेशो भवति । लूनः । लूनवान् । धूनः.। धूनवान् । जीनः। जीनवान् । ऋकारल्वादिभ्यः क्तिन्निष्ठावद्भवतीति वक्तव्यम्.। कीर्णिः । गीर्णिः । शीर्णिः । लूनिः। पूनिः दुग्वोर्दीर्घश्चेति वक्तव्यम् । दु-आदूनः.। गु-विगूनः । पूञो विनाश इति

वक्तव्यम् । पूना यवाः, विनष्टा इत्यर्थः । विनाशः इति किम्? पूतं धान्यम् । सिनोतेर्ग्रासकर्म्मकर्तृकस्येति वक्तव्यम् । सिनो ग्रासः स्वयमेव । ग्रासकर्मकर्तृकस्येति किम्? सिता पाशेन सूकरी । ग्रासोऽपि यदा कर्मैव भवति न कर्मकर्त्ता तदा न भवति-सितो ग्रासो देवदत्तेनेति ॥

३७३५. ओदितश्च ॥ ४५ ॥

ओकारेतो धातोरुत्तस्य निष्ठातकारस्य नकारादेशो भवति । ओलस्जी-लग्नः । लग्नवान्। ओविजी-उद्विग्नः । उद्विग्नवान् । ओप्यायी वृद्धौ-आपीनः । आपीनवान् । स्वादय ओदितः - ष्वङ्-सूनः । सूनवान् । दूङ्-दूनः । दूनवान् । दीङ्-दीनः । दीनवान् । डीङ्-डीनः । डीनवान् । धीङ्-धीनः । धीनवान् । मीङ्-मीनः । मीनवान् । रीङ्-रीणः । रीणवान् । लीङ्-लोनः। लीनवान् । व्रीङ्-व्रीणः । व्रीणवान् ॥

३७३६. क्षियो दीर्घात् ॥ ४६ ॥

क्षियो धातोर्दीर्घादुत्तरस्य निष्ठातकारस्य नकारादेशो भवति । क्षीणाः क्लेशाः.। क्षीणो जाल्मः । क्षीणस्तपस्वी । क्षियो निष्ठायामण्यदर्थे, वाऽऽक्रोशदैन्ययोरिति दीर्घत्वं भवति । दीर्घादिति किम्? अक्षितमसि मामेक्षेष्ठाः । अक्षितमिति क्तप्रत्ययो भावे । भावश्च ण्यदर्थ इति दीर्घाभावः । ह्रस्वान्तरस्यापि धात्वनुकरणस्य इह इयङा निर्देशः । क्षियो निष्ठायामण्यदर्थ इत्यत्र दीर्घग्रहणं क्रियते । विपराभ्यां जेरित्येवमादौ तु धातुत्वमनुकार्यगतं सदप्यविवक्षितत्वाद् जिरूपसामान्यानुकरणं द्रष्टव्यम् ॥

३७३८. श्योऽस्पर्शे ॥ ४७ ॥

श्यायतेरुत्तरस्य निष्ठातकास्स्य अस्पर्शे नकार आदेशो भवति । शीनं घृतम् । शीनं मेदः। शीना वसा । अस्पर्श इति किम्? शीतं वर्त्तते । शीतो वायुः । शीतमुदकमित्यत्र गुणभूतोऽपि स्पर्शो नत्वप्रतिषेधस्य सम्प्रसारणस्य च निमित्तं भवति । गुणे च स्पर्शे प्रतिषेधोऽयं न रोगे, तेन प्रतिशीन इत्यत्र नत्वं भवत्येव ॥

३७३९. अञ्चोऽनपादाने ॥ ४८ ॥

अञ्चतेरुत्तरपदस्य निष्ठातकारस्य नकारादेशो भवति न चेदपादानं तत्र भवति । समक्नौ शकुनेः पादौ । तस्मात् पशवो न्यक्नाः । अनपादान इति किम्? उदक्तमुदकं कूपात्। व्यक्तमित्येतदब्जे रूपम् ॥

३७४०. दिवोऽविजिगीषायाम् ॥ ४९ ॥

दिव उत्तरस्य निष्ठातकारस्य नकारादेशो भवति अविजिगीषायामर्थे । आद्यूनः.। परिद्यनः। अविजिगीषायामिति किम्? द्यूतं वर्त्तते । विजिगीषया हि तत्राक्षपातनोदि क्रियते॥

३७४१. निर्वाणोऽवाते ॥ ५० ॥

निर्वाण इति निस्पूर्वाद्धातोरुत्तरस्य निष्ठातकारस्य नकारो निपात्यते न चेद्वाताधिकरणो वात्यर्थो हवति । निर्वाणोऽग्निः । निर्वाणः प्रदीपः । निर्वाणो भिक्षुः । अवात इति किम्? निर्वातो वातः । निर्वातं वातेन । निर्वाणः प्रदीपो वातेनेत्यत्र तु प्रदीपाधिकरणो वात्यर्थोवातस्तु तस्य करणमिति भवत्येव नत्वम् ॥

३७४२. शुषः कः ॥ ५१ ॥

शुषेर्द्धातोरुत्तरस्य निष्ठातकारस्य ककारादेशो भवति । शुष्कः । शुष्कवान् ॥

३७४३. पचो वः ॥ ५२ ॥

पचेर्द्धातोरुत्तरस्य निष्ठातकारस्य वकारादेशो भवति । पक्वः । पक्ववान् ॥

३७४४. क्षायो मः ॥ ५३ ॥

क्षैधातोरुत्तरस्य निष्ठातकारस्य मकारादेशो भवति । क्षामः । क्षामवान् ॥

३७४५. प्रस्त्योऽन्यतरस्याम् ॥ ५४ ॥

प्रपूर्वात् स्त्यायतेरुत्तरस्य तिष्ठातकारस्यान्यतरस्यां मकारादेशो भवति । प्रस्तीमः । प्रस्तीमवान् । प्रस्तीतः । प्रस्तीतवान् । यदा मत्वं नास्ति तदा संयोगादेरातो धातोर्यण्वत इत्यस्य पूर्वत्रासिद्धत्वात् संप्रसारणं प्रथमं क्रियते । तत्र कृते निमित्तव्याघाताऩ्नत्वम् न भवति॥

३७४६. अनुपसर्गात् फुल्लक्षीबकृशोल्लाघाः (१) ॥ ५५ ॥

फुल्ल क्षिब कृश उल्लाघैत्येते निपात्यन्ते न चेदुपसर्गादुत्तरा भवन्ति । फुल्ल इति त्रिफला विशरण इत्येतस्माद्धातोरुत्तरस्य निष्ठातकारस्य लकारो निपात्यते । उत्वमिडभावश्च सिद्ध एव । क्तवत्वन्तस्याप्येतलत्वमिष्यते । फुल्लः । फुल्लवान् इति । क्षीबकृशोल्लघा इति

क्षीबकृशिभ्यामुत्पूर्वाच्च लाघेः क्तप्रत्ययस्य तलोप इडागमाभावश्च निपात्यते । कृते वा इटि इच्छब्दलोपः । क्षिबः । कृशः । उल्लाघः.। अनुपसर्गादिति किम्? प्रफुल्ताः समनसः । प्रक्षीबितः । प्रकृशितः । प्रोल्लाघितः । लाघेरुदोऽन्य उपसर्गः प्रतिषिद्ध्यते । उत्फुल्लसंफुल्लयोरिति वक्तव्यम् । उत्फुल्लः । संफुल्लः । परिकृश कृशः परिकृश इति ॥

३७४७. नुदविदोन्दत्राघ्रह्रीभ्योऽन्यतरस्याम् ॥ ५६ ॥

नुद विद उन्दी त्रा घ्रा ह्री इत्येतेभ्य उत्तरस्य निष्ठातकारस्य नकर आदेशो भवति अन्यतरस्याम् । नुद-नुन्नः । नुत्तः । विद-विन्नः । उन्द-समुन्नः समुत्तः । त्रा-त्राणः । त्रातः। घ्रा-घ्राणः । घ्रातः । ह्री-ह्रीणः । ह्रीतः । ह्री इत्येतस्मादप्राप्तं नन्वमितरेषां नित्यं प्राप्तम् विकल्प्यते । विद विचारण इत्यस्य विदेरिह ग्रहणमिष्यते । एवमुक्तम्-

वेत्तेन्तु विदितो निष्ठा विद्यतेविन्न इष्यते ।
वित्तेर्विन्नश्च वित्तश्च भोगे विन्नञ्च विन्दतेः ॥ इति ॥

३७४८. न ध्याख्यापॄमूर्च्छिमदाम् ॥ ५७ ॥

ध्या ख्या पॄ मूर्छि मद इत्येतेषां निष्ठातकारस्य नकारादेशो न भवति । ध्यातः.। ध्यातवान् । ख्यातः । ख्यातवान् । पूर्तः । पूर्तवान् । मूर्तः । मूर्तवान् । मत्तः । मत्तवान् । रदाभ्यां संयोगादेरिति च प्राप्त प्रतिषिद्ध्यते ॥

३७४९. वित्तो भोगप्रत्यययोः ॥ ५८ ॥

वित्त इति विदेर्लाभार्थादुत्तरस्य क्तस्य नत्वाभावो निपात्यते भोगे प्रत्यये चाभिधेये । वित्तमस्य बहु । धनमस्य बहित्यर्थः । धनं हि भुज्यत इति भोगोऽभिधीयते । प्रत्ययेवित्तोऽयं मनुष्यः । प्रतीत इत्यर्थः । प्रतीयत इति प्रत्ययः । भोगप्रत्ययोरिति किम्? विन्नः ॥

३७५०. भित्तं शकलम् ॥ ५९ ॥

भित्तमिति निपात्यते शकलं चेत्तद्भवति । भित्तं तिष्ठति । भित्तं प्रपतति । शकलपर्यायोऽयम् । अत्र भिदिक्रिया शब्दव्युत्पत्तेरेव निमित्तम् । भिदिक्रियाविवक्षायां हि शकलविषये भिन्नमित्येव भवति ॥

३७५१. ऋणमाधमर्ण्ये ॥ ६० ॥

ऋणमिति ऋ इत्येतस्माद्धातोरुत्तरस्य निष्ठातकारस्य नकारो निपात्यते आधमर्ण्यविषये। अधम ऋणे, अधमर्णः । एतस्मादेव निपातनात् सप्तम्यन्तेनोत्तरपदेन समासः । तद्भाव आधमर्ण्यम् । यद्येवमुत्तमर्ण इति न सिद्ध्यति? नैष दोषः । कालान्तरदेयविनिमयोपलक्षणार्थं चेदमुपात्तम् । तेन उत्तमर्ण इत्यपि हि भवति । ऋणं ददाति। ऋणं धारयति । आधमर्ण्य इति किम्? ऋतं वक्ष्यामि नानृतम् ॥

३७५२. नसत्तनिषत्तानुत्तप्रतूर्त्तसूर्त्तगूर्त्तानि छन्दसि ॥ ६१ ॥

नसत्त निषत्त अनुत्त प्रतूर्त्त सूर्त्त गूर्त्त इत्येतानि छन्दसि विषये निपात्यन्ते । नसत्तनिषत्तेति सदेर्नञ्पूर्वान्निपूर्वाच्च नत्वाभावो निपात्यते । नसत्तमञ्जसा । नसन्नमिति भाषायाम् । निषत्तः । निषण्ण इति भाषायाम् । अनुत्तमित्युन्देर्नञ्पूर्वस्य निपातनम् । अनुत्तमा ते मघवन् । अनुन्नमिति भाषायाम् । प्रतूर्त्तमिति त्वरतेः तूर्विहत्येतस्यथ वा निपातनम् । प्रतूर्त्त वाजिनम् । प्रतूर्णमिति भाषायाम् । सूर्त्तमिति सृ इत्येतस्य उत्वं निपात्यते । सूर्त्ता गावः। सृता गाव इति भाषायाम् । गूर्त्तमिति गूरी इत्येतस्यनत्वाभावो निपात्थते । गूर्त्ता अमृतस्य । गूर्णमिति भाषायाम् ॥

३७५३. क्विन्प्रत्ययस्य कुः ॥ ६२ ॥

पदस्येति वर्त्तते । क्विन्प्रत्ययस्य सर्वत्र पदान्ते कुत्वमिष्यते । क्विन्प्रत्ययो यस्माद्धातोः स क्विन्प्रत्ययः । तस्य पदस्यालोऽन्त्यस्य कवर्गादेशो भवति । स्पृशोऽनुदके क्विन् । घृतस्पृक् । हलस्पृक । मन्त्रदृक् । क्विनः कुरिति वक्तव्ये प्रत्ययग्रहणं कृतं बहुव्रीहिविज्ञानाऽर्थम्-क्किन् प्रत्ययो यस्माद्विहितस्मादन्यस्मिन्नपि प्रत्यये कुत्वं यथा स्यात् । मा नो अस्राक् । मा नो अद्राक् । सृजिदृशिभ्यां हि क्विन् विहितः । तयोर्लुङि कुत्वमेतत् । माङ्योगेऽपि छान्दसत्वादडागमः । ईडपि न भवति बहुलं छन्दसीति । तथा दृग्भ्यां दृग्भिरिति क्विबन्तस्यापि दृशेः कुत्वं भवति । एवं च सति रज्जुसृड्भ्यामित्यत्रापि कुत्वं प्राप्नोति? अथ तु नेष्यते, ततस्तत्प्रतिविधातव्यमिति ॥

३७५४. नशेर्वा ॥ ६३ ॥

पदस्येति वर्त्तते । नशेः पदस्य वा कवर्गादेशो भवति । सा वै जीवनगाहुतिः.। सा वै जीवनडाहुतिः । नशेरयं सम्पदादित्वाद् भावे क्विप् । जीवस्य नाशो जीवनक् । जीवनट् । शत्वे प्राप्ते कुत्वाविकल्पः ॥

३७५५. मो नो धातोः ॥ ६४ ॥

मकारान्तस्य धातोः पदस्य नकारादेशो भवति । प्रशान् । प्रतान् । प्रदान् । शमितमिदमादीनां क्विप् । अनुनासिकस्य क्विझलोः क्ङितीति दीर्घत्वम् (१) । नवस्यासिद्धत्वान्नलोपो न भवति । म इति किम्? भित् । छित् । धातोरिति किम्? इदम् । किम् । पदस्येत्येव । पतामौ । पतामः ॥

३७५६. म्वोश्च ॥ ६५ ॥

मकारवकारयोश्च परतः मकारान्तस्य धातोर्नकारादेशो भवति । अगन्म तमसः पारम् । अगन्व । गमेर्लङि बहुलं छन्दसीति शपो लुक् । जगन्वान् । विभाषा गमहनजनविदविशामिति क्वसाविडागमस्याभावः । अपदान्तार्थ आरम्भः ॥

३७५७. ससजुषो रुः ॥ ६६ ॥

सकारान्तस्य पदस्य सजुष इत्येतस्य च रुर्भवति । सकारान्तस्य-अग्निरत्र.। वायुरत्र । सजुषः - सजूऋषिभिः । सजूर्देभिः । जुषेः क्विपि सपूर्वस्य रूपमेतत्.॥

३७५८. अवयाः श्वेतवाः पुरोडाश्च ॥ ६७ ॥

अवयाः श्वेतवाः पुरोडाः इत्येते निपात्यन्ते । अवपूर्वस्य यजेः श्वेतपूर्वस्य वहेः पुरस्पूर्वस्य दाशतेः मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन्, अवे यज इति ण्विनि कृते श्वेतवहादीनां डस्पदस्येति डस्प्रत्यये निपातनन्येतानि । किमर्थं तर्हि निपातनं यावता पूर्वेणैव रुः सिद्धः, दीर्घत्वमप्यत्वसन्तस्य चाधातोति? संबुद्धौ दीर्घार्थमेते निपात्यन्ते । अत्वसन्तस्य चाधातोरित्यत्र हि असंबुद्धाबिति वर्त्तते । हे अयवाः । हे श्वेतवाः । हे पुरोडाः । चकारोऽनुक्तसमुच्चयार्थः । हे उक्थशाः ॥

३७५९. अहन् ॥ ६८ ॥

अहन्नित्येतस्य पदस्य रुर्भवति । अहोभ्याम् । अहोभिः । नलोपमकृत्वा निर्देशो ज्ञापकः - नलोपाभावो यथा स्यादिति । दीर्घाहो निदाघः । हे दीर्घाहोऽत्रेति । अहन्नित्यत्र तु लाक्षणिकत्वादहन्शब्दस्य रुर्न भवति । अहनो रुविधौ रूपरात्रिरथन्तरेषूपसंख्यानं कर्त्तव्यम् । अहो रूपम् । अहो रात्रः । अहो रथन्तरम् । रोऽसुपीत्यस्यापवादो रुत्वमुपसंख्यायते । अपर आह - सामान्येन रेफादौ रुत्वम् भवति - अहो रम्यम् । अहो रत्नानीति ॥

३७६०. शेऽसुपि ॥ ६९ ॥

अहनित्येतस्य रेफादेशो भवत्यसुपि परतः । अहदर्ददाति । अहर्भुङ्क्ते । असुपीति किम्? अहोभ्याम् । अहोभिः । ननु चात्रापि प्रत्ययलक्षणेन सुबस्ति-अहद्र्ददाति, अहर्भुङ्क्त इति? नैतदस्ति । उक्तमेतत् । अहनो रविधौ लौमता लुप्ते प्रत्ययलक्षणं न भवतीति नायमहः शब्दः सुप्परो भवति । यत्र तु लोपशब्देन लुप्यते तत्र प्रत्ययलक्षणं भवत्येव । यथा-हे दीर्घाहोऽत्र, दीर्घाहो निदाघ इति । अत्र हि हल्ङ्याविति लोपेन प्रत्ययस्य निवृतिः ॥

३७६१. अम्नरूधरवरित्युभयथा छन्दसि ॥ ७० ॥

अम्नस् ऊधस् अवस् इत्येतेषां छन्दसि विषये उभयथा भवति - रुर्वा रेफो वा । अम्नस्-अग्न एव । अम्नरेव । ऊधस्-ऊध एव । ऊधरेव । अवस्-अव एव । अवरेव । यदा रुत्वम् तदा भोभगोअघोअपूर्वस्य योऽशीति यकारः । छन्दसि भाषायां च विभाषा प्रचेतसो राजन्युपसंख्यानं कर्त्तव्यम् । प्रचेता राजन् । प्रचेतो राजन् । अहरादीनां पत्यादिषूपसंख्यानं कर्त्तव्यम् । अहर्पतिः । अहः पतिः । गीर्प्पतिः । गीःपतिः । धूर्प्पतिः । धूःपतिः । विसर्जनीयबाधनार्थमत्र पक्षे रेफस्यैव रेफो विधीयते ॥

३७६२. भुवश्च महाव्यह्रतेः ॥ ७१ ॥

भुवस् इत्येतस्य महाव्याह्रतेश्छन्दसि विषये उभयथा भवति-रुर्वा रेफो वा । भुवरित्यन्तरिक्षम् । भुव इत्यन्तरिक्षम् । महाव्याह्रतेरिति किम्? भुवो विश्वेषु भुवनेषु यज्ञियः (१) । भुवरित्येतदव्ययमन्तरिक्षवाचि महाव्याह्रतिः ॥

३७६३. वसुस्रंसुध्वंस्वनडुहां दः ॥ ७२ ॥

ससजुषो रुरित्यतः स इति वर्त्तते । तेन संभवाद् व्यभिचाराच्च वसुरेव विशेष्यते । न स्रंसुध्वम्सू, व्यभिचाराभावात् । असंभवाञ्च नानडुहशब्दः । वस्वन्तस्य पदस्य सकारान्तस्य स्रंसुध्वंसु अनडुह् इत्येतेषां च दकारादेशो भवति । वसु - विद्वद्भाम् । विद्वद्भिः । पपिवद्भ्याम्। पपिवद्भिः । स्रंसु-उखास्रद्भ्याम् । उखास्रद्भिः । ध्वंसु-पर्णध्वद्भ्याम् । पर्णध्वद्भिः। अनडुह्-अनडुद्भ्याम् । अनडुद्भिः.। स इत्येव । विद्वान् । पपिवान् । नकारस्य न भवति । रुत्वे नाप्राप्ते इदमारभ्यत इति तद् बाध्यते । संयोगान्तलोपस्तु नैवमिति तेन तदेव दत्वं बाध्यते । अनडुहोऽपि ढत्वमनेन बाध्यते । नुमस्तु विधानसामर्थ्यान्न भवति । अनड्वान् । हे अनड्वन्निति.। पदस्युत्येव । विद्वांसौ । विद्वांसः ॥

३७६४. तिप्यनस्तेः ॥ ७३ ॥

तिपि परतः सकारान्तस्य पदस्य अनस्तेर्दकार आदेशो भवति । अचकाद्भावान् । अन्वशाद् भवान् । तिपीति किम्? चकास्तेः क्विप् । चकाः । अनस्तेरिति किम्? आप एवेदं सलिलं सर्वमाः । आ इत्यस्तेर्लङि तिपि बहुलं छन्दसीति ईड् न कृतः ॥

३७६५. सिपि धतो रुर्वा ॥ ७४ ॥

सिपि परतः सकारान्तस्य पदस्य धातो रुरित्ययमादेशो भवति दकारो वा । अचकास्त्वम् । अचकात्त्वम् । अन्वशास्त्वम् । अन्वशात्त्वम् । धातुग्रहणं चोत्तरर्थं रुग्रहणं च॥

३७६६. दश्च ॥ ७५ ॥

दकारान्तस्य धातोः पदस्य सिपि परतो रुर्भवति दकारो वा । अभिनत्त्वम् । अभिनस्त्वम् । अच्छिनत्त्वम् । अच्छिनस्त्वम् ॥

३७६७. र्वोरुपधाया दीर्घ इकः ॥ ७६ ॥

रेफवकारान्तस्य धातोः पदस्य उपधाया इको दीर्घो भवति । गीः । धूः । पूः.। आशीः । वाग्रहणमुत्तर्थम् । उपधाग्रहणं किन्? अबिमर्भवान् । अभ्यासेकारस्य मा भूत् । इक इति किम्? अत्रैव प्रत्युदाहरणे भशब्दाकारस्य मा भूत् । धातोरित्येव.। अग्निः । वायुः । पदस्येत्येव। गिरौ । गिरः ॥

३७६८. हलि च ॥ ७७ ॥

हलि च परतो रेफवकारान्तस्य धातोरुपधाया इको दीर्घो भवति । आस्तीर्णम्.। विस्तीर्णम् । विशीर्णम् । अवगूर्णम् । वकारान्तस्य-दीव्यति । सीव्यति । धातोरित्येव.। दिवमिच्छति दिव्यति । चतुर इच्छति-चतुर्यति । इक इत्येव स्मयते । भव्यम् । अपदान्तार्थोऽयमारम्भः ॥

३७६९. उपधायां च ॥ ७८ ॥

हलीत्यनुवर्त्तते । धातोरुपधाभूतौ यौ रेफवकारौ हल्परौ तयोरुपधाया इको दीर्घो भवति । हुर्छा-हूर्छिता । मुर्छा-मूर्छिता । उर्वी-ऊर्विता । धुर्वी-धूर्विता । हलीत्येव । चिरि, जिरि-चिरिणोति। जिरिणोति । इह कस्मान्न भवति । री गतौ-रिर्यतुः । रिर्युः । वी गत्यादिषु-विव्यतुः ।

विव्युरिति? यणादेशस्य स्थानिवत्त्वाद् असिद्धत्वाच्च बहिरङ्गलक्षणत्वेन हल्परौ रेफवकारौ न भवतः । चतुर्यितेत्यत्रापि बहिरङ्गलक्षणत्वादतो लोपस्य धातोरुपधाभूतो रेफो न भवति । प्रतिदीवनत्यत्र तु हलि चेति दीर्घत्वम् । दीर्घविधौ लोपाजादेशस्य स्थानिवद्भावप्रतिषेधात् । असिद्धं बहिरङ्गमन्तरङ्ग इत्येतत्तु नाश्रयितव्यम् । उणादयोऽव्युत्पन्नानि प्रातिपदिकानीति जिव्रिः किर्योगिर्योरित्येवमादिषु दीर्घो न भवति ॥

३७७०. न भकुर्छुराम् ॥ ७९ ॥

रेफवकारान्तस्य भस्य कुर् छुर् इत्येतयोश्च दीर्घो न भवति । धुरं वहाते धुर्यः.। धुरि साधुर्धुर्यः । दिव्यम् । कुर्-कुर्यात् । छुर्-छुर्यात् । रेफवकाराभ्यां भविशेषणं किम्? प्रतिदीब्ना । प्रतिदीब्ने ॥

३७७१. अदसोऽसेर्दादु दो मः ॥ ८० ॥

अदसोऽसकारान्तस्य वर्णस्य दात्परन्य उवर्णादेशो भवति दकारस्य च मकारः.। अमुम्। अमू । अमून् । अमुना । अमूभ्याम् । भाव्यमानेनाप्युकारेण सवर्णानां ग्रहणमिष्यत इत्येकमात्रिकस्य मात्रिको द्विमात्रिकस्य द्विमात्रिक आदेशो भवति । असेरिति किम्? अद इच्छति, अदस्यति । अदसोऽनोस्र इति वक्तव्यम् । ओकाररेफयोरपि प्रतिषेधो यथा स्यादिति । अदोत्र । अदः । तदर्थं केचित्सूत्रं वर्णयन्ति । अः सेर्यस्य सोऽयमसिः । यत्र सकारस्य अकारः। क्रियत इति । तेन त्यदाद्यत्वविधाने एतद्, अन्यत्र न भवितव्यमेवेति । अद्र्यादेशे कथम् ?

अदसोद्रेः पृथङ् मुत्वं केचिदिच्छन्ति लत्ववत् ।

केचिदन्त्यसदेशस्य नेत्येकेऽसेहि दृश्यते ॥ इति ।

यैरसेरिति सकारस्य प्रतिषेधः क्रियते । अनन्त्यविकारेऽन्त्यसदेशस्येति च परिभाषा नाश्रीयते, तेशामुभयोरपि मुत्वेन भवितव्यम्- अमुमुयङ् । अमुमुयञ्चौ.। अमुमुयञ्च इति । यथा चलीक्लृप्यत इति लत्वम् । ये तु परिभाषामाश्रयन्ति तेषामन्त्यसदेशस्यैव भवितव्यम्- अदमुयङ् । अदमुयञ्चौ । अदभुयञ्च इति । येषां तु त्यदाद्यत्वविषय एव मुत्वेन भवितव्यमिति दर्शनं तेषामत्र न भवितव्यम् - अदद्र्यञ्चौ । अदद्रयञ्च इति । दादिति किम्? अलोन्त्यस्य मा भूत्-अमुया । अमुयोः ॥

३७७२. एत ईद् बहुवचने ॥ ८१ ॥

अदसो दकारादुत्तरस्य एकारस्य ईकारादेशो भवति दकारस्य च मकारः बहुवचने बहूनामर्थानमुक्तौ । अमी । अमीभिः । अभीभ्यः । अमीषाम् । अमीषु । बहुवचन इत्यर्थनिर्देशोऽयं पारिभाषिकस्य हि बहुवचनस्य ग्रहणेऽमी इत्यत्र न स्यात् ॥

३७७३. वाक्यस्य टेः प्लुत उदात्तः ॥ ८२ ॥

अधिकारोऽयम् । वाक्यस्य टेरिति प्लुत इति च उदात्त इति च एतत्त्रयमप्यधिकृतं वेदितव्यमापादपरिसमाप्तेः । यदित ऊर्ध्वमनुक्रमिष्यामो वाक्यस्य टेः प्लुत उदात्त इत्येवं तद्वेदितव्यम् । दक्ष्यति-प्रत्यभिवादेऽशुद्रे । अभिवादये देवदत्तोऽहं भोः, आयुष्मानेधि देवदत्त ३ । पदाधिकारोऽनुवर्त्तत एव । वाक्यग्रहणमनन्त्यस्य पदस्य प्लुतनिवृत्त्यर्थम् । टिग्रहणं व्यञ्जनान्तस्थापि टेरचः प्लुतो यथा स्यात्-अग्निचि ३ दिति ॥

३७७४. प्रत्यभिवादेऽशूद्रे ॥ ८३ ॥

प्रत्यभिवादो नाम यदत्राभिवाद्यमानो गुरुराशिषं प्रयुङ्क्ते तत्राशूद्रविषये यद्वाक्यम् वर्त्तते तस्य टेः प्लुत उदात्तो भवति । अभिवादये देवदत्तोऽहं भोः आयुष्मानेधि देवदत्त ३ । अशुद्र इति किम्? अभिवादये तुषजकोऽहं भोः, आयुष्मानेधि तुषजक । स्त्रियामपि प्रतिषेधो वक्तव्यः । अभिवादये गार्ग्यहं भोः आयुष्मती भव गार्गि । असूयकेपि केचित् प्रतिषेधमिच्छन्ति । अभिवादये स्थाल्यहं भोः आयुष्मानेधि स्थालिन् । यावञ्च तस्या सूयकत्वं न ज्ञायते तावदेव प्रत्यभिवादवाक्यम् । तस्मिंस्त्वसूयकत्वेन विज्ञाते प्रत्यभिवाद एव नास्ति, कुतः प्लुतः । तथा ह्यक्तम्, असूयकस्त्वं जाल्म न त्वं प्रत्यभिवादनमर्हसि । भिद्यस्व वृषल स्थालिन्निति । अभिवादवाक्ये यत् संकीत्तितं नाम गोत्रं वा तद् यत्र प्रत्यभिवादवाक्यान्ते प्रयुज्यते तत्र प्लुत इष्यते । इह न भवति - देवदत्त कुशल्यसि । देवदत्त आयुष्मानेधीति । भोराजन्यविशां वेति वक्तव्यम् । भो अभिवादये देवदत्तोऽहम् । आयुष्मानेधि देवदत्त भोः ३ । आयुष्मानेधि देवदत्त भोः । राजन्य-अभिवादये इन्द्रवर्म्माऽहंभोः । आयुष्मानेधीन्द्रवर्म्म ३ न् । आयुष्मानेधीन्द्रवर्म्मन् । विश्-अभिवादये इन्द्रपालितोऽहं भोः । आयुष्मानेधीन्द्रपालित ३ । आयुय्मानेधीन्द्रपालित ॥

३७७५. दूराद्धूते च ॥ ८४ ॥

दूराद्धूते यद्वाक्यम् वर्त्तते तस्य टेः प्लुतो भवति स चोदात्तः । आहवानं हूतं शब्देन सम्बोधनम् । आगच्छ भो माणवक देवदत्त ३ । आगच्छ भो माणवक यज्ञदत्त ३ । दूरं

यद्यप्यपेक्षाभेदादनवस्थितं तथापि हूतापेक्षं यत्तदाश्रीयते इति । यत्र प्राकृतात् प्रयत्नाद्यत्ववुशेषे आश्रीयमाणे शब्दः श्रूयते तद्दूरम् । हूतग्रहणं च सम्बोधनमात्रोपलक्षणार्थं द्रष्टव्यम् । तेन यत्राप्यहवानं नास्ति प्लुतिर्भवति । सक्तून्पिब देवदत्त ३ । पलायस्व देवदत्त ३ इति । अस्याश्च प्लुतेरेकश्रुत्या समावेश इष्यते । दूरादिति किम्? आगच्छ भो माणवक देवदत्त । दूरादाहवाने वाक्यस्यान्ते यत्र सम्बोधनपदं भवति तत्रायं प्लुत इष्यते । तेनेह न भवति - देवदत्त आगच्छ (१) ॥

३७७६. हैहेप्रयोगे हैहयोः ॥ ८५ ॥

हैहेप्रयोगे यद्वाक्यं वर्त्तते तत्र हैहयोरेव प्लुतो भवति । है ३ देवदत्त । देवदत्त है ३ । हे ३ देवदत्त । देवदत्त हे ३ । पुनर्हैहयोर्ग्रहणमन्त्ययोरति यथा स्यात् ॥

३७७७. गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् ॥ ८६ ॥

प्रत्यभिवादेऽशूद्र इत्येवमादिना यः प्लुतो विहितस्तस्यैवायं स्थानिविशेष उच्यते । ऋकारवर्जितस्य गुरोरनन्त्यस्य, अपिशब्दादन्त्यस्यापि टेरेकेकस्य सम्बोधने वर्त्तमानस्य प्लुतो भवति प्राचामाचार्याणां मतेन । दे ३ वदत्त । देवद ३ त्त । देवदत्त ३ । य ३ ज्ञदत्त । यज्ञद ३ त्त । यज्ञदत्त ३ । गुरोरिति किम्? वकारात् परस्य मा भूत् । अनृत इति किम्? कृष्णमि ३ त्र। कुष्णमित्र ३ । एकैकग्रहणं पर्यायार्थम् । प्राचामिति ग्रहणं विकल्पार्थम् । आयुष्मानेधि देवदत्त । तदनेन यदेतदुच्यते सर्व एव प्लुतः साहसमनिच्छता विभाषा कर्त्तव्य इति तदुपपन्नं भवति ॥

३७७८. ओमभ्यादाने ॥ ८७ ॥

अभ्यादानं प्रारम्भः । तत्र य ओम्शब्दः तस्य प्लुतो भवति । ओ३म् अग्निमी३ले पुरोहितम् । अभ्यादान इति किम्? ओमित्येतदक्षरमुद्गीथमुपासीत ॥

३७७९. ये यज्ञकर्म्मणि ॥ ८८ ॥

ये इत्येतस्य यज्ञकर्म्मणि प्लुतो भवति । ये ३ यजामहे । यज्ञकर्म्मणीति किम्? ये यजामह इति पञ्चक्षरमिति स्वाध्यायकाले मा भूत् । ये यजामह इत्यत्रैवायं प्लुत इष्यते । इह हि न भवति - ये देवासो दिव्येकादशस्थ इति ॥

३७८०. प्रणवष्टेः ॥ ८९ ॥

यज्ञकर्म्मणीति वर्त्तते । यज्ञकर्म्मणि टेः प्रणव आदेशो भवति । क एष प्रेणवो नाम? पादस्य वार्द्धर्चस्य वान्त्यमक्षरमुपसंहृत्य तदाद्यक्षरशेषस्य स्थाने त्रिमात्रमोकारमोङ्कारं वा विदधति तं प्रणवमित्याचक्षते । अपां रेतांसि जिन्वतोऽम् । देवान् । जिगाति सुम्नयोऽम् । टिग्रहणं सर्वादेशार्थम्(१) । ओकारः सर्वादेशो यथा स्यात् । व्यञ्जनान्ते अपत्यस्य मा भूदिति। यज्ञकर्म्मणीत्येव । अपां रेतासि जिन्वति ॥

३७८१. याज्यान्तः ॥ ९० ॥

याज्या नाम ये याज्याकाण्दे पठ्यन्ते मन्त्रास्तेषामन्त्यो यष्टिः स प्लवते यज्ञकर्मणि । स्तौमैर्विधेमाग्नये ३ । जिह्वामग्ने चकृषे हव्यवाहाऽम् । अन्तग्रहणं किम्? याज्या नाम ऋचः काश्चिद्वाक्यसमुदायरूपास्तत्र यादन्ति वाक्यानि तेषां सर्वेषां टेः प्लुतः प्राप्नोति । सर्वान्त्यस्यैवेष्यते, तदर्थमन्तग्रहणम् ॥

३७८२. ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः ॥ ९१ ॥

ब्रूहि प्रेष्य श्रौषट् वौषट् आवह इत्येतेषामादेः प्लुतो भवति यज्ञकर्मणि । अग्नयेऽनुब्रुऽहि। प्रेष्य - अग्नये गोमयान् प्रेऽष्य । श्रौषट्-अस्तु श्रौऽषट् । वौषट्-सोमस्याग्ने व्रीहि वौषट् । आवह-अग्निमाऽवह । आवह देवान् यजमानायेत्येवमादावयं प्लुतो न भवति, सर्वे विधयश्छन्दसि विकल्प्यन्त इति ॥

३७८३. अग्नीत्प्रेषणे परस्य च ॥ ९२ ॥

अग्नीधः प्रेषणमग्नीत्प्रेषणम् । तत्रादेः प्लुतो भवति परस्य च । आऽश्राऽवय । ओऽश्राऽवय । अत्रैवायम् प्लुत इष्यते । तेनेह न भवति - अग्नीदग्नीन्विहर वर्हिस्तृणीहिति । तदर्थं केचिद्वक्ष्यमाणं विभाषेत्यभिसंबन्ध्नन्ति । सा च व्यवस्थितविभाषेति । अपर आह सर्व एव प्लुतः साहसमनिच्छिता विभाषा विज्ञेय इति । इह तु उद्धरऽ, उद्धर; अभिहरऽ, अभिहरेति छन्दसः प्लुतव्यत्ययः । यज्ञकर्मणीत्येव । ओश्रावय ॥

३७८४. विभाषा पृष्टप्रतिवचने हेः ॥ ९३ ॥

पृष्टप्रतिवचने विभाषा हेः प्लुतो भवति । अकार्षीः कटं देवदत्त? अकार्षं हि ३ । अकार्षं हि । अलावीः केदारं देवदत्त? अलाविषं हि ३ । अलाविषं हि । पृष्टप्रतिवचन इति किम्? कटं करिष्यति हि । हेरिति किम्? करोमि ननु ॥

३७८५. निगृह्यानुयोगे च ॥ ९४ ॥

स्वमतात्प्रच्यावनं निग्रहः । अनुयोगस्तस्य मतस्याविष्करणम् । तत्र निगृह्यानुयोगे यद्वाक्यं वर्त्तते तस्य टेः प्लुतो भवति विभाषा । अनित्यः शब्द इति केनचित्प्रतिज्ञातम्, तमुपालिप्सुरुपपात्तेभिर्निगृह्य साभ्यसूयमनुयुङ्क्ते-अनित्यः शब्द इत्यात्थ३ । अद्य श्राद्धमित्यात्थ३, अद्य श्राद्धमित्यात्थ । अद्यामावस्येत्यात्थ३, अद्यामावस्येत्यात्थ । अद्य अमावास्या इत्येवं वादी युक्त्या प्रच्याव्य स्वमतादेवमनुयुज्यते ॥

३७८६. आम्रेडितं भर्त्सने ॥ ९५ ॥

वाक्यादेरामन्त्रितस्येति भर्त्सने द्विर्वचनमुक्तं तस्याम्रेडितं प्लवते । चौर चौर३, वृषल, वृषल३, दस्यो३, दस्यो घातयिष्यामि त्वा बन्धयिष्यामि त्वा भर्त्सने पर्यायेणेति वक्तव्यम् । चौरे ३ चौर । चौर चौरे ३ । तदर्थमाम्रेडितग्रहणं द्विरुक्तोपलक्षणार्थं वर्णयन्ति ॥

३७८७. अङ्गयुक्तं तिङाकाङ्क्षम् ॥ ९६ ॥

अङ्ग इत्यनेन युत्तं तिङन्तमाकाङक्षं भर्त्सने प्लवते । अङ्ग कूज ३ । अङ्ग व्याहर३ इदानीं ज्ञास्यसि जाल्म । तिङिति किम्? अङ्ग देवदत्त मिथ्या वदसि । आकाङ्क्षमिति किम्? अङ्ग पच । नैतदपरमाकाङक्षति । भर्त्सन इत्येव । अङ्गधीष्व, ओदनं ते दास्यामि ।

३७८८. विचार्यमाणानाम् ॥ ९७ ॥

मानेन वस्तुपरीक्षणं विचारः । तस्य विषये विचार्यमाणानां वाक्यानां टेः प्लुतो भवति होतव्यं दीक्षितस्य गृहा ३ इ । होतव्यं न होतव्यमिति विचार्यते । तिष्ठेद्यूपा ३ इ । अनुप्रहरेद्यूपा ३ इ । यूपे तिष्ठेद्यूपे अनुप्रहरेदिति विचार्यते ॥

३७८९. पूर्वं तु भाषायाम् ॥ ९८ ॥

भाषाशायां विषये विचार्यमाणानां पूर्वमेव प्लवते । अहिर्नु ३ । लोष्टो नु ३ । कपोते नु ३(१) । प्रयोगापेक्षं पूर्वत्वम् । इह भाषाग्रहणात् पूर्वयोगश्छन्दसि विज्ञायते ॥

३७९०. प्रतिश्रवणे च ॥ ९९ ॥

प्रतिश्रवणमभ्युगमः प्रतिज्ञानं श्रवणाभिमुख्यं च, तत्राविशेषात् सर्वस्य ग्रहणम् प्रतिश्रवणे यद्वाक्यं वर्त्तते तस्य टेः प्लुतो भवति । गां देहि भोः, अहं ते ददामि ३ । नित्यः शब्दो भवितुमर्हति, देवदत्त भोः किमात्थ ३ ॥

३७९१. अनुदात्तं प्रश्नान्ताभिपूजितयोः ॥ १०० ॥

अनुदात्तः प्लुतो भवति प्रश्नान्ते अभिपूजिते (२) च । अगमꣳः पूर्वाꣳन् ग्रामाꣳन् । अग्निभूता ३ इ । पटा ३ उ । अग्निभूते पटो इत्येतयोः प्रश्नान्ते वर्त्तमानयोरनुदात्तः प्लुतो भवति । अगम इत्येवमादीनां तु अनन्त्यस्यापि प्रश्नाख्यानयोरिति प्लुतो भवति । अभिपूजिते-शोभनः खल्वसि माणवक ३ ॥

३७९२. चिदिति चोपमार्थे प्रयुज्यमाने ॥ १०१ ॥

अनुदात्तमिति वर्त्तते । चिदितेतस्मिन्निपाते उपमार्थे प्रयुज्यमाने वाक्यस्य टेरनुदात्तः प्लुतो भवति । प्लुतोऽप्यत्र विधीयते, न गुणमात्रम् । अग्निचिद्भायाꣳत् । राजचिद्भायात् ३ । अग्निरिव भायात् । राजेव भायादित्यर्थः । उपमार्थ इति किम्? कथंचिदाहुः । प्रयुज्यमान इति किम्? अग्निर्माणवको भायात् ॥

३७९३. उपरिस्विदासीदिति च ॥ १०२ ॥

अनुदात्तमिति वर्त्तते । उपरिस्विदासीदित्येतस्य टेरनुदात्तः प्लुतो भवति । अधः स्विदासीꣳत् । उपरिस्विदासीꣳत् । अधः स्विदासीदित्यत्र विचार्यमाणानामित्युदात्तः प्लुतः । उपरिस्विदासीदित्यत्र तु अनेनानुदात्तः ॥

३७९४. स्वरितमाम्रेडितेऽसूयासंमतिकोपकुत्सनेषु ॥ १०३ ॥

स्वरितः प्लुतो भवति आम्रेडिते परतः असूयायां संमतौ कोपे कुत्सने च गम्यमाने । वाक्यादेरामन्त्रितस्यासूयासंभतिकोपकुत्सनभर्त्सनेष्विति द्विर्वचनमुक्तं, तत्रायं प्लुतविधिः । असूयायां तावत् - माणवक ३ माणवक अभिरूपक ३ अभिरूपक रिक्तं त आभिरूप्यम् । संमतौ-माणवक ३ माणवक अभिरूपक ३ अभिरूपक शोभनः खल्वसि । कोपेमाणवक ३ माणवक अविनीतक ३ अविनीतक इदानीं ज्ञास्यसि जाल्म । कुत्सने शाक्तीक ३ शाक्तीक याष्टीक ३ याष्टीक रिक्ता ते शक्तिः । असूयादिषु वावचनं कर्त्तव्यम् । माणवक माणवकेत्येवमाद्यपि यथा स्यात् ॥

३७९५. क्षियाशीःप्रैषेषु तिङाकाङ्क्षम् ॥ १०४ ॥

स्वरित इति वर्त्तते । (१) क्षिया आचारभेदः । आशीः प्रार्थनाविशेषः । शब्देन व्यापारणं प्रैषः । एतेषु गम्यमानेषु तिङन्तमाकङ्क्षं यत्तस्य स्वरितः प्लुतो भवति । आकाङ्क्षतीत्याकाङ्क्षं तिङन्तमुत्तरपदमाकाङ्क्षतीत्यर्थः । क्षियायां तावत्-स्वयं रथेन याति ३ उपाध्यायं पदातिं गमयतीति । स्वयम् ओदनं ह भुङ्क्ते ३ उपाध्यायं सक्तून् पाययति । पूर्वमत्र तिङन्तमुत्तरमाकाङ्क्षतीति साकाङ्क्षं भवति । आशिषि - सुतांश्च लप्सीष्ट ३ धनं च तात । छन्दोऽध्येष्ट ३ व्याकरणं च भद्र । प्रैषे-कटं कुरु ३ ग्रामं च गच्छ । यवान् लुनीहि ३ सक्तूंश्च पिब । आकाङ्क्षमिति किम्? दीर्घ ते आयुरस्तु । अग्नीन् विहर ॥

३७९६. अनन्त्यस्यापि प्रश्नाख्यानयोः ॥ १०५ ॥

पदस्येति वर्त्तते स्वरितमिति च । अनन्त्यस्यापि पदस्य टेः प्लुतो भवति प्रश्ने आख्याने च । अगम३ः पूर्वा ३ न् ग्रामा ३ न् । अग्निभूत ३ इ । पट ३ उ । सर्वेषामेव पदानामेष स्वरितः प्लुतः । अन्त्यस्य अनुदात्तं प्रश्नान्ताभिपूजितयोरिति अनुदात्तोऽपि पक्षे भवति । आख्याने-अगम ३ः पूर्वा३न् ग्रामा ३न् भो ३ ॥

३७९७. प्लुतवैच इदुतौ ॥ १०६ ॥

दूराद्धूतादिषु प्लुतो विहितः । तत्र ऐचः प्लुतप्रसङ्गे तदवयवभूताविदुतौ प्लुतौ । ऐ३तिकायन । औ३पगव । अत्र यदेवर्णोवर्णयोरवर्णस्य च समविभागस्तद इदुतौ द्विमात्रावनेन प्लुतौ क्रियेते । प्लुताविति हि क्रियानिमित्तोऽयं व्यपदेशः । इदुतौ प्लवेतेवृद्धिं गच्छत इत्यर्थः। तावती च सा प्लुतिर्भवति यया तावेचौ त्रिमात्रौ संपद्येते । रुता त्वर्द्धमात्रावर्णस्याध्यर्द्धमात्रा इवर्नोवर्णयोस्तदा तावर्द्धतृतीयमात्रौ क्रियेते इति । भाष्ये तूक्तम्-इष्यते चतुर्मात्रः प्लुत इति । तत्कथम्? समप्रविभागपक्षे क्रियेते इति । भाष्ये तूक्तम्-इष्यते चतुर्मात्रः प्लुत इति । तत्कथम्? समप्रविभागपक्षे इदुरतोरनेन त्रिमात्रः प्लुतो विधीयते ॥

३७९८. एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ ॥ १०७ ॥

एचोऽप्रगृह्यस्यादूराद्धूते प्लुनविषयस्यार्द्धस्याकार आदेशो भवति च स प्लुतः उत्तर स्येकारोकारावादेशौ भवतः । विषयपरिगणनं कर्त्तव्यम् - प्रश्नान्ताभिपूजितविचार्यमाणप्रत्यभिवादयाज्यान्तेष्विति वक्तव्यम् । प्रश्नान्ते-अगम३ः पूर्वा३न् ग्रामा३न् अग्निभूत ३इ । पटा३उ । अभिपूजिते-भद्रं करोषि माणवक३ अग्निभूता ३इ । पटा३उ। विचार्यमाणे - होतव्यं दीक्षितस्य गृहा३इ । प्रत्यभिवादे - आयुष्मानेधि अग्निभूता३इ। पटा३उ

याज्यान्ते-उक्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे । स्तोमैर्विधेमग्नयाऽइ । सोऽयनाकार प्लुतो यथाविषयमुदात्तोऽनुदात्तः स्वरितो वेदितव्यः । इदुतौ पुनरुदात्तावेव भवतः परिगणनं किम्? विष्णुभूते विष्णुभूतेऽ घातयिष्यामि त्वा । आगच्छ भो माणवक विष्णु भूते । परिगणने च सत्यदूराद्धूत इति न वक्तव्यम् । पदान्तग्रहणं तु कर्त्तव्यम् । इह मा भूत्-भद्रं करोषि गौरिति। अप्रगृह्यस्येति किम्? शोभने खलुस्तः खट्वेऽ । आमन्त्रितं छन्दसि प्लुतविकारोऽयं वक्तव्यः । अग्नाऽइ पत्नी वःऽ ॥

३७९९. तयोर्य्वायचि संहितायाम् ॥ १०८ ॥

तयोरिदुतोर्यकारवकारादेशौ भवतोऽचि संहितायां विषये । संहितायामित्येतच्चाधिकृतमित उत्तरमध्यायपरिसमाप्तेर्यद्वक्ष्यामः संहितायामित्येवं तद्वेदितव्यम् । अग्नाऽ याशा। पटाऽवाशा । अग्नाऽयिन्द्रम् । पटाऽवुदकम् । अचीति किम्? अग्नाऽइ.। पटाऽउ । संहितायामिति किम्? अग्नाऽइ इन्द्रम् । पटाऽउ उदकम् । इदुत्तोरसिद्धत्वादिको यणचीति न प्राप्नोतीत्ययमारम्भः । अथापि कथं चित्तयोः सिद्धत्वं स्यादेवमपि सवर्णदीर्घत्वनिवृत्त्यर्थं शाकलनिवृत्यर्थं च वक्तव्यमेतत् । अथापि तन्निवृत्त्यर्थं यत्नान्तरमस्ति तथापि यण् स्वरनिवृत्त्यर्थमिदमरभ्यते । यणादेशस्यासिद्धत्वाद् उदात्तस्वरियोर्यणः स्वरितोऽनुदात्तस्येत्येष स्वरो न भवति ॥

किं तु यणा भवतीह न सिद्धं वाविदुतोर्यदयं विदधाति ।
तौ च मम स्वरसन्धिषु सिद्धौ शाकलदीर्घविधी तु निवर्त्यौ ॥
इक्तु यदा भवति प्लुतपूर्वस्तस्य यणं विदधात्यपवादम् ।
तेन तयोश्च न शाकलदीर्घौ यण्स्वरबाधनमेव तु हेतुः ॥

इति श्रीवामनविरचितायां काशिकायां वृत्तौ
अष्टमाध्ययस्य द्वितीयः पादः ॥

अथ अष्टमाध्यायस्य

तृतीयः पादः ॥

३८००. मतुवसो रु संबुद्धौ छन्दसि ॥ १ ॥

संहितायामिति वर्त्तते । मत्वन्तस्य वस्वन्तस्य च पदस्य रुरित्यमादेशो भवति सम्बुद्धौ परतः छन्दसि विषये । मत्वन्तस्य तावत्-इद्र मरुत्व इह पाहि सोमम् । हरिवो मेदिनं त्वा । मरुतोऽस्य सन्ति, हरयोऽस्य सन्ति इति मतुप् । सुप्तकारयोर्हल्ङ्यदिलोपे संयोगान्तस्य लोपे च कृते नकारस्य रुर्भवति । वस्वन्तस्य खल्वपि-मीढ्वस्तोकाय तनयाय इन्द्र मृळ । साह्वः । क्वसोर्निपातनं दाश्वानिति । मतुवसोरिति किम्? ब्रह्मन्स्तोष्यामः । संबुद्धाविति किम्? य एवं विद्वानग्निमाधत्ते । छन्दसीति किम्? हे गोमन् । हे पपिवन् । वन उपसंख्यानं कर्त्तव्यम् । यस्त्वायन्तं वसुना प्रातरित्वः । इणः प्रातःपूर्वस्य छन्दसि क्वनिप् । विभाषा भवद्भगवदघवतामोच्चावस्य.। छन्दसि भाषायां च भवद् भगवद् अघवद् इत्येतेषां विभाषा रुर्वक्तव्योऽवशब्दस्य च ओकारादेशः । सामान्येन छन्दसि भाषायां चेदं वचनम् । भवत्-हे भोः। हे भवन् । भगवद्-हे भगोः । हे भगवन् । अघवत्-हे अघोः । हे अघवन् । निपातनविज्ञानाद्वा सिद्धम् । अथवा भो इत्येवमादयो निपाता द्रष्टव्याः । असंबुद्धावपि द्विवचनबहुवचनयोरपि दृश्यन्ते-भो देवदत्तयज्ञदत्तौ । भो देवदत्तयज्ञदत्तविष्णुमित्राः । तथा स्त्रियामपि च दृश्यन्ते-भो ब्राह्मणि इत्यादि । संहिताधिकार उत्तरत्रोपयुज्यते यत्र भिन्नपदस्थौ निमित्तनिमित्तिनौ-नश्छव्यप्रशानिति (१) ॥

३८०१. अत्रानुनासिकः पूर्वस्य तु वा ॥ २ ॥

अधिकारोऽयम् । इत उत्तरं यस्य स्थाने रुर्विधीयते ततः पूर्वस्य तु वर्णस्य वाऽनुनासिको भवतीत्येतदधिकृतं वेदितव्यम्, यदित ऊद्ध्वमनुक्रमिष्यामस्तत्र । वक्ष्यति समः सुटि । सँस्स्कर्त्ता । सँस्स्कर्त्तम् । सँस्स्कर्त्तव्यम् । अत्रग्रहणं रुणा सह संनियोगप्रतिपत्त्यर्थम् । अधिकारपरिमाणापरिग्रहे हि सति ढो ढे लोप इत्यत्रापि पूर्वस्याऽनुनासिक आशङ्क्येत ॥

३८०२. आतोऽटि नित्यम् ॥ ३ ॥

अटि परतो रोः पूर्वस्याकारस्य स्थाने नित्यमनुनासिकादेशो भवति ।

नपाद इति रुत्वं वक्ष्यति । ततः पूर्वस्यातोऽनुनासिकविकल्पे प्राप्ते नित्यार्थं वचनम् । महाँ असि । महाँ इन्द्रो य ओकसा । देवाँ अच्छादीव्यत् । केचिदनुस्वारमधीयते । स

च्छान्दसो व्यत्ययो द्रष्टव्यः । आत इति किम्? ये वा वनस्पर्तीरनु । अटीति किम्? भवांश्चरति। भवांश्लाघयति (१) नित्यग्रहणं विस्पष्टार्थम् (२) ॥

३८०३. अनुनासिकात्परोऽनुस्वारः ॥ ४ ॥

अन्यशब्दोऽत्राध्याहर्त्तव्यः । तदपेक्षया चेयमनुनासिकादिति पञ्चमी । अनुनासिकादन्यो यो वर्णः रोः पूर्वः यस्यानुनासिको न विहितस्ततः परोऽनुस्वार आगमो भवति । वक्ष्यति-समः सुटि-संस्स्कर्त्ता । संस्स्कर्त्तव्यम् । पुमः खय्यम्परे - पुस्कांमा । नश्छव्यप्रशान्-भवांश्चरति । केचित्तु परशब्दमेवान्यार्थं वर्णयन्ति । अनुनासिकात् परोऽनुनासिकादन्योनुऽस्वारो भवति । यस्मिन् पक्षेऽनुनासिको नास्ति तत्रनुस्वारागमो भवति । स तु कस्यागमो भवति? रोः पूर्वस्यैवेति वर्त्तते, व्याख्यानादादेशो न भवति ॥

३८०४. समः सुटि ॥ ५ ॥

रुर्वर्त्तते । सम इत्येतस्य रुर्भवति सुटि परतः संहितायां विषये । संस्कार्त्ता । संस्कर्त्तुम् । संस्कर्त्तव्यम् । संस्स्कर्त्ता । संस्स्कर्त्तुम् । सस्स्कर्त्तव्यम् । अत्र रोर्विसर्जनीये कृते वा शरीति पक्षे विसर्जनीय एव प्राप्नोति । व्यवस्थितविभाषा द्रष्टव्या । तेनात्र नित्यं सकार एव भवति । अस्मिन्नेव सूत्रे सकारादेशो वा निर्द्दिश्यते - समः सुटीति द्विसकारको निद्र्देशः । सम इति किम्? उपस्कर्त्ता । सुटीति किम्? संकृतिः । कश्चिदाह-संपुंकानां सो वक्तव्यः । रुविधौ ह्यनिष्टप्रसङ्गः.। संस्स्कर्त्ता । पुंस्कामा । कांस्कानिति ॥

३८०५. पुमः खय्यम्परे ॥ ६ ॥

पुमित्येतस्य रुर्भवति अम्परे खयि परतः । पुँस्कामा । पुंस्कामा । पुँस्पुत्रः.। पुंस्पुत्रः । पुँस्फलम् । पुंस्फलम् । पुँश्चली । पुंश्चली । पुंस्कामेत्यत्र विसर्जनीयस्य कुप्वो क पौ चेति प्राप्नोति । तस्मादत्र सकार एवादेशो वक्तव्यः । द्विसकारकनिद्र्देशपक्षे तु पूर्वस्मादेव सूत्रात् स इत्यनुवर्त्तते । रुत्वं त्वनुवर्तमानमपि नात्राभिसंबध्यते । संबन्धानुवृत्तिस्तस्येति । खयीति किम्? पुंदासः । पुंगवः । पुंभावः । अम्पर इति किम्? पुंक्षीरम् । पुंक्षीरम् । पुंक्षुरः । परग्रहणं किम्? पुमाख्यः । पुमाचारः ॥

३८०६. नश्छव्यप्रशान् ॥ ७ ॥

अम्पर इति वर्त्तते । नकारान्तस्य पदस्य प्रशान्वर्जितस्य रुर्भवत्यम्परे छवि परतः । भवांश्छादयति २ । भवांश्चिनोति २ । भवांष्टीकते २ । भवास्तरति २ । छवीति किम्? भवान् करोति । अप्रशानिति किम्? प्रशान्छादयति । प्रशान्चिनोति । अम्पर इत्येव-भवान् त्सरुकः॥

३८०७. उभयथर्क्षु ॥ ८ ॥

पूर्वेण नित्ये प्राप्ते विकल्पः क्रियते । नकारान्तस्य पदस्य छवि परतः अम्परे उभयथा ऋक्षु भवति - रुर्वा नकारो वा । तस्मिंस्त्वा दधाति । तस्मिन्त्वा दधाति । ऋक्ष्विति किम्? तांस्त्वं खाद सुखादितान् ॥

३८०८. दीर्घादटि समानपादे ॥ ९ ॥

न इत्यनुवर्त्तते । दीर्घादुत्तरस्य पदान्तस्य नकारस्य रुर्भवत्यटि परतस्तौ चेन्निमित्तनिमित्तिनौ समानपादे भवतः । ऋक्ष्विति प्रकृतत्वाद्ऋक्पाद इह गृह्यते । परिधीं रति। देवाँ अच्छादीव्यत् । महाँ इन्द्रो य ओजसा । दीर्घादिति किम्? अहन्नहिम् । अटीति किम्? इभ्यान्क्षत्रियान् । समानपाद इति किम्? यातुधानानुपस्पृशः.। उमयथेत्येव-आदित्यान् हवामहे।

३८०९. नॄन्पे ॥ १० ॥

नॄनित्येतस्य नकारस्य रुर्भवति पशब्दे परतः । अकार उच्चारणार्थः । नॄँपाहि.। नृःपाहि। नॄँप्रीणीहि । नृंप्रीणिहि । प इति किम्? नृन्भोजयति । उभयथेत्यपि केचिदनुवर्त्तयन्ति । नृन्पाहीत्यपि यथा स्यात् ॥

३८१०. स्वतवान्पायौ ॥ ११ ॥

स्वतवानित्येतस्य रुर्भवति पायुशब्दे परतः । स्वतर्वोः पायुरग्ने ॥

३८११. कानाम्रेडिते ॥ १२ ॥

कानित्येतस्य नकारस्य रुर्भवति आम्रेडिते परतः । कांस्कानामन्त्रयते । कांस्कान्भोजयति । अस्य कस्कादिषु पाठो द्रष्टव्यः । तेन कुप्वोः कः पौ चेति न भवति । समः सुटीत्यतो वा सकारोऽनुवर्त्तते, स एवात्र विधीयते । पूर्वेषु योगेषु संबन्धावृत्त्या गतस्य रोरत्रानभिसंबन्धः । आम्रेडित इति किम्? कान् कान् पश्यति । एकोऽत्र कुत्सायाम् ॥

३८१२. ढो ढे लोपः ॥ १३ ॥

ढकारस्य ढकारे लोपो भवति । सत्यपि पदाधिकारे तस्यासंभवादपदान्तस्य ढकारस्यायं लोपो विज्ञायते । लीढम् । उपगूढम् । ष्टुत्वस्यात्र सिद्धत्वमाश्रयाद् द्रष्टव्यम् । श्वलिड्ढौकत इत्यत्र तु जश्त्वे कृते कार्यं नास्तीति लोपाभावः । न च ढलोपो जश्त्वापवादो विज्ञातुं शक्यते? तस्य हि लीढादिर्विषयः संभवति । तत्र हि श्रुतिकृतमानन्तर्यमस्ति, शास्त्रकृतम् तु यदा नानन्तर्यं ष्टुत्वस्यासिद्धत्वेन प्राप्तं तत्तु सूत्रकरणसामर्थ्याद् बाध्यते । श्वलिड्ढौकत इत्यत्र तु न श्रुतिकृतमानन्तर्यं न शास्त्रकृतमिति अविषयोऽयं ढलोपस्य ॥

३८१३. रो रि ॥ १४ ॥

रेफस्य रेफे परतो लोपो भवति । नीरक्तम् । दूरक्तम् । अग्नी रथः । इन्दू रथः । पुना रक्तं वासः । प्राता राजक्रयः । पदस्येत्यत्र विशेषणे षष्ठी । तेनापदान्तस्यापि रेफस्य लोपो भवति । जर्गृधेरजर्घाः । पास्पर्द्धेरपास्पा इति ॥

३८१४. खरवसानयोर्विसर्जनीयः ॥ १५ ॥

र इति वर्त्तते । रेफान्तस्य पदस्य खरि परतोऽवसाने च विसर्जनीयादेशो भवति । वृक्षश्छादयति । प्लक्षश्छादयति । वृक्षस्तरति । प्लक्षस्तरति (१) । अवसाने-वृक्षः । प्लक्षः । खरवसानयोरिति किम्? अग्निर्नयति । वायुर्नयति । इह नृकुट्यां भवः नार्कुटः, नृपतेरपत्यं नार्पत्य इति वृद्धेबहिरङ्गलक्षणत्वात्तदाश्रयस्य रेफस्यासिद्धं बहिरङ्गमित्यसिद्धत्वाद्विसर्जनीयो न भवति ॥

३८१५. रोः सुपि ॥ १६ ॥

रु इत्येतस्य रेफस्य सुपि परतो विसर्जनीयादेशो भवति । पयःसु । सर्पिःषु, यशःसु । सुपीति सप्तमीबहुवचनं गृह्यते । सिद्धे सत्यारम्भो नियमार्थः - रोरेव सुपि विसर्जनीयादेशो नान्यस्य । गीर्षु । धूर्षु ॥

३८१६. भोभगोअघोअपूर्वस्य योऽशि ॥ १७ ॥

भो२ भगो२ अघो२ इत्येवंपूर्वस्य अवर्णपूर्वस्य च रो रेफस्य यकारादेशो भवति अशि परतः । भो अत्र । भगो अत्र । अघो अत्र । भो ददाति । भगो ददाति । अघो ददाति । अवर्णपूर्वस्य - क आस्ते । कय् आस्ते । ब्राह्मणा ददति । पुरुषा ददति.। भोभगोअघोअपूर्वस्येति किम्? अग्निरत्र । वायुरत्र । अश्ग्रहणं किम्? वृक्षः । प्लक्षः ।

नैतदस्ति, संहितायामित्यनुवर्त्तते? तर्हि अश्ग्रहणमुत्तरार्थम् । हलि सर्वेषामित्ययं लोपोऽशि हलि यथा स्यात् । इह मा भूत्-वृक्षं वृश्चतीति वृक्षवृट्, तमाचष्टे यः स वृक्षवयति । वृक्षवयतेरप्रत्ययः, वृक्षव् करोति । अथ तत्रैव अश्ग्रहणं कस्मान्न कृतम्? उत्तरार्थम् । मोऽनुस्वार इति हल्मात्रे यथा स्यात् । व्योर्लघुप्रयत्नतरः शाकटाथनस्थ, लोपः शाकल्यस्येत्येतच्च वृक्षव् करोतीत्यत्र मा भूदित्यश्ग्रहणम् । रोरित्येव-प्रातरत्र । पुनरत्र ॥

३८१७. व्योर्लघुप्रयत्नतरः शाकटायनस्य ॥ १८ ॥

वकारयकारयोर्भोभगोअघोअवर्णपूर्वयोः पदान्तयोर्लघुप्रयत्नतर आदेशो भवति अशि परतः शाकटायनस्याचार्यस्य मतेन । भोयत्र, भो अत्र, भगोयत्र । भगो अत्र । अघोयत्र । अघो अत्र । क आस्ते । कयास्ते । अस्मायुद्धर । अस्मा उद्धर । असावादित्यः । असा आदित्यः । द्वावत्र। द्वा अत्र । द्वावानय । द्वा आनय । लघुप्रयत्नतरत्वमुच्चारणे स्थानकरणशैथिल्यम् । स्थानं ताल्वादि । करणम् जिह्वामूलादि । तयोरुच्चारणे शेथिल्यं मन्दप्रयत्नता ॥

३८१८. लोपः शाकल्यस्य ॥ १९ ॥

वकारयकारयोः पदान्तयोरवर्णपूर्वर्लोपो भवति शाकल्यस्याचार्यस्य मतेन अशि परतः । क आस्ते । कयास्ते । काक आस्ते । काकयास्ते । अस्मा उद्धर । अस्मायुद्धर । द्वावत्र । द्वा अत्र । असावादित्यः । असा आदित्यः । शाकल्यग्रहणं विभाषार्थम् । तेन यदापि लघुप्रयत्नतरो न भवत्यादेशस्तदापि व्योः पक्षे श्रवणं भवति ॥

३८१९. ओतो गार्ग्यस्य ॥ २० ॥

ओकारादुत्तरस्य यकारस्य लोपो भवति गार्ग्यस्याचार्य्यस्य मतेन अशि परतः । भो अत्र। भगो अत्र । भो इदम् । भगो इदम् । नित्यार्थोऽयमारम्भः । गार्ग्यग्रहणं पूजार्थम् । योऽयमलघुप्रयत्नस्य विकल्पेन लोपः क्रियते सोऽनेन निवर्त्त्यते । लघुप्रयत्नतरस्तु भवत्येव यकारः । भो अत्र । भोयत्र । भागो अत्र । अगोयत्र । अघो अत्र । अघोयत्र । केचित्तु सर्वमेव यकारमत्र नेच्छन्ति ॥

३८२०. उञि च पदे ॥ २१ ॥

अवर्णपूर्वयोः व्योः पदान्तयोर्लोपो भवति उञि च पदे परतः । स उ एकविंशवर्तनिः । स उ एकाग्निः । पदे इति इति किम्? तन्त्र उतं, तन्त्रयुतम् । वेञः संप्रसारणे कृते उञिति

भूतपूर्वेण ञकारेण शक्यते प्रतिपत्तुमिति । अथ उञित्येवंरूपो निपातः प्रतिपदोक्तोऽस्ति, तदा लाक्षणिकत्वाद्वेञादेशस्य ग्रहणमिह नास्ति, उत्तरार्थं पदग्रहणं क्रियते ॥

३८२१. हलि सर्वेषाम् ॥ २२ ॥

हलि परतो भोभगोअघोअपूर्वस्य यकारस्य पदान्तस्य लोपो भवति सर्वेषामाचार्याणां मतेन । भो हसति । भगो हसति । अघो हसति । भो याति । भगो याति । अघो याति । वृक्षा हसन्ति । सर्वेषां ग्रहणं शाकटायनस्यापि लोपो यथा स्यात्, लघुप्रयत्नतरो मा भूदिति ॥

३८२२. मोऽनुस्वारः ॥ २३ ॥

मकारस्य पदान्तस्यानुस्वार आदेशो भवति हलि परतः । कुण्डं हसति । वनं हसति । वनं याति । कुण्डं याति । हलीत्येव- त्वमत्र । किमत्र । पदान्तस्येत्येव-गम्यते । रम्यते ॥

३८२३. नश्चापदान्तस्य झलि ॥ २४ ॥

नकारस्य मकारस्य चापदान्तस्यानुस्वारादेशो भवति झलि परतः । पयांसि । यशांसि । सर्पिंषि । धनूंषि । मकारस्य-आक्रंस्यते । आचिक्रंस्यते । अधिजिगांसते । अपदान्तस्येति किम्? राजन् भुङ्क्ष्व । झलीति किम्? रम्यते । गम्यते ॥

३८२४. मो राजि समः क्वौ ॥ २५ ॥

समो मकारस्य मकार आदेशो भवति राजतौ क्विप्रत्ययान्ते परतः । सम्राट् । साम्राज्यम् । मकारस्य मकारवचनमनुस्वारनिवृत्त्यर्थम् । राजीति किम्? संयत् । सम इति किम्? किं राट् । क्वाविति किम्? संराजिता । संराजितम् । संराजितव्यम् ॥

३८२५. हे मपरे वा ॥ २६ ॥

हकारे मकारपरे परतो मकारस्य वा मकार आदेशो भवति । किं ह्मलयति । किम् ह्मलयति । कथं ह्मलयति । कथम् ह्मलयति । यवलपरे यवला वा । यवलपरे हकारे मकारस्य यवला यथासंख्यं वा भवन्तीति वक्तव्यम् । कियँ्ह्यः । किं ह्यः । किवँ् ह्वलयति। किं ह्वलयति । किल्ँह्लादयति । किंह्लादयति ॥

३८२६. नपरे नः ॥ २७ ॥

नकारपरे हे परतः मकारस्य वा नकारादेशो भवति । किन् ह्नु ते । किं ह्नते । कथन् ह्नुते। कथं ह्नुते ।

३८२७. ङ्णोः कुक्टुक् शरि ॥ २८ ॥

ङकारणकारयोः पदान्तयोः कुक् टुग् इत्येतावागमौ वा भवतः शरि परतः । प्राङ्क्शेते । प्राङ्शेते । प्राङ्क्षष्ठः । प्राङ् षष्ठः । प्राङ्क्साये । प्राङ् साये । णकारस्य - वण्शेते । वण् शेते। पूर्वान्तकरणं प्राङ्क् छेते इत्यत्र छत्वार्थम् । शश्छोटीति हि पदान्ता-ज्झय इति तद्विज्ञायते । इह मा भूत्-पुरा क्रूरस्य विसृपो विरप्शिन् । प्राङ्क् साय इत्यत्रापि सात्पदाद्योरिति षत्वप्रतिषेधार्थञ्च । वण्ट् साय इत्यत्र च न पदान्ताट्टोरनामिति ष्टुत्वप्रतिपेधार्थम् ॥

३८२८. डः सि धुट् ॥ २९ ॥

डकारान्तात्पदादुत्तरस्य सकारादेः पदस्य वा धुडागमो भवति । श्वलिट्त्साये । श्वलिट् साये । मधुलिटत्साये । मधुलिट् साये । परादिकरणं न पदान्ताठ्टोरनामिइ ष्टुत्वप्रतिषेधार्थम्॥

३८२९. नश्च ॥ ३० ॥

नकारान्तात्पदादुत्तरस्य सकारस्य वा धुडागमो भवति । भवान्त्साये । महान्साये । भवान्साये । महान्साये । धुटश्चर्त्वस्य चासिद्धत्वान्नश्छव्यप्रशानिति रुत्वं न भवति ॥

३८३०. शि तुक् ॥ ३१ ॥

नकारस्य पदान्तस्य शकारे परतो वा तुगागमो भवति । भवाञ्च्छेते । पूर्वान्तकरणं छत्वार्थम् । यद्येवं कुर्वञ्च्छेते इत्यत्र नकारस्यापदान्तत्वाण्णत्वं प्राप्नोति? तत्र समाधिमाहुः - स्तोः श्रुनाश्चुरित्यत्र योगविभागः क्रियते णत्वप्रतिषेधार्थं स्तोः श्चुना णकरो न भवतीति । ततः श्चुरिति ॥

३८३१. ङमो ह्रस्वादचि ङमुण्नित्यम् ॥ ३२ ॥

ह्रस्वात्परो यो ङम् तदन्तात्पदादुत्तरस्याचो ङमुडागमो भवति नित्यम् । ङणनेभ्यो यथासंख्यं ङणना भवन्ति । ङकारान्ताद् ङट्-प्रत्यड्ङास्ते । णकारान्ताण्णुट्-वण्णास्ते ।

वण्णवोचत् । नकारान्तान्नुट्-कुर्वन्नास्ते । कुर्वन्नवोचत् । कृषन्नास्ते । कृषन्नवोचत् । ङम इति किम्? त्वमास्से । ह्रस्वादिति किम्? प्राङास्ते । मवानास्ते । अचीति किम्? प्रत्यङ् करोति । इह परमदण्डिनौ परमदण्डिनेति उत्तरपदत्वे चापदादिविधाविति प्रत्ययलक्षणप्रतिषेधादुत्तरपदस्य पदत्वं नास्तीति ङमुण्न भवति । अथवा, उञि च पद इत्यतः सप्तम्यन्तं पद इत्यनुवर्त्तते । तेन अजादौ पदे ङमुड् भवति ॥

३८३२. मय उञो वो वा ॥ ३३ ॥

मय उत्तरस्य उञो वा वकारादेशो भवति अचि परतः । शमु अस्तु वेदिः । शम्वस्तु वेदिः । तदु अस्य परेतः । तद्वस्य परेतः । किमु आवपनम् । किम्वावपनम् । प्रगृह्यत्वादुञः प्रकृतिभावे प्राप्ते वकारो विधीयते । तस्यासिद्धत्वाद्धलीति मोऽनुस्वारो न भवति ॥

३८३३. विसर्जनीयस्य सः ॥ ३४ ॥

खरीत्यनुवर्त्तते । विसर्जनीयस्य सकार आदेशो भवति खरि परतः । वृक्षश्छादयति । प्लक्षश्छादयति । वृक्षष्ठकारः । प्लक्षष्ठकारः । वृक्षस्थकारः । प्लक्षस्थकारः । वृक्षश्चिनोति । प्लक्षश्चिनोति । वृक्षष्टीकते । प्लक्षष्टीकते । व्रुक्षस्तरति । प्लक्षस्तरति ॥

३८३४. शर्प्परे विसर्जनीयः ॥ ३५ ॥

शर्परे खरि परतो विसर्जनीयस्य विसर्जनीयादेशो भवति । शशः क्षुरम् । पुरुषः क्षुरम् । अद्भिःप्सातम् । वासःक्षौमम् । पुरुषः त्सरुः । घनाघनः क्षोभणश्चर्षणीनम् । नेति वक्तव्ये विसर्जनीयस्य विसर्जनीयादेशविधानं विकारनिवृत्त्यर्थम् । तेन जिह्वामूलीयोपध्मानीयौ न भवतः॥

३८३५. वा शरि ॥ ३६ ॥

विसर्जनीयस्य विसर्जनीयादेशो वा भवति शरि परे । वृक्षः शेते । प्लक्षः शेते । वृक्षश्शेते । प्लक्षश्शेते । वृक्षः षण्डे । वृक्षष्षण्डे । वृक्षः साये । वृक्षस्साये.। खर्परे शरि वा लोपो वक्तव्यः । वृक्षा स्थातारः । वृक्षाः स्थातारः । वृक्षास्स्थातारः ॥

३८३६. कुप्वोः कः पौ च ॥ ३७ ॥

कवर्गपवर्जयोः परतोः विसर्जनीयस्य यथासंख्यं क प इत्येतावादेशौ भवतः, चकाराद्विसर्जनीयश्च । वृक्षः करोति । वृक्षः करोति । वृक्षः खनति । वृक्षः खनति । वृक्षः

पचति । वृक्षः पचति । वृक्ष फलति । व्रुक्षः फलति । कपावुच्चारणार्थौ । जिह्वामूलीयोपध्मानीयावेतावादेशौ विसर्जनीयस्य स इत्येतस्मिन्नाप्राप्ते इदमारभ्यते इत्येतस्य बाधकं, शर्परे विसर्जनीय इत्येतत्तु न बाध्यते-वासः क्षौमम् । अद्भिः प्सातम् । पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्येति शर्परे विसर्जनीय इत्येतदेव भवति । केचित्तु एतदर्थं योगविभागं कुर्वन्ति । कुप्वोः । शरपरयोः विसर्जनीयस्य विसर्जनीय आदेशो भवति । किमर्थमिदम्? कः पौ चेति वक्ष्यति, तद्बाधनार्थमिति ॥

३८३७. सोऽपदादौ ॥ ३८ ॥

सकार आदेशो भवति विसर्जनीयस्य कुप्वोरपदाद्योः परतः पाशकल्पककाम्येषु । याप्ये पाशप्-पयस्पाशम् (१) । ईषदपरिसमाप्तौ कल्पप्-पयस्कल्पम् । यशस्कल्पम् । प्रागिवात्कः - पयस्कम् । यशस्कम् । काम्यच्च - पयस्काम्यति । यशस्काम्यति । अपदादाविति किम्? पयः कामयते । पयः पिबति । सोऽपदादावित्यनव्ययस्येति वक्तव्यम् । इह मा भूत्-प्रातः कल्पम् । पुनः कल्पमिति । रोः काम्ये नियमार्थम् । रोरेव काम्ये नान्यस्येति नियमार्थं वक्तव्यम् । पयस्काम्यति । यशस्काम्यति । इह मा भूत्-गीः काम्यति । धूः काम्यति । उपध्मानीयस्य कवर्गे परतः सकार आदेशो भवतीति वक्तव्यम् । किं प्रयोजनम् ? उब्जिरुपध्मानीयोपधः पठ्यत इति दर्शने अभ्युद्गः इति यथा स्यात् ॥

३८३८. इणः षः ॥ ३९ ॥

अपदादाविति वर्त्तते । इण उत्तरस्य विसर्जनीयस्य षकारादेशो भवति कुप्वोरपदाद्योः परतः पाशकल्पककम्येषु । पाश-सर्पिष्पाशम् । यजुष्पाशम् । कल्प-सपिष्कल्पम् । यजुष्कल्पम्। क-सर्पिष्कम् । यजुष्कम् । काम्य-सपिष्काम्यति । यजुष्काम्यति । अपदादावित्येव । अग्निः करोति । वायुः करोति । अग्निः पचति । वायुः पचति । कुप्वोरित्येव । सर्पिस्ते । यजुस्ते । इत उत्तरं स इति इणः ष इति च वर्त्तते, तत्र इणः परो यो विसर्जनीयस्तस्य षकारो भवत्यन्यस्य सकारो भवति ॥

३८३९. नमस्पुरसोर्गत्योः ॥ ४० ॥

नमस्पुरस् इत्येतयोर्गतिसंज्ञकयोर्विसर्जनीयस्य सकारादेशो भवति कुप्वोः परतः । नमस्कर्ता । नमस्कर्त्तुम् । नमस्कर्त्तव्यम् । गत्योरिति किम्? पूःपुरौ पुरः करोति ॥

३८४०. इदुदुपधस्य चाप्रत्ययस्य ॥ ४१ ॥

इकारोपधस्य उकारोपधस्य चाप्रत्ययस्य विसर्जनीयस्य षकार आदेशो भवति कुप्वोः परतः । निर्दुर्बहिराविश्चतुरप्रादुस् । निस् - निष्कृतम् । निष्पीतम् । दुस्-दुष्कृतम् । दुष्पीतम्। बहिस्-बहिष्कृतम् । बहिष्पीतम् । आविस्-श्राविष्कृतम् । आविष्पीतम् । चतुर्चतुष्कृतम् । चतुष्कपालम् । चतुष्कन्दलम् । चतुष्कलम् । प्रादुस्-प्रादुष्कृतम् । प्रादुष्पीतम् । अप्रत्ययस्येति किम्? अग्निः करोति । वायुः करोति । मातुः करोति । पितुः करोति । अत्र रात्सस्येति सकारलोपे कृते रेफस्य यो विसर्जनीयस्तस्याप्रत्ययविसर्जनीयत्वात् षत्वं प्राप्नोति । कस्कादिषु तु भ्रातुष्पुत्रग्रहणं ज्ञापकमेकादेशनिमित्तत्वात् षत्वप्रतिषेधस्य । पुम्मुहुसोः प्रतिषेधो वक्तव्यः । पुंस्कामा । मुहुः कामा (१) । नैष्कुल्यम् । दौष्कुल्यम् । दौष्पुरुष्यम् । नि३ष्कुलम् । दु३ष्कुलम् । दु३ष्पुरुषः । बहिरङ्गलक्षणयोर्वृद्धिप्लुतयोरसिद्धत्वात् षत्वं प्रवर्त्तते ॥

३८४१. तिरसोऽन्यतरस्याम् ॥ ४२ ॥

तिरसो विसर्जनीयस्यान्यतरस्यां सकारादेशो भवति कुप्वोः परतः । तिरस्कर्ता । तिरस्कर्त्तुम् । तिरस्कर्त्तव्यम् । तिरःकर्त्ता । तिरःकर्त्तुम् । तिरः कर्त्तव्यम् । गतेरित्येवतिरः कृत्वा काण्डं गतः ॥

३८४२. द्विस्त्रिश्चतुरिति कृत्वोऽर्थे ॥ ४३ ॥

ष इति संबद्ध्यते । द्विस् त्रिस् चतुर् इत्येतेषां कृत्वोऽर्थे वर्त्तमानानां विसर्जनीयस्य षकार आदेशो भवति अन्यतरस्यं कुप्वोः परतः । द्विष्करोति । द्विः करोति । त्रिष्करोति । त्रिः करोति । चतुष्करोति । चतुः करोति । द्विष्पचति । द्विः पचति । त्रिष्पचति । त्रिः पचति । चतुष्पचति । चतुः पचति । कृत्वोर्थ इति किम्? चतुष्कपालम् । चतुष्कण्टकम् । पूर्वेण नित्यं षत्वं भवति । इदुदुपधस्येत्यस्यानुवृत्तौ सत्यां कृत्वोर्थविषयेण च पदेन विसर्जनेये विशेष्यमाणे द्विस्त्रिश्चतुरिति शक्यमकर्त्तुम् ॥

कृत्वसुजर्थे षत्वं ब्रवीति कस्माच्चतुष्कपाले मा ।
षत्वं विभाषयाभून्ननु सिद्धं तत्र पूर्वेण ॥
सिद्धे ह्ययं विधत्ते चतुरः षत्वं यदापि कृत्वोऽर्थे ।
लुप्ते कृत्वोऽर्थीये रेफस्य विसर्जनीयो हि ॥
एवं सति त्विदानीं द्विस्त्रिश्चतुरित्यनेन किं कार्यम् ।
अन्यो हि नेदुदुपधः कृत्वोर्थः कश्चिदप्यस्ति ॥
अक्रियमाणे ग्रहणे विसर्जनीयस्तदा विशेष्येत ।

चतुरो न सिद्धयति तथा रेफस्य विसर्जनीयो हि ॥

तस्मिंस्तु क्रियमाणे युक्तं चतुरो विशेषणं भवति ।

प्रकृतं पदं तदन्तं तस्यापि विशेषणं न्याय्यम् ॥

एवं तु क्रियमाणे द्विसप्तिश्चतुर्ग्रहणे चतुःशब्दस्य कृत्वोऽर्थेऽपि वर्त्तमानस्य पूर्वेणैव नित्यं षत्वं स्यात् । पूर्वत्रासिद्धे नास्ति प्रतिषेधोऽभावादुत्तरस्य ॥

३८४३. इसुसोः सामर्थ्ये ॥ ४४ ॥

षः इति संबद्ध्यते । इस् उस् इत्येतयोर्विसर्जनीयस्यान्यतरस्यां षकारादेशो भवति सामर्थ्ये कुप्वोः परतः । सर्पिष्करोति । सर्पिः करोति । यजुष्करोति । यजुः करोति । सामर्थ्य इति किम्? तिष्ठतु सर्पिः, पिब त्वमुदकम् । सामर्थ्यमिह व्यपेक्षा, न पुनरेकार्थीभावः, उभयं वा॥

३८४४. नित्यं समासेऽनुत्तरपदस्थस्य ॥ ४५ ॥

इसुसोरिति वर्त्तते । समासविषये इसुसोर्विसर्जनीयस्यानुत्तरपदस्थस्य नित्यम् षत्वं भवति कुप्वोः परतः । सर्पिष्कुण्डिका । धनुष्कपालम् । सपिष्पानम् । धनुष्फलम्। अनुत्तरपदस्थस्येति किम्? परमसर्पिः कुण्डिका । परमधनुः कपालम् । पूर्वसूत्रेण विकल्पोऽप्यत्र न भवति । एतदेवानुत्तरपदस्थस्येति वचनं ज्ञापकमिसुसोः प्रत्ययग्रहणे यस्मात् स विहितस्तदादेरित्ययं नियमो न भवति । तेन वाक्येऽपि परमसर्पिष्करोति, परमसर्पिः करोति, इसुसोः सामर्थ्य इत्येतद्भवति । व्यपेक्षा च तत्र सामर्थ्यमाश्रितमिति समासे न भवति ॥

३८४५. अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य ॥ ४६ ॥

अकारादुत्तरस्य अनव्ययविसर्जनीयस्य समासेऽनुत्तरपदस्थस्य, नित्यं सकारादेशो भवति कृ, कमि, कंस, कुम्भ, पात्र, कुशा, कर्णी, इत्येतेषु परतः । कृ-अयस्कारः । पयस्कारः । कमि - अयस्कामः । पयस्कामः । कंस-अयस्कंसः । पयस्कंसः । कुम्भ-अयस्कुम्भः । पयस्कुम्भः । अयस्कुम्भी, पयस्कुम्भीत्यत्रापि भवति प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवतीति । पात्र - अयस्पात्रम् । पयस्पात्रम् । अयस्पात्री । पयस्पात्री । कुशा-अयस्कुशा। पयस्कुशा । कर्णी-अयस्कर्णी । पयस्कर्णी शुनस्कर्ण इत्ययं तु कस्कादिषु द्रष्टव्यः । अत इति किम्? गीःकारः । धूःकारः । तपरकरणं किम्? भाःकरणम् । भास्कर इत्ययं तु कस्कादिषु द्रष्टव्यः । अनव्ययस्येति किम्? श्वःकारः । पुनःकारः । समास इत्येव । यशः करोति । यशः कामयते । अनुत्तरपदस्थस्येत्येव । परमपयः कारः । परमपयः कामः ॥

३८४६. अधःशिरसी पदे ॥ ४७ ॥

अधस् शिरस् इत्येतयोर्विसर्जनीयस्य समासेऽनुत्तरदस्थस्य सकार आदेशो भवति पदशब्दे परतः । अधस्पदम् । शिरस्पदम् । अधस्पदी । शिरस्पदी । समासे इत्येव । अधः पदम् । अनुत्तपदस्थस्येत्येव । परमशिरःपदम् । अधस्पदमिति मयूरव्यसकादित्वात् समासः ॥

३८४७. कस्कादिषु च ॥ ४८ ॥

कस्क इत्येवमादिषु च विसर्जनीयस्य सकारः षकारो वा यथायोगमादेशो भवति कुप्वोः परतः । कस्कः । कौतस्कुतः । कुत आगत इत्यण् । भ्रातुष्पुत्रः । शुनस्कर्णः । सद्यस्कालः । सद्यस्क्रीः । क्रीणातेरयं संपदादित्वात् क्विप् प्रत्ययः । तत्र भवः क्रतुः - साद्यस्क्रः । कांस्कान् । कानाम्रेडित इति रुत्वमत्र । सर्पिष्कुण्डिका । धनुष्कपालम् । बर्हिष्पूलम् । यजुष्पात्रमित्येषां पाठ उत्तरपदस्थस्यापि षत्वं यथा स्यादिति, परमसर्पिः फलमित्येवमादिप्रत्युदाहरणादिति पारायणिका आहुः । भाष्ये वृत्तौ च नित्यं समासेऽनुत्तरपदस्थस्येत्यत्र परमसर्पिः कुण्दिकेत्येतदेव प्रत्युदाहरणम् । अयस्काण्डः । मेदस्पिण्डः । अविहितलक्षण उपचारः कस्कादिषु द्रष्टव्यः ॥

३८४८. छन्दसि वाऽप्राम्रेडितयोः ॥ ४९ ॥

छन्दसि विषये विसर्जनीयस्य वा सकारादेशो भवति कुप्वोः परतः प्रशब्दम् आम्रेडितं च वर्जयित्वा । अयः पात्रम् । अयस्पात्रम् । विश्वतः पात्रम् । विश्वतस्पात्रम् । उरुणः कारः । उरुणस्कारः । अप्राम्रेडितयोरिति किम्? अग्निः प्रविद्वान् । परुषः परुषः परि सूर्यरश्मिर्हरिकेशः पुरस्तात् । स नः पावक इत्येवमादिषु सर्वे विधयश्छन्दसि विकल्प्यन्त इति सत्वं न भवति ॥

३८४९. कः करत्करतिकृधिकृतेष्वनदितेः ॥ ५० ॥

कः, करत्, करति, कृधि, कृत इत्येतेषु परतः अनदितेर्विसर्जनीयस्य सकारादेशो भवति छन्दसि विषये । कः - विश्वतस्कः । करत्-विश्वतस्करत् । करति-पयस्करति । कृधि-उरुणस्कृधि । कृत-सदस्कृतम् । अनदितेरिति किम्? यथा नो अदितिः करत् ।

३८५०. पञ्चम्याः परावध्यर्थे ॥ ५१ ॥

छन्दसीत्येव । पञ्चमीविसर्जनीयस्य सकारादेशो भवति परौ परतः अध्यर्थे । दिवस्परि प्रथमं जज्ञे । अग्निर्हिमवतस्परि । दिवस्परि । महस्परि । पश्चम्या इति किम्? अहिरिव

भोगैः पर्येति बाहुम् । पराविति किम्? एभ्यो वा एतल्लोकेभ्यः प्रजापतिः समैरयत् । अद्ध्यर्थ इति किम्? दिवः पृथिव्याः पर्योज उद्भृतम् । अत्र परिः सर्वतोभावे, अध्यर्थः उपरिभावः ॥

३८५१. पातौ च बहुलम् ॥ ५२ ॥

पातौ च धातौ परतः पञ्चमीविसर्जनीयस्य बहुलं सकार आदेशो भवति छन्दसि विषये। दिवस्पातु । राज्ञस्पातु । न च भवति-परिषदः पातु ॥

३८५२. षष्ठ्याः परिपुत्रपृष्ठपारपदपयस्पोषेषु ॥ ५३ ॥

षष्ठीविसर्जनीयस्य सकारादेशो भवति पति, पुत्र, पृष्ठ, पार, पद, पयस्, पोष इत्येतेषु परतः छन्दसि विषये । वाचस्पति विश्वकर्माणमूतये । पुत्र - दिवस्पुत्राय सूर्याय । पृष्ठदीवस्पृष्ठे धावमानं सुपर्णम् । पार-अगन्म तमसस्पारम् । पद-इडस्पदे समिध्यसे । पयससूर्यं चक्षुर्दिवस्पयः । पोष-रायस्पोषं यजमानेषु धत्तम् । षष्ठ्या इति किम्? मनुः पुत्रेभ्यो दायं व्यभजत् ॥

३८५३. इडाया वा ॥ ५४ ॥

इडायाः षष्ठीविसर्जनीयस्य वा सकार आदेशो भवति पत्यादिषु परतश्छन्दसि विषये । इडायास्पतिः । इडायाः पतिः । इडायास्पुत्रः । इडायाः पुत्रः । इडायास्पृष्ठम् । इडायाः पृष्ठम् । इडायास्पारम् । इडायाः पारम् । इडायास्पदम् । इडायाः पदम् । इडायास्पयः । इडायाः पयः । इडायास्पोषम् । इडायाः पोषम् ॥

३८५४. अपदान्तस्य मूर्द्धन्यः ॥ ५५ ॥

पदाधिकारो निवृत्तः । अपदान्तस्येति मूर्द्धन्य इति चैतदधिकृतम् वेदितव्यम् आपादपरिसमाप्तेः । वक्ष्यति - आदेशप्रत्यययोः । सिषेव । सुष्वाप । अग्निषु । वायुषु । अपदान्तस्येति किम्? अग्निस्तत्र । वायुस्तत्र । ष इत्येवं सिद्धे मूर्द्धन्यग्रहणं ढकारार्थम् । अकृढ्वम् । चकृढ्वे ॥

३८५५. सहेः साडः सः ॥ ५६ ॥

सहेर्द्धातोः साड्रूपस्य यः सकारस्तस्य मूर्द्धन्य आदेशो भवति । जलाषाट् । तुराषाट् । पृतनाषाट् । सहेरिति किम्? सह डेन वर्त्तते सडस्तस्यापत्यं साडिः । साड्ग्रहणं किम्? यत्रास्यैतद्रूपं तत्र यथा स्यात् । इह मा भूत्-जलासाहम् । स इति किम्? आकारस्य मा भूत् ॥

३८५६. इण्कोः ॥ ५७ ॥

इण्कोरित्येतदधिकृतं वेदितव्यम् । इत उत्तरं यद्वक्ष्यामः इणः कवर्गाच्चेत्येव तद्वेदितव्यम् । वक्ष्यति - आदेशप्रत्यययोः । सिषेव । सुष्वाप । अग्निषु । वायुषु । कर्तृषु । हर्तृषु । गीर्षु । धूर्षु । वाक्षु । त्वक्षु । इण्कोरिति क्रिम्? दास्यति । असौ ॥

३८५७. नुम्विसर्जनीयशर्व्यवायेऽपि ॥ ५८ ॥

नुम्व्यवायेऽपि विसर्जयीयव्यवायेऽपि शर्व्यवायेऽपि इण्कोरुत्तरस्य सकारस्य मूर्द्धन्यादेशो भवति । व्यवायशब्दः प्रत्येकमभिसम्बध्यते । नुम्व्यवाये तावत्-सर्पींषि । यजूंषि । हवींषि । विसर्जनीयव्यवाये-सर्पिःषु । यजुःषु । हविःषु । शर्व्यवाये - सपिष्षु । यजुष्षु । हविष्षु । नुमादिभिः प्रत्येकं व्यवाये षत्वमिष्यते, न समस्तैः । तेनेह न भवति-निस्से । निस्स्व इति । णिसि चुम्बन इत्येतस्यैतद्रूपम् । अत्र हि नुमा सकारेण च शरा व्यवधानम् ॥

३८५८. आदेशप्रत्यययोः ॥ ५९ ॥

मूर्द्धन्य इति वर्त्तते स इति च । आदेशप्रत्यययोरिति षष्ठी भेदेन संबद्ध्यते । आदेशो यः सकार प्रत्ययस्य च यः सकारः इण्कोरुत्तरस्तस्य मूर्द्धन्यो भवति । आदेशस्य तावत्-सिषेव। सुष्वाप । प्रत्ययस्य-अग्निषु । वायुषु । कर्तृषु । हर्तृषु । इन्द्रो मा वक्षत् । स देवान् यक्षदिति व्यपदेशिवद्भावात् प्रत्ययस्येति षत्वं भवति । यजतेर्वहतेश्च पञ्चमलकारे परस्मैपदप्रथमैकवचन इकारलोपः, लेटोऽडाटावित्यट्, सिब्बहुलं लेटीति सिप्, ततः सिद्धम्-यक्षत्, वक्षत् इति ॥

३८५९. शासिवसिघसीनां च ॥ ६० ॥

शासि वसि घसि इत्येतेषां च इण्कोरुत्तरस्य सकारस्य मूर्द्धन्यो भवति । अन्वशिषत् । अन्वशिषताम् । अन्वशिषन् । शिष्टः । शिष्टवान् । वसि-उषितः । उषितवान् । उषित्वा । घसि-जक्षतुः । जक्षुः । घसिभसोरित्युपधालोपः - अक्षन् पितरोऽमीमदन्त पितरः । अनादेशार्थं वचनम् । घसिर्यद्यप्यादेशः, सकारस्त्वादेशो न भवति । इण्कोरित्येव । शास्ति । वसति । जघास ॥

३८६०. स्तौतिण्योरेव षण्यभ्यासात् ॥ ६१ ॥

स्तौतेर्ण्यन्तानां च षत्वभूते सनि परतः अभ्यासादिण उत्तरस्य आदेशसकारस्य मूर्द्धन्यादेशो भवति । तुष्टूषति । ण्यन्तानाम्-सिषेवयिषति । सिषज्जयिषति । सुष्वापयिषति ।

सिद्धे सत्यारम्भो नियमार्थः - स्तौतिण्योरेव षण्यभ्यासाद्यथा स्यादन्यस्य मा भूत् । सिसिक्षति। सुसूषति । एवकारकरणमिष्टतोऽवधारणार्थम् । सौतिण्योः षण्येवेति हि विज्ञायमाने तुष्टावेत्यत्र न स्यात् । इह च स्यादेव सिसिक्षतीति । षणीति किम्? अन्यत्र नियमो माभूत्-सिषेव । को (१) विनतेऽनुरोधः? अविनते नियमो मा भूत्-सुषुप्सति । तिष्ठासति । कः सानुबन्धेऽनुरोधः? षशब्दमात्र नियमो मा भूत्-सुषुपिष इन्द्रम् (२) । अभ्यासादिति किम्? अभ्यासात् या प्राप्तिसस्या नियमो यथा स्याद्धातोर्या (३) प्राप्तिस्तस्यानियमो मा भूत् । प्रतीषिषति । अधीषिषति ॥

३८६१. सः स्विदिस्वदिसहीनां च ॥ ६२ ॥

स्विदि स्वदि साहे इत्येतेषां ण्यन्तानां सनि षभूते परतोऽभ्यासादुत्तरस्य सकारस्य सकारादेशो भवति । स्विदि-सिस्वेदयिषति । स्वदि-सिस्वादयिषति । सहि - सिसाहयिषति । सकारस्य सकारवचनं मूर्द्धन्यनिवृत्त्यर्थम् ॥

३८६२. प्राक्सितादड्व्यवायेऽपि ॥ ६३ ॥

सेवसितेति वक्ष्यति, प्राक्सितसंशब्दनाद्यानित ऊर्ध्वमनुक्रमिष्यामस्तत्राड्-व्यवायेऽपि मूर्द्धन्यो भवतीत्येवं तद्वेदितव्यमपिशब्दादनड्व्यवायेऽपि वक्ष्यति । उपसर्गात्सुनोतित्सुवतीति षत्वम् । अभिषुणोति । परिषुणोति । विषुणोति । निषुणोति । अभ्यषुणोत् । पर्यषुणोत् । व्यषुणोत् । न्यषुणोत् ॥

३८६३. स्थादिष्वभ्यासेन चाभ्यासस्य ॥ ६४ ॥

प्राक् सितादिति वर्त्तते । उपसर्गात् सुनोतीत्यत्र स्थासेनयसेधेति स्थादयस्तेषु स्थादिषुप्राक् सितसंशब्दानाद् अभ्यापासेन व्यवाये मूर्द्धन्यो भवत्यभ्याससकारस्य च भवतीत्येवं वेदितव्यम् । अभ्यासेन व्यवाये-परितष्ठौ । अषोपदेशार्थं च - अभिषिषेणयिषति । परिषिषेणयिषति । अवर्णान्ताभ्यासार्थं च - अभितष्ठौ । परितष्ठौ । षणि प्रतिषेधार्थं च - अभिषिषिक्षति । परिषिषिक्षति । अभ्यासस्येति वचनं नियमार्थं स्थादिष्वेवाभ्याससकारस्य मूर्द्धन्यो भवति नान्यत्र-अभिसुसूषति । अभिसिषासति ॥

३८६४. उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्था-सेनयसेधसिचसञ्जस्वञ्जाम् ॥६५॥

मूर्द्धन्य इति वर्त्तते स इति च । उपसर्गस्थान्निमित्तादुत्तरस्य सुनोति सुवति स्यति स्तौति स्तोभति स्था सेनय सेध सिच सञ्ज स्वञ्ज इत्येतेषां सकारस्य मूर्द्धन्यादेशो भवति । सुनोति - अभिषुणोति । परिषुणोति । अभ्यषुणोत् । पर्यषुणोत् । सुवति-अभिषुवति । परिषुवति । अभ्यषुवत् । पर्यषुवत् । स्यति-अभिष्यति । परिष्यति । अभ्यष्यत् । पर्यष्यत् । स्तौति - अभिष्टौति । परिष्टौति । अभ्यष्टौत् । पर्यष्टौत् । स्तोभति-अभिष्टोभते । परिष्टोभते । अभ्यष्टोभत । पर्यष्टोभत । स्था-अभिष्ठास्यति । परिष्ठास्यति । अभ्यष्ठात् । पर्यष्ठात् । अभितष्ठौ। परितष्ठौ । सेनय-अभिषेणयति । परिषेणयति । अभ्यषेणयत् । पर्यषेणव । अभिषिषेणयिषति । परिषिषेणयिषति । सेध-अभिषेधति । परिषेधति । अभ्यषेधत्। पर्यषेधत्। सिच-अभिषिञ्चति । परिषिञ्चति । अभ्यषिञ्चत् । पर्यषिञ्चत् । अभिषिषिक्षति । परिषिषिक्षति । सञ्ज-अभिषजति । परिषजति । अभ्यषजत् । पर्यषजत् । अभिषिषङ्क्षति । परिषिषङ्क्षति । प्वञ्ज-अभिष्वजते । परिष्वजते । अभ्यष्वजत । पर्यष्वजत । अभिषिष्वङ्क्षते। परिषिष्वङ्क्षते । सेध इति शब्विकरणनिर्द्देशः सिध्यतिनिवृत्त्यर्थः । उपसर्गादिति किम्? दधि सिञ्चति । मधु सिञ्चति । निर्गताः सेचका अस्माद्देशान्निःसेचको देश इति । नायं सिचेरुपसर्गः । अभिसावकीयतीत्यत्रापि न सुनोतिं प्रति क्रियायोगः, किम् तर्हि? सावकीयं प्रति । अभिषावयतीत्यत्र तु सुनोतिमेव प्रति क्रियायोगो न सावयतिम्प्रतीति षत्वं भवति ॥

३८६५. सदिरप्रतेः ॥ ६६ ॥

सदेः सकारस्य उपसर्गस्थान्निमित्तादप्रतेरुत्तरस्य मूर्द्धन्य आदेशो भवति । निषीदति । विषीदति । न्यषीदत् । व्यषीदत् । निषसाद । विषसाद । अप्रतेरिति किम्? प्रतिसीदति ॥

३८६६. स्तम्भेः ॥ ६७ ॥

उपसर्गादिति वर्तते । स्तम्भेः सकारस्य उपसर्गस्थान्निमित्तादुत्तरस्य मूर्द्धन्य आदेशो भवति । अभिष्ठभ्नाति । परिष्टभ्नाति । अभ्यष्टभ्नात् । पर्यष्टभ्नात् । अभितष्टम्भ । परितष्टम्भ। अप्रतेरियेतदिह नानुवर्त्तते, तेनैतदपि भवति - प्रतिष्ठभ्नाति । प्रत्यष्टभ्नात् । प्रतितष्टम्भ ॥

३८६७. अवाच्चालम्बनाविदूर्ययोः ॥ ६८ ॥

अवशब्दादुपसर्गादुत्तरस्थ स्तम्भेः सकारस्य मूर्द्धन्यादेशो भवति आलम्बनेऽर्थे आविदूर्ये च। आलम्बनमाश्रयणम् । अविदूरस्य भाव आविदूर्यम् । आलम्बने तावत्-अवष्टभ्यास्ते । अवष्टभ्य तिष्ठति । आविदूर्ये-अवष्टब्धा सेना । अवष्टब्धा शरत् । आलम्बनाविदूर्ययोरिति किम्? अवस्तब्धो वृषलः शीतेन । अनिगर्थ आरम्भः ॥

३८६८. वेश्च स्वनो भोजने ॥ ६९ ॥

वेरुपसर्गादवाच्चोत्तरस्थ भोजनार्थे स्वनतेः सकारस्य मूर्द्धन्यादेशो भवति । विष्वणति । व्यष्वणत् । विषष्वाण । अवष्वणति । अवाष्वणत् । अवषष्वाण । अभ्यवहारक्रियाविशेषोऽभिधीयते, यत्र स्वननमस्ति । भोजन इति किम्? विस्वनति मृदङ्गः (१) ॥

३८६९. परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम् ॥ ७० ॥

परि नि वि इत्येतेभ्य उपसर्गेभ्य उत्तरेषां सेव सित सय सिवु सह सुट स्तु स्वञ्ज इत्येतेषां सकारस्य मूर्द्धन्य आदेशो भवति । परिषेवते । निषेवते । विषेवते । पर्यषेवत । न्यषेवत । व्यषेवत । परिषिषेविषते । निषिषेविषते । विषिषेविषते । सित-परिषितः । निषितः। विषितः । सय-परिषयः । निषयः । विषयः । सिव्-परिषीव्यति । निषीव्यति । विषीव्यति । पर्यषीव्यत् । न्यषीव्यत् । व्यषीव्यत् । पर्यसीव्यत् । न्यसीव्यत् । व्यमीव्यत् । सह-परिषहते। निषहते । विषहते । पर्यषहत । न्यषहत । व्यषहत । पर्यसहत । न्यसहत । व्यसहत । सुट्-परिष्करोति । पर्यष्करोत् । पर्यस्करोत् । स्तु-परिष्टौति । निष्टौति । विष्टौति । पर्यष्टौत् । न्यष्टौत् । व्याष्टौत् । पर्यस्तौत् । न्यस्तौत् । व्यस्तौत् । ष्वञ्जदंशसञ्जस्वञ्जामिति नलोपः। परिष्वजते । विष्वजते । पर्यष्वजत । पर्यस्वजत । पूर्वेणैव सिद्धे स्तुस्वञ्जिग्रहणमुत्तरार्थम्, अड्व्यवाये विभाषा यथा स्यात् ॥

३८७०. सिवादीनां वाड्व्यवायेऽपि ॥ ७१ ॥

अनन्तरसूत्रे सिवुसहसुट्स्तुस्वञ्जामिति सिवादयः । सिवादीनामड्व्यवायेपि परिनिविभ्य उत्तरस्य सकारस्य वा मूर्द्धन्यो भवति । तथा चैवोदाहृतम् (२) ॥

३८७१. अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु ॥ ७२ ॥

अनु वि परि अभि नि इत्येतेभ्य उत्तरस्य स्यन्दतेरप्राणिषु सकारस्य वा मूर्द्धन्यादेशो भवति । अनुष्यन्दते । विष्यन्दते । परिष्यन्दते । अभिष्यन्दते तैलम् । निष्यन्दते । अनुस्यन्दते । विस्यन्दते । परिस्यन्दते । अभिष्यन्दते तैलम् । निष्यन्दते । अनुस्यन्दते । विस्यन्दते । परिस्यन्दते । अभिस्यन्दते । निस्यन्दते । अप्राणिष्वति किम्? अनुस्यन्दते मत्स्य उदके । प्राण्यप्राणिविषयस्यापि स्यान्दतेरयं विकल्पो भवति । अनुष्यन्देते मत्स्योदके। अनुस्यन्देते । अप्राणिष्विति पर्युदासोऽयं न प्रसज्यप्रतिषेधः ॥

३८७२. वेः स्कन्देरनिष्ठायाम् ॥ ७३ ॥

वेरुपसर्गादुत्तरस्य स्कन्देः सकारस्य मूर्द्धन्यो वा भवति अनिष्ठायाम् । विष्कन्ता । विस्कन्ता । विष्कन्तुम् । विस्कन्तुम् । विष्कन्तव्यम् । विस्कन्तव्यम् । अनिष्ठायामिति किम्? विस्कन्नः ॥

३८७३. परेश्च ॥ ७४ ॥

परिशब्दाच्चोत्तरस्य स्कन्देः सकारस्य वा मूर्द्धन्यो भवति । परिष्कन्ता । परिष्कन्तुम्। परिकन्तव्यम् । परिस्कन्ता । परिस्कन्तुम् । परिस्कन्तव्यम् । पृथग्योगकरणसामर्थ्यादनिष्ठायामित्येतन्नानुवर्त्तते । परिष्कण्णः । परिस्कन्नः ॥

३८७४. परिस्कन्दः प्राच्यभरतेषु ॥ ७५ ॥

परिस्कन्द इति मूर्द्धन्याभावो निपात्यते प्राच्यभरतेषु प्रयोगविषयेषु । पूर्वेण मूर्धन्ये प्राप्ते तदभावो निपात्यते । परिस्कन्दः । अन्यत्र परिष्कन्दः । अचि निपातनम् । अथवा निष्ठातकारस्य लोपः भरतग्रहणं प्राच्यविशेषणम् ।

३८७५. स्फुरतिस्फुलत्योर्निर्निविभ्यः ॥ ७६ ॥

स्फुरतिस्फुलत्योः सकारस्य निस् नि वि इत्येतेभ्य उत्तरस्य वा मूर्द्धन्यादेशो भवति । स्फुरति - निवष्फुरति । निस्स्फुरति । निष्फुरति । निस्फुरति । विष्फुरति । विस्फुरति । स्फुलति-निष्ष्फुलति । निस्स्फुलति । निष्फुलति । निस्फुलति । विष्फुलति । विस्फुलति ॥

३८७६. वेः स्कभ्नातेर्नित्यम् ॥ ७७ ॥

वेरुत्तरस्य स्कभ्नातेः सकारस्य नित्यं मूर्द्धन्यादेशो भवति । विष्कभ्नाति । विष्कम्भिता। विष्कम्भितुम् । विष्कम्भितव्यम् ॥

३८७७. इणः षीध्वंलुङ्लिटां धोऽङ्गात् ॥ ७८ ॥

मूर्धन्य इति वर्त्तते । इणन्तादङ्गात्परेषां षीध्वंलुङलिटां यो धकारस्तस्य मूर्धन्यादेशो भवति । च्योषीढ्वम् । प्लोषीढवम् । लङ्-अच्योढ्वम् । अप्लोढ्वम् । लिट् चकृढवे । ववृढ्वे । इण्कोरिति वर्त्तमाने पुनरिण्ग्रहणं कवर्गनिवृत्त्यर्थम् । पक्षीध्वम् । यक्षीध्वम् । षीध्वंलुङलिटामिति किम्? स्तुध्वे । अस्तुध्वम् । अङ्गादिति किम् ? परिवेविषीध्वम् । अर्थवद्ग्रहणादपि सिद्धम्? तत्तु नाश्रितम् ॥

३८७८. विभाषेटः ॥ ७९ ॥

इणः परस्मादिट उत्तरेषां षीध्वंलुङलिटां यो धकारस्तस्य मूर्द्धन्यादेशो भवति विभाषा । लविषीढ्वम् । लविषीध्वम् । पविषीढ्वम् । पविषीध्वम् । लुङ्-अलविढ्वम् । अलविध्वम् । लिट्-लुलुविढ्वे । लुलुविध्वे । इण इत्येव, आसिषीध्वम् । अथेह कथं भवितव्यम् - उपदिदीयिध्वे? केचिदाहुः - इणन्ताङ्गादुत्तरस्य इट आनन्तर्य युटा व्यवहितमिति न भवितव्यं ढत्वेनेति । अपरेषां दर्शनमङ्गादिति निवृत्तमिण इत्यनुवर्त्तते । ततश्च यकारादेव इणः परोऽनन्तरमिडिति पक्षे भवितव्यं मूर्द्धन्येनेति ॥

३८७९. समासेऽङ्गुलेः सङ्गः ॥ ८० ॥

सङ्गसकारस्याङ्गुलेरुत्तरस्य मूर्द्धन्य आदेशो भवति समासे । अङ्गुलेः सङ्गः अङ्गुलिषङ्गः । अङ्गुलिषङ्गा यवागूः । अङ्गुलिषङ्गो गाः सादयति । समास इति किम्? अङ्गुलेः सङ्गं पश्य ॥

३८८०. भीरोः स्थानम् ॥ ८१ ॥

स्थानसकारस्य भीरोरुत्तरस्य मूर्द्धन्यादेशो भवति । भीरुष्ठानम् । समास इत्येव । भीरोः स्थानं पश्य ॥

३८८१. अग्नेः स्तुत्स्तोमसोमाः ॥ ८२ ॥

अग्नेरुत्तरस्य स्तुत् स्तोम सोम इत्येतेषां सकारस्य मूर्द्धन्यादेशो भवति समासे । अग्निष्टुत् । अग्निष्टोमः । अग्नीषोमः । अग्नेर्दीर्घात् सोमस्येष्यते । तेनेह न भवति - अग्निसोमौ माणवकौ । अहापि ज्योतिरग्निः सोमो लताविशेषः - अग्निसोमौ तिष्ठतः । समास इत्येव अग्नेः सोमः ॥

३८८२. ज्योतिरायुषः स्तोमः ॥ ८३ ॥

ज्योतिस् आयुस इत्येताभ्यामुत्तरस्य स्तोमसकारस्य मूर्द्धन्यादेशो भवति समासे । ज्योतिष्टोमः । आयुष्टोमः । समास इत्येव । ज्योतिः स्तोमं दर्शयति ॥

३८८३. मातृपितृभ्यां स्वसा ॥ ८४ ॥

मातृ पितृ इत्येताभ्यामुत्तरस्य स्वसृसकारस्य समासे मूर्द्धन्यादेशो भवति । मातृष्वसा । पितृष्वसा ॥

३८८४. मातुः पितुर्भ्यामन्यतरस्यम् ॥ ८५ ॥

मातुर् पितुर् इत्येताभ्यामुत्तरस्य स्वसृशब्दस्यान्यतरस्यां मूर्द्धन्यादेशो भवति समासे । मातुःष्वस्वा । मातुः स्वसा । पितुःष्वसा । पितुःस्वसा । मातुःपितुरिति रेफान्तयोरेतद्ग्रहणम् । एकदेशविकृतस्यानन्यत्वाद्विसर्जनीयान्तात् सकारान्ताच्च षत्वं भवति । समास इत्येव । वाक्ये मा भूत्-मातुः स्वसेत्येव नित्यं भवति ॥

३८८५. अभिनिसस्तनः शब्दसंज्ञायाम् ॥ ८६ ॥

अभि निस् इत्येतस्मादुत्तरस्य स्तनतिसकारस्य मूर्द्धन्यादेशो भवति अन्यतरस्यां शब्दसंज्ञायां गम्यमानायाम् । अभिनिष्टानो वर्णः । अभिनिष्टानो विसर्जनीयः । अभिनिस्तानो वर्णः । अभिनिस्तानो विसर्जनीयः (१) । शब्दसंज्ञायामिति किम्? अभिनिस्तनति मृदङ्गः (२)। समास इत्यतः प्रभृति निवृत्तम् ॥

३८८६. उपसर्गप्रादुर्भ्यामस्तिर्यच्परः ॥ ८७ ॥

उपसर्गस्थान्निमित्तात्प्रादुस्शब्दाच्चोत्तरस्य यकारपरस्याच्परस्य चास्तिसकारस्य मूर्द्धन्यो भवति । अभिषन्ति । निषन्ति । विषिन्ति । प्रादुःषन्ति । अभिष्यात् । निष्यात् । विष्यात् । प्रादुःष्यात् । उपसर्गादिति किम्? दधि स्यात् । मधु स्यात् । अस्तीति किम्?

अनुसृतम् । विसृतम् । अथासत्यपि अस्तिग्रहणे सकारमेव प्रति उपसर्ग आश्रीयते । प्रादुः शब्दस्य च कृभ्वस्तिष्वेव प्रयोग इत्यन्यत्राप्रसङ्ग? तथाप्येतत्प्रत्युदाहर्त्तव्यम् - अनुसूते अनुसूः। अनुस्वोऽपत्यम् आनुसेयः, शुभ्रादिताड्ढक् । ढेलोपोऽकद्रवा इत्युवर्णलोपः यच्पर इति किम्? निस्तः । विस्तः । प्रादुस्तः ॥

३८८७. सुविनिर्दुर्भ्यः सुपिसूतिसमाः ॥ ८८ ॥

सु वि निर् दुर् इत्येतेभ्य उत्तरस्य सुपि सूति सम इत्येतेषां मकारस्य मूर्द्धन्यादेशो भवति । सुपीति स्वपिः कृतसंप्रसारणो गृह्यते - सुषुप्तः । विषुप्तः । निःषुप्तः । दुःषुप्तः । सूतिरिति स्वरूपग्रहणम् - सुषूतिः । विषूतिः । निःषूतिः । दुःषूतिः । सम-सुषमम् । विषमम् । निःषमम् । दुःषमम् ॥

सुपेः षत्वं स्वपेर्मा भूद्विसुष्वापेति केन न । हलादिशेषान्न सुपिरिष्टं पूर्वं प्रसारणम् । स्थादीनां नियमो नात्र प्राक्सितादुत्तरः सुपिः । अनर्थको विषुषुपुः सुपिभूतो द्विरुच्यते ॥ पूर्वत्रासिद्धीयमद्विर्वचने इति कृते षत्वे ततो द्विर्वचनम् ॥

३८८८. निनदीभ्यां स्नातेः कौशले ॥ ८९ ॥

नि नदी इत्येताभ्यामुत्तरस्य स्नातिसकारस्य मूर्द्धन्यादेशो भवति कौशले गम्यमाने । निष्णातः कटकरणे । निष्णातो रज्जुवर्त्तने । नद्यां स्नातीति नदीष्णः । सुपि स्थ इत्यत्र सुपीति योगविभागात्कप्रत्ययः । कौशल इति किम्? निस्नातः । नद्यां स्नातो नदीस्नात इति॥

३८८९. सूत्रं प्रतिष्णातम् ॥ ९० ॥

प्रतिष्णातमिति निपात्यते सूत्रं चेद्भवति । प्रतिष्णातं सूत्रम् । शुद्धमित्यर्थः । प्रतिस्नातमित्येवान्यत्र ॥

३८९०. कपिष्ठलो गोत्रे ॥ ९१ ॥

कपिष्ठल इति निपात्यते गोत्रविषये । कपिष्ठलो नाम यस्य स कापिष्ठलिः पुत्रः । गोत्र इति किम्? कपेः स्थलं कपिस्थलम् ॥

३८९१. प्रष्ठोग्रगामिनि ॥ ९२ ॥

प्रष्ठ इति निपात्यते अग्रगामिन्यभिधेये । प्रतिष्ठत इति प्रष्ठोऽश्वः । अग्रतो गच्छतीत्यर्थः। अग्रगामिनीति किम्? प्रस्थे हिमवतः पुण्ये । प्रस्थो व्रीहीणाम् ॥

३८९२. वृक्षासनयोर्विष्टरः ॥ ९३ ॥

विष्टर इति निपात्यते वृक्षे आसने च वाच्ये । विपूर्वस्य स्तृणातेः षत्वं निपात्यते । विष्टरो वृक्षः । विष्टरमसनम् । वृक्षासनयोरिति किम्? औलपिवाक्यस्य विस्तरः (१) ॥

३८९३. छन्दोनाम्नि च ॥ ९४ ॥

विष्टर इति निपात्यते विपूर्वात् स्तृ इत्येतस्माद्धातोः छन्दोनाम्नि चेत्येवं विहितो घञ् इति विष्टर इत्यपि प्रकृतेविष्टार इति विज्ञायते । विष्टारपङक्तिः छन्दः । विष्टारो बृहती छन्दः । छन्दोनाम्नीति किम्? पटस्य विस्तारः ॥

३८९४. गवियुधिभ्यां स्थिरः ॥ ९५ ॥

गवियुविभ्यामुत्तरस्य स्थिरसकारस्य मूर्धन्यादेशो भवति । गविष्ठिरः । युधिष्ठिरः । गोशब्दादहलन्तादपि एतस्मादेव निपातनात् सप्तम्या अलुग्भवति ॥

३८९५. विकुशमिपरिभः स्थलम् ॥ ९६ ॥

वि कु शमि परि इत्येतेभ्य उत्तरस्य स्थलसकारस्य मूर्द्धन्यादेशो भवति । विष्ठलम् । कुष्ठलम् । शमिष्ठलम् । परिष्ठलम् ॥

३८९६. अम्बाम्बगोभूमिसव्यापद्विवित्रिकुशेकुशङ्कवङ्गुमञ्जिपुञ्जि-परमेबर्हिर्द्विव्यग्निभ्यः स्थः ॥ ९७ ॥

अम्ब आम्ब गो भूमि सव्य अप द्वि त्रि कु शेकु शङ्कु अङ्गु मञ्जि पुञ्जि परमे बर्हिस् दिवि अग्नि इत्यीभ्य उत्तरस्य स्थशब्दसकारस्य मूर्धन्यादेशो भवति । अम्बष्ठः । आम्बष्ठः । गोष्ठः । भूमिष्ठः । सव्येष्ठः । अपष्ठः । द्विष्ठः । त्रिष्ठः । कुष्ठः । शेकुष्ठः । अङ्गुष्ठः । मञ्जिष्ठः । पुञ्जिष्ठः । परमेष्ठः । बर्हिष्ठः । दिविष्ठः । अग्निष्ठः । स्थास्थिन्स्थणामिति वक्तव्यम् । सव्येष्ठाः। परमेष्ठी । सव्येष्ठसारथिः ॥

३८९७. सुषामादिषु च ॥ ९८ ॥

सुषामादिषु शब्देषु सकारस्य मूर्द्धन्यदेशो भवति । शोभनं साम यस्यासौ सुषामा ब्राह्मणः। दुष्षामा । निष्षामा । निष्षेधः । दुष्षेधः । सुशब्दस्य कर्म्मप्रवचनीयसंज्ञकत्वान्निर दुःशब्दयोश्च क्रियान्तरविषयत्वादनुपसर्गत्वे सति पाठोऽयम् । सेधतेर्गताविति वा प्रतिषेधबाधनार्थः । सुषन्धिः । दुःषन्धिः । निषन्धिः । सुष्ठु । दुष्ठु । तिष्ठतेरुणादिष्वेतौ व्युत्पाद्येते । गौरिषक्थः संज्ञायाम् । ङ्यापोः संज्ञाछन्दसोर्बहुलमिति पूर्वपदस्य ह्रस्वत्वम् । प्रतिष्णिका । प्रतिष्णाशब्दादयं कन् प्रत्ययः । जलाषाहम् । नौषेवनम् । दुन्दुभिषेवनम् ॥

३८९८. (१) एति संज्ञायामगात् ॥ ९९ ॥

एकारपरस्य सकारस्य मूर्द्धन्यादेशो भवति इण्कोरुत्तरस्यागकारात् परस्य संज्ञायां विषये। हरिषेणः । वारिषेणः । जानुषेणी । एतीति किम्? हरिसक्थम् । संज्ञायामिति किम्? पृथ्वी सेना यस्थ स पृथुसेनो राजा । अगादिति किम्? विष्वक्सेनः । इण्कोरित्येव । सर्वसेनः॥

३८९९. नक्षत्राद्वा ॥ १०० ॥

नक्षत्रवाचिनः शब्दादुत्तरस्य सकारस्य वा एति संज्ञायामगकारात् मर्द्धन्यो भवति । रोहिणीषेणः । रोहिणीसेनः । भरणीषेणः । भरणीसेनः । अगकारादित्येव । शतभिषक्सेनः । अविहितलक्षणो मूर्द्धन्यः सुषामादिषु द्रष्ठव्यः ॥

३९००. ह्रस्वात्तादौ तद्धिते ॥ १०१ ॥

ह्रस्वादुत्तरस्य सकारस्य मूर्द्धन्यादेशो भवति तादौ तद्धिते परतः । तर तम तय तल तस् त्यप् एतानि प्रयोजयन्ति । तर - सपिष्टरम् । यजुष्टरम् । तम-सर्पिष्टमम् । यजष्टमम्। तय-चतुष्टये ब्राह्मणानां निकेताः । त्व-सर्पिष्ट्वम् । यजुष्ट्वम् । तल्-सर्पिष्टा । यजष्टा । त्स-सर्पिष्टः। यजुष्टः । त्यप् - आविष्टयो वर्द्धते । ह्रस्वादिति किम्? गीस्तरा । धूस्तरा । तादाविति किम्? सर्पिस्साद्यवति । प्रत्ययसकारस्य सात्पदाद्योरिति सत्यपि प्रतिषेधे प्रकृतिसकारस्य स्यात्। तद्धित इति किम्? सर्पिस्तरति । तिङन्तस्य प्रतिषेधो वक्तव्यः । भिन्द्युस्तराम् । छिन्द्युस्तराम् ॥

३९०१. निसस्तपतावनासेवने ॥ १०२ ॥

निसः सकारस्य मूर्द्धन्यादेशो भवति तपतौ परतोऽनासेवनेऽर्थे । आसेवनं पुनः पुनः करणम् । निष्टपति सुवर्णम् । सकृदग्निं स्पर्शयतीत्यर्थः । अनासेवन इति किम्? निस्तपति

सुवर्ण सुवर्णकारः । पुनः पुनरग्नि स्पर्शयतीत्यर्थः । निष्टप्तं रक्षो निष्टप्ता अरातय इत्यत्र सदप्यासेवनं न विवक्ष्यते छान्दसो वा वर्णविकारः ॥

३९०२. युष्मत्तत्तक्षुःष्वन्तःपादम् ॥ १०३ ॥

युष्मत् तत् ततक्षुस् इत्येतेषु तकारादिषु परतः सकारस्य मूर्द्धन्यादेशो भवति स चेत्सकारोऽन्तःपादं भवति । युष्मदादेशास्त्वं त्वां ते तव । अग्निष्ट्वं नामासीत् । त्वा-अग्निष्ट्वा वर्द्धयामासि । ते-अग्निष्टे विश्वमानाय । तव-अपस्वग्ने सधिष्टव । तत्-अग्निष्टद्विश्वमापृणाति । तत्तक्षुस् - द्यावापृथिवी निष्टतक्षुः । अन्तः पादमिति किम्? नित्यमात्मनो मिन्दाभूदग्निस्तत्पुनराह जातवेदा विचर्षणिः ॥

३९०३. यजुष्येकेषाम् ॥ १०४ ॥

यजषि विषये युष्मत्तत्ततक्षुषु परत एकेषामाचार्याणां मतेन सकारस्य मूर्द्धन्यादेशो भवति। अर्चिर्भिष्ट्वम् । अर्चिर्भिस्त्वम् । अग्निष्टेऽग्रम् । अग्निस्तेग्रम् । अग्निष्टत् । अग्निस्तत् । अर्चिर्भिष्टतक्षुः । अर्चिर्भिस्ततक्षुः ॥

३९०४. स्तुतस्तोमयोश्छन्दसि ॥ १०५ ॥

एकेषामिति वर्त्तते । स्तुत स्तोम इत्येतयोः सकारस्य छन्दसि विषये मूर्द्धन्यादेशो भवति एकेषामाचार्याणां मतेन । त्रिभिष्टुतस्य । त्रिभिस्तुतस्य । गोष्टोमम् षोडशिनम् । गोस्तोमं षोडशिनम् । पूर्वपदादित्येव सिद्धे प्रपञ्चार्थमिदम् ॥

३९०५. पूर्वपदात् ॥ १०६ ॥

छन्दसीति वर्त्तते एकेषामिति च । पूर्वपदस्थान्निमित्तात्परस्य सकारस्य मूर्द्धन्यादेशो भवति छन्दसि विषये एकेषामाचार्याणां मतेन । द्विषन्धिः । त्रिषन्धिः । द्विसन्धिः । त्रिसन्धिः। मधुष्टानम् । मधुस्थानम् । द्विषाहस्रं चिन्वीत । द्विसाहस्रं चिन्वीत । असमासेऽपि यत्पूर्वपदं तदपीह गृह्यते । त्रिःषमृद्धत्वाय । त्रिःसमृद्धत्वाय ॥

३९०६. सुञः ॥ १०७ ॥

सुञिति निपात इह गृह्यते, तस्य पूर्वपदस्थान्निमित्तादुत्तरस्य मर्द्धन्यादेशो भवति छन्दसि विषये । अभिषुणः सखीनाम् । ऊर्ध्व ऊषुणः । इकः सुञीति दीर्घः । नश्च धातुस्थोरुषुभ्य इति णत्वम् (१) ॥

३९०७. सनोतेरनः ॥ १०८ ॥

सनोतेरनकारान्तस्य सकारस्य मूर्द्धन्यादेशो भवति । गोषाः नृषाः । अन इति किम्? गोसनिं वाचमुदीरयन् । पूर्वपदादित्येव सिद्धे नियमार्थमिदम् । तत्र केचित्सवनादिपाठाद्रोसनिर्नियमस्य फलं न भवतीति सिसानयिषतीति प्रत्युदाहरन्ति । सिसनिषतेरप्रतयः सिसनीरित्यपरे ॥

३९०८. सहेः पृतनर्त्ताभ्यां च ॥ १०९ ॥

पृतना ऋत इत्येताभ्यामुत्तरस्य सहिसकारस्य मूर्द्धन्यादेशो भवति । पृतनाषाहम् । ऋताषाहम् । केचिद्योगविभागं सहेरिति कुर्वन्ति । ऋतीषहमित्यत्रापि यथा स्यात् । ऋतिशब्दस्य पूर्वपदस्य संहितायामेतद्दीर्घत्वम् । अवग्रहे तु ऋतिसहमित्येव भवति । चकारोनुक्तसमुच्चयार्थः । तेन ऋतीषहमिति सिद्धम् ॥

३९०९. न रपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम् ॥ ११० ॥

रेफपरस्य सकारस्य सृपि सृजि स्पृशि स्पृहि सवनादीनां च मूर्द्धन्यो न भवति । रपर-विस्रंसिकायाः काण्डं जुहोति । विस्रब्धः कथयति । सृपि - पुरा क्रूरस्य विसृपः । सृजिवाचो विसर्जनात् । स्पृशि-दिवस्पृशम् । शृहि-निस्पृह कथयति । सवनादीनाम्-सवने २ । सूते २ । सामे २ । सवनमुखे २ । किं स्यतीति किंसम् २ । अनुसवनम् २ । गोसनिम् २ । अश्वसनिम् २ । पूर्वपदादिति प्राप्तेः । प्रतिषेधः । अश्वसनिग्रहणमनिणोऽपि षत्वमस्तीति ज्ञापनार्थम् । तेन जलाषाहमश्वषाहमित्येतत् सिद्धं भवति । क्वचिदेवं गणपाठः - सवनेसवने । अनुसवने २ । संज्ञायां बृहस्पतिसवः । शकुनिसवनम् । सोमे २ । सूते २ । संवत्सरे २ । किंसम् २ । विसम् २ । मुसलम् २ । गोसनिमश्वसनिम् । सवनादिः ॥

३९१०. सात्पदाद्योः ॥ १११ ॥

सादिति एतस्य पदादेश्च मूर्द्धन्यादेशो न भवति । (१) विभाषा साति कात्स्न्र्ये । प्रत्ययसकारत्वात् प्राप्तिः । पदादेश्चादेशसकारत्वात् । सात्-अग्निसात् । दधिसात् । मधुसात् । पदादेः - दधि सिञ्चति । मधु सिञ्चति ॥

३९११. सिचो यङि ॥ ११२ ॥

सिचः सकारस्य यङि परतो मूर्द्धन्यादेशो न भवति । सेसिच्यते । अभिसेसिच्यते । उपसर्गादिति या प्राप्तिः सा पदादिलक्षणमेव प्रतिषेधं बाधते न सिचो यङीति । तस्मादयं प्रतिषेधः सर्वत्र भवति । यङीति किम्? अभिषिषिक्षति ।

३९१२. सेधतेर्गतौ ॥ ११३ ॥

गतौ वर्त्तमानस्य सेधतेः सकारस्य मूर्द्धन्यादेशो न भवति । अभिसेधयति गाः । परिसेधयति गाः । गताविति किम्? शिष्यमकार्यात् प्रतिषेधयति ॥

३९१३. प्रतिस्तब्धनिस्तब्धौ च ॥ ११४ ॥

प्रतिस्तब्ध निस्तब्ध इत्येतौ मूर्द्धन्यप्रतिषेधाय निपात्येते । स्तम्भेरिति प्राप्तं षत्वं प्रतिषिध्यते । प्रतिस्तब्धः । निस्तब्धः ॥

३३१४. सोढः ॥ ११५ ॥

सहिरयं सोढभूतो गृह्यते, तस्य सकारस्य मूर्द्धन्यादेशो न भवति । परिसोढः । परिसोढुम्। परिसोढव्यम् । सोढभूतग्रहणं किम्? परिषहते ॥

३९१५. स्तुम्भुसिवुसहां चङि ॥ ११६ ॥

स्तम्भु सिवु सह इत्येतेषां चङि परतः सकारस्य मूर्द्धन्यादेशो न भवति । स्तम्भेरिति प्राप्तः परिनिविभ्य इति च मूर्द्धन्यः प्रतिषिध्यते । स्तम्भु - पर्यस्तम्भत् । अभ्यस्तम्भत् । सिवु-पर्यसीषिवत् । व्यसीषिवत् । सह-पर्यसीषहत् । व्यसीषहत् । स्तभ्भुसिवुसहां चङि उपसर्गादिति वक्तव्यम् । उपसर्गाद्या प्प्तिस्तस्याः प्रतिषेधो यथा स्यात् । अभ्यासाद्या प्राप्तिस्तस्य मा भूदिति । तथा चैवोदाहृतम् ॥

३९१६. सुनोतेः स्यसनोः ॥ ११७ ॥

सुनोतेः सकारस्य मूर्द्धन्यादेशो न भवति स्ये सनि च परतः । अभिसोष्यति । परिसोष्यति । अभ्यसोष्यत् । पर्यसोष्यत् । सनि किमुदाहरणम्? सुसूषति । नैतदस्ति प्रयोजनं, तत्र स्तौतिण्योरेव षण्यभ्यासादिति नियमात् न भविष्यति । इदं तर्हि-अभिसुसूषते? एतदपि नास्ति, स्थादिष्वभ्यासेन चाभ्यासस्येति नियमात् । इदं तर्हयभिसुसूषतेरप्रययः

अभिसुसूरित्युदाहरणमिति । अत्र हि सन् षभूतो न भवतीत्यभ्यासात् प्राप्तिरस्ति । स्यसनोरिति किम्? सुषाव ॥

३९१७. सदिष्वञ्ज्योः परस्य लिटि ॥ ११८ ॥

सदि ष्वञ्ज इत्येतयोर्द्धात्वोर्लिटि परतः सकारस्य परस्य मूर्द्धन्यो न भवति । अभिषसाद। परिषसाद । निषसाद । विषसाद । परिषस्वजे । परिषस्वजाते । परिषस्वजिरे । अभिषस्वजे । स्वञ्जेः संयोगान्तादपि विभाषा लिटः कित्त्वमिच्छन्तीति पक्षेऽनुषङ्गलोपः ॥

३९१८. निव्यभिभ्योड्व्यवाये वा छन्दसि ॥ ११९ ॥

नि वि अभि इत्येतेभ्य उपसर्गेभ्य उत्तरस्य सकारस्याड्व्यवाये छन्दसि विषये मूर्द्धन्यादेशो न भवति वा । न्यषीदत्पिता नः । न्यसीदत् । व्यषीदत्पिता नः । व्यसीदत् । अभ्यषीदत् । अभ्यसीदत् । सदिस्वञ्जोरिति तदिह नानुवर्त्तते । सामान्येनैव तद्वचनम् । व्यष्टौत् । व्यस्तौत् । अभ्यष्टौत् । अभ्यस्तौत् । इत्येतदपि सिद्धं भवति ॥

इति श्रीवामनविरचितायां काशिकायां वृत्तौ
अष्टमाध्ययस्य तृतीया पादः ॥

अथ अष्टमाध्यायस्य
चतुर्थः पादः ॥

३९१९. रषाभ्यां नो णः समानपदे ॥ १ ॥

रेफषकाराभ्यामुत्तरस्य नकारस्य णकारादेशो भवति समानपदस्थौ चेन्निमित्तनिमित्तिनौ भवतः । आस्तीर्णम् । षकारात्-कुष्णाति । पुष्णाति । मुष्णाति । षग्रहणमुत्तरार्थम्, ष्टुत्वेनैव हि सिद्धमेतत् । समानपद इति किम्? अग्निर्नयति । वायुर्नयति । ऋवर्णाच्चेति वक्तव्यम् । तिसृणाम् । चतसृणाम् । मातृणाम् । पितृणाम् । रश्रुति सामन्यनिर्द्देशात् सिद्धम् । वर्णभक्त्या च व्यवधानेऽपि णत्वं भवतीति क्षुभ्नादिषु नृनमनतृप्नोतिग्रहणं ज्ञापकम् । अथवा ऋवर्णादपि णत्वं भवतीत्येतदेवानेन ज्ञाप्यते ॥

३९२०. अट्कुप्वाङ्नुम्व्यवायेऽपि ॥ २ ॥

अट् कु पु आङ् नुम् इत्येतैर्व्यवायेऽपि रेफषकाराभ्यामुत्तरस्य नकारस्य णकार आदेशो भवति । अड्व्यवाये तावत्-करणम् । हरणम् । किरिणा । गिरिणा । कुरुणा । गुरुणा । कवर्गव्यवाये-अर्केण । मूर्खेण । गर्गेण । अर्घेण । पवर्गव्यवाये-दर्पेण । रेफेण । गर्भेण । चर्मणा । वर्म्मणा । आङ्व्यवाये-पर्याणद्धम् । निराणद्धम् । अड्व्यवाय इति सिद्धे आङ्ग्रहणं पदव्यवाय इत्यस्य प्रतिषेधस्य बाधनार्थम् । नुम्व्यवाये-बृंहणम् । बृंहणीयम् । नुम्ग्रहणमनुस्वारोपलक्षणार्थं द्रष्टव्यम् । तेन तृहणीयमित्यत्रानस्वारव्यवाये नुमभावेऽपि णत्वं । व्यवायोपलक्षणार्थत्वादडादीनामिह व्यस्तैः समस्तैर्व्यवायेऽपि णत्वं भवति ॥

३९२१. पूर्वपदात् संज्ञायामगः ॥ ३ ॥

पूर्वपदस्थान्निमित्तादुत्तरस्य गकारवर्जितात् नकारस्य णकार आदेशो भवति संज्ञायां विषये । द्रुणसा । वार्ध्रीणसः । खरणसः (१) । शूर्पणखा । संज्ञायमिति किम्? चर्मनासिकः । अग इति किम्? ऋगयनम् । केचिदेतन्नियमार्थं वर्णयन्ति । पूर्वपदात् संज्ञायामेव णत्वं नान्यत्रेति । समासेऽपि हि समानपदे निमित्तनिमित्तिनोर्भावादस्ति पूर्वेण प्राप्तिरिति च । नियमः पूर्वपदसंबन्धादुत्तरपदस्थस्यैव णत्वं निवर्त्तयति चर्म्मनासिक इति, न तद्धितपूर्वपदस्थस्य-खारपायणः, मातृभोगीणः, करणप्रिय इति । अग इति योगविभागेन णत्वप्रतिषेधो न नियमप्रतिषेध इति । अपरे तु पूर्वसूत्रे समानमेव यत् नित्यं पदं तत्समानपदमित्याश्रयन्ति समानग्रहणात् । तेषामप्राप्तमेवणत्वमनेन विधीयते । समासे हि पूर्वपदोत्तरपदविभागाद-समानपदत्वमप्यस्तीति ॥

३९२२. वनं पुरगामिश्रकासिध्रकाशारिकाकोटराग्रेभ्यः ॥ ४ ॥

पूर्वपदात् संज्ञायामिति वर्त्तते । पुरगा, मिश्रका, सिध्रका, शारिका, कोटरा, अग्रे इत्येतेभ्यः पूर्वपदेभ्य उत्तरस्य वननकारस्य णकारादेशो भवति संज्ञायां विषये । पुरगावणम् । मिश्रकावणम् । सिध्रकावणम् । शारिकावणम् । कोटरावणम् । अग्रेवणम् । सिद्धे सत्यारम्भो नियमार्थः-एतेभ्य एव परस्य वननकारस्य णकारादेशो भवति, नान्येभ्य इति । कुबेरवनम् । शतधारवनम् । असिपत्रवनम् ॥

३९२३. प्रनिरन्तःशरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि ॥ ५ ॥

प्र निर् अन्तर् शर इक्षु प्लक्ष आम्र कार्ष्य खदिर पीयूक्षा इत्येतेभ्य उत्तरस्य वननकारस्य संज्ञायामसंज्ञायामपि णकारादेशो भवति । प्र-प्रवणे यष्टव्यम् । निर् निर्वणे

प्रतिधीयते । अन्तर्-अन्तर्वणे । शर-शरवणम् । इक्षु-इक्षुवणम् । प्लक्ष प्लक्षवणम् । आम्र-आम्रवणम् । काष्र्यवणम् । खदिर-खदिरवणम् । पीयूक्षा-पीयूक्षावणम् ॥

३९२४. विभाषौषधिवनस्पतिभ्यः ॥ ६ ॥

वनमित्येव । ओषधिवाचि यत्पूर्वपदं वनस्पतिवाचि च तत्स्थान्निमित्तादुत्तरस्य वननकारस्य णकार आदेशो भवति विभाषा । ओषधिवाचिभ्यस्तावत्-दूर्वावणम् । दूर्वावनम् । मूर्धावणम् । मूर्धावनम् । वनस्पतिभ्यः - शिरीषवणम् । शीरिषवनम् । बदरीवणम् । बदरीवनम् । द्व्यक्षरत्र्यक्षरेभ्य इति वक्तव्यम् । इह मा भूत्-देवदारुवनम् । भद्रदारुवनम् । इरिकादिभ्यः प्रतिषेधो वक्तव्यः । इरिकावनम् । मिरिकावनम् । सत्यपि भेदे वृक्षवनस्पत्योरिहाभेदेन ग्रहणं द्रष्टव्यम् ।

फली वनस्पतिर्ज्ञेयो वृक्षाः पुष्पफलोपगाः ।
ओषध्यः फलपाकान्ता लता गुल्माश्च वीरुधः ॥

३९२५. अह्नोऽदन्तात् ॥ ७ ॥

अदन्तं यत्पूर्वपदं तत्स्थान्निमित्तादुत्तरस्याह्नो नकारस्य णकार आदेशो भवति । पूर्वाह्णः। अपराह्णः । अदन्तादिति किम्? निरह्नः । दुरह्नः । अह्नोऽह्न एतेभ्य इत्यह्नादेशः । अह्नः इत्यकारान्तग्रहणाद् दीर्घाह्नी शरदित्यत्र न भवति ॥

३९२६. वाहनमाहितात् ॥ ८ ॥

आहितवाचि यत्पूर्वपदं तत्स्थान्निमित्तादुत्तरस्य वाहननकारस्य णकार आदेशो भवति । इक्षुवाहणम् । शरवाहणम् । दर्भवाहणम् । वाहने यद् आरोपितमुच्यते तदाहितमुच्यते । आहितादिति किम्? दाक्षिवहनम् । दाक्षिस्वामिकं वाहनमित्यर्थः ॥

३९२७. पानं देशे ॥ ९ ॥

पाननकारस्य पूर्वपदस्थान्निमित्तादुत्तरस्य देशाभिधाने णकार आदेशो भवति.। पीषत इति पानम्, कृत्यल्युटो बहुलमिति कर्म्मणि ल्युट् । क्षीरं पानं येषां ते क्षीरपाणा उशीनराः । मनुष्याभिधानेऽपि देशाभिधानं गम्यते । सुरापाणाः प्राच्याः । सौवीरपाणा बाह्मीकाः । कषायपाणा गन्धाराः । देश इति किम्? दाक्षीणां पानं दाक्षिपानम् ॥

३९२८. वा भावकरणयोः ॥ १० ॥

भावे करणे च यः पानशब्दस्तदीयस्य नकारस्य णकार आदेशो भवति वा पूर्वपदस्थान्निमित्तादुत्तरस्य । क्षीरपाणं वर्त्तते । क्षीरपानम् । कषायपाणम् । कषायपानम् । नद्यादीनामुपसंख्यानम् । गिरिणदी । गिरिनदी । चक्रणदी । चक्रनदी । चक्रणितम्बा । चक्रनितम्बा ॥

३९२९. प्रातिपदिकान्तनुम्विभक्तिषु च ॥ ११ ॥

वेति वर्त्तते । प्रातिपदिकान्ते नुमि विभक्तौ च यो नकारस्तस्य पूर्वपदस्थान्निमित्तादुत्तरस्य वा णकार आदेशो भवति । प्रातिपदिकान्ते तावत्-माषवापिणौ । माषवापिनौ । व्रीहिवापिणौ । व्रीहिवापिनौ । नुमि-माशवापाणि । माषवापानि । व्रीहिवापाणि । व्रीहिवापानि । विभक्तौ - माषवापेण । माषवापेन । व्रीहिवापेण । व्रीहिवापेण । व्रीहिवापेन । पूर्वपदाधिकारादुत्तरपदस्य प्रातिपदिकस्थो योऽन्त्यो नकारस्तस्येदं णत्वमिष्यते । इह हि न भवति गर्गाणां भगिनी गर्गभगिनी । यदा त्वेवं भवति गर्गाणां भगो गर्गभगः, गर्गभगोऽस्या अस्तीति गर्गभगिणीति-तदा मातृभोगीणमित्यादिवन्नित्यं णत्वमेवेति वेदितव्यम् । माषवापिणी, माषवापिनीत्यत्र तु गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेरिति कृदन्तेनैव समासे सति प्रातिपदिकस्योत्तरपदस्यैव सतो नकारो भवति (१) । तथा नुम्ग्रहणं कृतम् । स हि समुदायभक्तत्वादुत्तरपदस्यान्तो न भवति । युवादीनां (१) प्रति षेधो वक्तव्यः । आर्ययूना। क्षत्त्रिययूना । प्रपक्वानि (२) । दीर्घाह्नी शरत् ॥

३९३०. एकाजुत्तरपदे णः ॥ १२ ॥

एकाजुत्तरपदं यस्य स एकाजुत्तरपदः । तस्मिन्नेकाजुत्तरपदसमासे प्रातिपदिकान्तनुम्विभक्तिषु पूर्वपदस्थान्निमित्तादुत्तरस्य नकारस्य णकार आदेशो भवति । वृत्रहणौ । वृत्रहणः । नुमि-क्षीरपाणि । सुरापाणि । विभक्तौ-क्षीरपेण । सुरापेण । ण इति वर्त्तमाने पुनर्णग्रहणं विकल्पाधिकारनिवृत्तेर्विस्पष्ठीकरणार्थम् ॥

३९३१. कुमति च ॥ १३ ॥

कवर्गवति चोत्तरपदे प्रातिपदिकान्तनुम्विभक्तिषु पूर्वपदस्थान्निमित्तादुत्तरस्य नकारस्य णकारादेशो भवति । वस्त्रयुगिणौ । वस्नयुगिणः । स्वर्गकामिणौ । वृषगामिणौ । नुमि वस्नयुगाणि । खरयुगाणि । विभक्तौ-वस्नयुगेण । खरयुगेण ॥

३९३२. उपसर्गादसमासेऽपि णोपदेशस्य ॥ १४ ॥

ण उपदेशो यस्यासौ णोपदेशः । णोपदेशस्य धातोर्योनकारः तस्य उपसर्ग्गस्थान्निमित्तादुत्तरस्य णकारादेशो भवति असमासेऽपि । प्रणमति । परिणमति (३) प्रणायकः । परिणायकः । उपसर्गादिति किम्? प्रगता नायका अस्माद्देशात् प्रनायको देशः । असमासेऽपीति किम्? पूर्वपदाधिकारात् समास एव स्यादिति तदधिकारनिवृत्तिद्योतनार्थम् । णोपदेशस्येति किम्? प्रनदर्दति । प्रनदर्दकः ॥

३९३३. हिनुमीना ॥ १५ ॥

हिनु मीना इत्येतयोरुपसर्गस्थान्निमित्तादुत्तरस्य नकारस्य णकारादेशो भवति । प्रहिणोति। प्रहिणुतः । प्रमीणाति । प्रमीणितः । हीनुमीनाग्रहणे विकृतस्यापि भवति, अजादेशस्य स्थानिवत्त्वात् ॥

३९३४. आनि लोट् ॥ १६ ॥

आनीत्येतस्य लोडादेशस्योपसर्गस्थान्निमित्तादुत्तरस्य नकारस्य णकारादेशो भवति । प्रवपाणि । परिवपाणि । प्रयाणि । परियाणि । लोडिति किम्? प्रवपानि मांसानि ॥

३९३५. नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपति-वहतिशाम्यतिचिनोतिदेग्धिषु च ॥ १७ ॥

नेरित्येतस्योपसर्गस्थान्निमित्तादुत्तरस्य नकारस्य णकारादेशो भवति गद नद पत पद घु मा स्यति हन्ति याति वाति द्राति प्साति वपति वहति शाम्यति चिनोति देग्धि इत्येतेषु परतः। गद-प्रणिगदति । परिणिगदति । नद-प्रणिनदति । परिणिनदति । पत-प्रणिपतति । परिणिपतति । पद-प्रणिपद्यते । परिणिपद्यते । घु-प्रणिददाति । परिणिददाति । प्रणिदधाति। परिणिदधाति । माङ्-प्रणिमिमीते । परिणिमिमीते । मेङ्-प्रणिमयते । परिणिमयते । परिणिमयते । मा इति माङ्मेङोर्ग्रहणमिष्यते । स्यति-प्रणिष्यति । परिणिष्यति । हन्ति-प्रणिहन्ति । परिणिहन्ति । याति-प्रणियाति । परिणियाति । वाति-प्रणिवाति । परिणिवाति । द्राति - प्रणिद्राति प्ररिणिद्राति प्साति-प्रणिप्साति । परिणिप्साति । वपति-प्रणिवपति । परिणिवपति । वहति - प्रणिवहति । परिणिवहति । शाम्यति - प्रणिशाम्यति । परिणिशाम्यति। चिनोति-प्रणिचिनोति । परिणिचिनोति । देग्धि=प्रणिदेग्धि । परिणिदेग्धि । अड्व्यवायेऽपि नेर्गदादिषु णत्वमिष्यते-प्रण्यगदत् ॥

३९३६. शेषे विभाषाऽकखादावषान्त उपदेशे ॥ १८ ॥

नेरिति वर्त्तते उपसर्गादिति च । अककारखकारादिरषकारान्तश्च उपदेशे यो धातुः शेषमस्मिन् परत उपसर्गस्थान्निमित्तादुत्तरस्य नेर्नकारस्य विभाषा णकर आदेशो भवति । प्रणिपचति । प्रनिपचति । प्रणिभिनत्ति । प्रनिभिनत्ति । अकखादाविति किम्? प्रनिकरोति । प्रनिखादति । अषान्त इति किम्? प्रनिपिनष्टि । उपदेशग्रहणं किम्? इह च प्रतिषेधो यथा स्यात् - प्रनिचकार । प्रनिचखाद । प्रनिपेक्ष्यतीति । इह च मा भूत्-विशेः - प्रणिवेष्टा । प्रणिवेक्ष्यति ॥

३९३७. अनितेः ॥ १९ ॥

अनितेर्नकरस्योपसर्गस्थान्निमित्तादुत्तरस्य णकारादेशो भवति । प्राणिति । पराणिति ॥

३९३८. अन्तः ॥ २० ॥

अनितेरिति वर्त्तते । उपसर्गस्थान्निमित्तादुत्तरस्यानितिनकारस्य पदान्ते वर्त्तमानस्य णकारादेशो भवति । हे प्राण् । हे पराण् । पदान्तस्येति प्रतिषेधस्यापवादोऽयम् । अन्तश्च पदापेक्षो गृह्यते । केचित्तु पूर्वसूत्र एवैतदन्तग्रहणं सामीप्यार्थमभिसंबध्नन्ति, निमित्तसमीपस्थस्यैकवर्णव्यवहितस्थानितिनकारस्य पदान्ते वर्त्तमानस्य णकारादेशो यथा स्यात्। इह मा भूत्-पर्यनितीति । तैद्वितीयमपि पदान्तस्य णत्वार्थमन्तग्रहणमा-श्रयितव्यमेव। येषां तु पर्यणितीति भवितव्यमिति दर्शनम् तेषां पूर्वसूरे नार्थोऽन्तग्रहणेन ॥

३९३९. उभौ साभ्यासस्य ॥ २१ ॥

साभ्यासस्यानितेरुपसर्गस्थान्निमित्तादुत्तरस्योभयोर्नकारयोर्णकार आदेशो भवति । प्राणिणिषति । प्राणिणत् । पराणिणिषति । पराणिणत् । पूर्वत्रासिद्धीयमद्विर्वचन इत्येतस्मिन्त्सति पूर्वेणैव कृतणत्वस्य द्विर्वचने कृते सिद्धमेतदन्तरेणापि वचनम्, तत्तु नाश्रयितव्यमिति सूत्रमिदमारभ्यते । तेन औजढदिति सिद्धं भवति (१) ॥

३९४०. हन्तेरत्पूर्वस्य ॥ २२ ॥

अकारपूर्वस्य हन्तिनकारस्य उपसग्र्गस्थान्निमित्तादुत्तरस्य णकार आदेशो भवति । प्रहण्यते । परिहण्यते । प्रहणनम् । परिहणनम् । अत्पूर्वस्येति किम्? प्रघ्नन्ति । तपरकरणं किम्? चिणि-प्राघानि । पर्यघानि ॥

३९४१. वमोर्वा ॥ २३ ॥

हन्तेरिति वर्त्तते । वकारमकारयोः परतो हन्तिनकारस्योपसर्गस्थान्निमित्तादुत्तरस्य वा ण कारादेशो भवति । प्रहण्वः । प्रहन्वः । परिहन्वः । प्रहण्मः । परिहण्मः । प्रहन्मः । परिहन्मः (२) ॥

३९४२. अन्तरदेशे ॥ २४ ॥

अन्तःशब्दादुत्तरस्य हन्तिनकारस्यात्पूर्वस्य णकारादेशो भवति अदेशाभिधाने । अन्तर्हण्यते । अन्तर्हणनं वर्त्तते । अदेश इति किम्? अन्तर्हननो देशः । अत्पूर्वस्येत्येव । अन्तर्ध्नन्ति । तपरकरणं किम्? अन्तरघानि ॥

३९४३. अयनं च ॥ २५ ॥

अन्तरदेश इति वर्त्तते । अयननकारस्यचान्तःशब्दादुत्तरस्य णकारादेशो भवति अदेशाभिधाने । अन्तरयणं वर्त्तते । अन्तरयणं शोभनम् । अदेश इत्येव । अन्तरयनो देशः ॥

३९४४. छन्दस्यृदवग्रहात् ॥ २६ ॥

पूर्वपदादिति वर्त्तते । ऋकारान्तादवग्रहात् । पूर्वपदादुत्तरस्य णकारादेशो भवति छन्दसि विषये । नृमणाः । पितृयाणम् । अत्र हि नृमणाः पितृयाणमिति ऋकारोऽवगृह्यते । अवग्रहग्रहणं किमर्थमुच्यते । यावता संहिताधिकार आध्ययपरिसमाप्तेरित्युक्तम्? विषयोपलक्षणार्थमवग्रहग्रहणमवगृह्यमाणाद्यया स्यादनवगृह्यमणान्मा भूत् । अपदान्ते चावग्रहो नास्ति ॥

३९४५. नश्च धातुस्थोरुषुभ्यः ॥ २७ ॥

नस् इत्येतस्थ नकारस्य णकारादेशो भवति धातुस्थान्निमितादुत्तरस्योरुशब्दात् षुशब्दाच्च छन्दसि विषये । धातुस्थात्तावत् - अग्ने रक्षा णः । शिक्षा णो अस्मिन् । उरुशब्दात् - उरुणस्कृधि । षुशब्दात्-अभीषु णः सखीनाम् । ऊर्ध्व ऊषु ण ऊतये । अस्मदादेशोऽयं नसशब्दो बहुवचनस्य वस्नसाविति ॥

३९४६. उपसर्गाद् बहुलम् ॥ २८ ॥

उपसर्गस्थान्निमित्तादुरत्तस्य नसो नकारस्य णकारादेशो भवति बहुलम् । प्रणः शूद्रः । प्रणसः । प्रणो राजा । न च भवति-प्र नो मुञ्चतम् । बहुलग्रहणा-द्भाषायामपि भवति-प्रणसं मुखम्(१) । उपसर्गाच्चेति नासिकाया नसादेशः ॥

३९४७. कृत्यचः ॥ २९ ॥

कृत्स्थो यो नकारोऽच उत्तरस्तस्योपसर्गस्थान्निमित्तादुत्तरस्य णकारादेशो भवति । अन मान अनीय अनि इश निष्ठादेश एते णत्वं प्रयोजयन्ति । अन - प्रयाणम् । परियाणम् । प्रमाणम् । परिमाणम् । मान-प्रयायमाणम् । परियायमाणम् । अनीय-प्रयाणीयम् । परियाणीयम् । अनिः - अप्रयाणिः । अपरियाणिः । इनि -प्रयायिणौ । परियायिणौ । निष्ठादेशः - प्रहीणः । परिहीणः । प्रहीणवान् । परिहीणवान् । अच इति किम्? प्रभुग्नः । (२) भुजो कौटिल्ये । अस्य निष्ठाप्रत्ययः । ओदितश्चेति निष्ठानत्वम् । चोः कुरिति कृत्वे सिद्धं परिभुग्न इति कृत्स्थस्य णत्वे निर्विण्णास्योपसख्यानं कर्त्तव्यम् । निर्विण्णोऽहमत्रवासेन ॥

३९४८. णेर्विभाषा ॥ ३० ॥

ण्यन्ताद्यो विहितः कृत्प्रत्ययः तत्स्थस्य नकारस्योपसर्गस्थान्निमित्तादुत्तरस्य विभाषा णकारादेशो भवति । प्रयापणम् । प्रयापनम् । परियापणम् । परियापनम् । प्रयाप्यमाणम् । प्रयाप्यमानम् । प्रयापणीयम् । प्रयापनीयम् । अप्रयापणिः । अप्रयापनिः । प्रयापिणौ । प्रयापिनौ । विहितविशेषणं किम्? प्रयाप्यमाणमित्यत्र यका व्यवधानेऽपि यथा स्यादिति ॥

३९४९. हलश्चेजुपधात् ॥ ३१ ॥

कृत्यच इति वर्त्तते । हलादिर्यो धातुरिजुपधस्तस्मात्परो यः कृत्प्रत्ययः तत्स्थस्य नकारस्याच उत्तरस्योपसर्गस्थान्निमित्तादुत्तरस्य विभाषा णकारादेशो भवति । प्रकोपणम् । परिकोपणम् । प्रकोपनम् । परिकोपनम् । हल इति किम्? प्रेहणम् । प्रोहणम् । इजुपधादिति किम्? प्रवपणम् । परिवपणम् । कृत्यच इति नित्ये प्राप्ते विकल्पः । अच इत्येव । परिभुग्नः। इजुपधस्य सर्वस्य हलन्तत्वादिह हल्ग्रहणमादिविशेषणम् ॥

३९५०. इजादेः सनुमः ॥ ३२ ॥

हल इति वर्त्तते । तेनेह सामर्थ्यात्तदन्तविधिः । इजादेः सनुमो हलन्ताद्धातोर्विहितो यः कृत्तत्स्थस्य नकारस्योपसर्गस्थान्निमित्तादुत्तरस्य णकारो भवति । प्रेङ्खणम् । परेङ्खणम् ।

प्रेङ्गणम् । परेङ्गणम् । प्रोम्भणम् । परोम्भणम् । सिद्धे सत्यारम्भो नियमार्थः -इजादेरेव सनुमो नान्यस्मादिति । प्रमङ्गनम् । हल इत्यधिकारदण्यन्ते नित्यं विद्ध्यर्थमेतन्न भवति ॥

३९५१. वा निंसनिक्षनिन्दाम् ॥ ३३ ॥

उपसर्गादिति वर्त्तते । निंस निक्ष निन्द इत्येषां नकारस्योपसर्गस्थान्निमित्तादुत्तरस्य वा णकारादेशो भवति । प्रणिसनम् । प्रनिसनम् । प्रणिक्षणम् । प्रनिक्षणम् । प्रणिन्दनम् । प्रनिन्दनम् । णोपदेशत्वादेतेषां नित्ये प्राप्ते विकल्पः ॥

३९५२. न भाभूपूकमिगमिप्यायीवेपाम् ॥ ३४ ॥

भा भू पू कमि गमि प्यायी वेप इत्येतेषामुपसर्गस्थान्निमित्तादुत्तरस्य कृत्स्थस्य नकारादेशो न भवति । भा-प्रभानम् । परिभानम् । भू-प्रभवनम् । परिभवनम् । पू-प्रपवनम् । परिपवनम् । पूञ्ग्रहणं द्रष्टव्यम् । पूङो इहि भवत्येव णत्वम् । प्यायी-प्राप्यानम् । परिप्यानम्। वेप-प्रवेपनम् । परिवेपनम् । ण्यन्तानां भादीनामुपसंख्यानं कर्त्तव्यम् । प्रभापनम्। परिभापनम् ॥

३९५३. षात्पदान्तात् ॥ ३५ ॥

षकारात्पदान्तादुत्तरस्य णकारादेशो न भवति । निष्पानम् । दुष्पानम् । सर्पिष्पानम् । यजुष्पानम् । षादिति किम्? निर्णयः । पदान्तादिति किम्? कुष्णाति । पुष्णाति । पदे अन्तः पदान्त इति सप्तमीसमासोऽयम् । तेनेह न भवति-सुसर्पिष्केण । सुयजुष्केण । शेषाद्विभाषेति कप् ॥

३९५४. नशेः षान्तस्य ॥ ३६ ॥

नेति वर्त्तते । नशेः षकारान्तस्य णकारादेशो न भवति । प्रनष्टः । षान्तस्येति किम्? प्रणश्यति । परिणश्यति । षान्तग्रहणं षान्तभूतपूर्वमात्रस्यापि यथा स्यात्-प्रनङ्क्ष्यति? परिनङ्क्ष्यति ॥

३९५५. पदान्तस्य ॥ ३७ ॥

पदान्तस्य नकारस्य णकारादेशो न भवति । वृक्षान् । प्लक्षान् । अरीन् । गिरीन् ।

३९५६. पदव्यवायेऽपि ॥ ३८ ॥

पदेन व्यवायः - पदव्यवधानम् । पदे व्यवायेऽपि सति निमित्तनिमित्तिनोर्नकारस्य णकारादेशो न भवति । माषकुम्भवापेन । चतुरङ्गयोगेन । प्रावनद्धम् । पर्यवनद्धम् । प्रगान्न्यायामः । परिगान्न्यायामः । पदव्यवायेऽतद्धित इति वक्तव्यम् । इह मा भूत्-आर्द्धगोमयेण। शुष्कगोमयेण । गोश्च पुरीष इति मयट् । स्वादौ पूर्वं पदमिति गोशब्दः पूर्वपदं, तेन व्यवायः॥

३९५७. क्षुभ्नादिषु च ॥ ३९ ॥

नेति वर्तते । क्षुभ्ना इत्येवमादिषु शब्देषु नकारस्य णकारादेशो न भवति । क्षुभ्नाति । अजादेशेभ्यः स्थानिवद्भावादिहापि प्रतिषेधो भवति । क्षुभ्नीतः । क्षुभ्नन्ति । नृनमनः । पूर्वपदात्संज्ञायामिति प्राप्तिः । छन्दस्यृदवग्रहादिति च प्राप्नोति । नन्दिन् । नन्दय । नगर । एतान्युत्तरपदानि संज्ञायां प्रयोजयन्ति - हरिनन्दी । हरिनन्दनः । गिरिनगरम् । नृतिर्यङि प्रयोजयति - नरीनृत्यते । तृप्नुतृप्नोति । नर्तन । गहन । नन्दन । निवेश । निवास । अग्नि। अनूप । एतान्युत्तरपदानि प्रयोजयन्ति । परिनर्त्तनम् । परिगहनमिति संज्ञायां पूर्वपदात्संज्ञायामिति प्राप्नोति । परिनन्दनमित्यत्रोपसर्गादसमासेऽपीति प्राप्नोति । शरनिवेशः । शरनिवासः । शराग्निः । दर्भानूपः । इत्येताः संज्ञाः । आचार्यादणत्वं च । आचार्यभोगीनः । आचार्यानी(१) इरिकादिभ्यो वनोत्तरपदेभ्यः संज्ञायाम् । इरिका । तिमिर । समीर । कुबेर । हरि। कर्म्मार । इत्युत्तरपदवनशब्दस्य संज्ञायाम् । क्षुम्नादिराकृतिगणः । अविहितलक्षणा णत्वप्रतिषेधः क्षुभ्नादिषु द्रष्टव्यः ॥

३९५८. स्तोः श्चुना श्चुः ॥ ४० ॥

सकारतवर्गयोः शकारचवर्गाभ्यां सन्निपाते शकारचवर्गावादेशौ भवतः । स्तोः श्चुनेति यथासंख्यमत्र नेष्यते । सकारस्य शकारेण चवर्गेण द्वाभ्यामपि संनिपाते शकारो भवति । तवर्गस्यापि च शकारेण चवर्गेण च सन्निपाते चवर्गो भवति । आदेशे तु यथासंख्यमिष्यते । सकारस्य शकारस्तवर्गस्य च चर्वग इति । सकारस्य शकारेण सन्निपातेवृक्षश्शेते । प्लक्षश्शेते। तस्यैव चवर्गेण - वृक्षश्चिनोति । प्लक्षश्चिनोति । वृक्षश्छादयति । प्लक्षश्छादयति । तवर्गस्य शकारेण - अग्निचिच्छेते । सोमसुच्छेते । सोमसुच्छेते । तस्यैव चवर्गेण-अग्निचिच्चिनोति । सोमसुच्चिनोति । अग्निचिच्छादयति । सोमसुच्छादयति । अग्निचिज्जयति । सोमसुज्जयति। अग्निचिज्झकारम् । सोमसुज्झकारम् । अग्निचिञ्जकारः । सोमसुञ्जकारः । मस्जेः - मज्जति । भ्रस्जेः-भृज्जति । व्रश्चेः - वृश्चति । यजेः -यज्ञः । याचेः - याच्ञा । शादिति

प्रतिषेधो ज्ञापकः संख्यातानुदेशाभावस्य स्तोः श्राविति सप्तमीनिर्दशो न कृतः, पूर्वेण परेण च श्चुत्वं यथा स्यादेति ॥

३९५९. ष्टुना ष्टुः ॥ ४१ ॥

स्तोरिति वर्त्तते । सकारतवर्गयोः षकारटवर्गाभ्यां संनिपाते षकारटवर्गावादेशौ भवतः । अत्रापि तथैव संख्यातानुदेशाभावः । षकारेण सकारस्य - वृक्षष्षण्डे । प्लक्षष्षण्डे । तस्यैव टवर्गेण-वृक्षष्टीकते । प्लक्षष्टीकते । वृक्षष्ठकारः । प्लक्षष्ठकारः । तवर्गस्य चकारेण-पेष्टा । पेष्टुम्। कृषीष्ट । कृषीष्ठाः । तस्यैव टवर्गेण-अग्निचिट्टीकते । सोमसुट्टीकते । अग्निचिट्टकारः। सोमसुट्टकारः । अग्निचिड्डीनः । सोमसुड्डीनः । अग्निचिड्ढौकते । अग्निचिण्णकारः । अत्ट्-अट्टति । अट्ड् अड्डति ॥

३९६०. न पदान्ताट्टोरनाम् ॥ ४२ ॥

पदान्ताट्टवर्गादुत्तरस्य स्तोः ष्टत्वं न भवति नामित्येतद्वर्जयित्वा । श्वलिट्साये । मधुलिट्तरति । पदान्तादिति किम्? ईड स्तुतौ-ईट्टे । टोरिति किम्? सर्पिष्टमम् । अनामिति किम्? षष्णाम् । अत्यल्पमिदमुच्यते । अनाम्नवतिनगरीणामिति वक्तव्यम् । षष्णाम् । षष्णवतिः । षष्णगर्यः ॥

३९६१. तोः षि ॥ ४३ ॥

नेति वर्त्तते । तवर्गस्य षकारे यदुक्तं तन्न भवति । अग्निचित्षण्डे । भवान्षण्डे । महान्षण्डे ॥

३९६२. शात् ॥ ४४ ॥

तोरिति वर्त्तते । शकारादुत्तरस्य तवर्गस्य यदुक्तं तन्न भवति । प्रश्नः । विश्नः ॥

३९६३. यरोऽनुनासिकेऽनुनासिको वा ॥ ४५ ॥

पदान्तग्रहणमनुवर्त्तते । यरः पदान्तस्यानुनासिके परतो वाऽनुनासिकादेशो भवति । वाड्नयति । वाग्नयति । श्वलिण्नयति । श्वलिड्नयति । अग्निचिन्नयति । अग्निचिद्नयति। त्रिष्टुम्नयति । विष्टुब्नयति । पदान्तस्येत्येव । वेद्मि । क्षुभ्नाति । यरोऽनुनासिके प्रत्यये भाषायां नित्यवचनं कर्त्तव्यम् । वाड्मयम् । कियन्मात्रम् । व्यवस्थितविभाषाविज्ञानात् सिद्धम्॥

३९६४. अचो रहाभ्यां द्वे ॥ ४६ ॥

यर इति वर्त्तते । अच उत्तरौ यौ रेफहकारौ ताभ्यामुत्तरस्य यरो द्वे भवतः । अर्क्कः। मर्क्कः । ब्रह्म्मा । उपह्न्नुते । अच इति किम्? ह्नुते । ह्मलयति ॥

३९६५. अनचि च ॥ ४७ ॥

अच इति वर्त्तते यर इति च । अच उत्तरस्य यरो द्वे वा (१) भवतोऽनचि परतः । दद्ध्यत्र । मद्ध्वत्र । अच इत्येव । स्मितम् । ध्मातम् । यणो मयो द्वे भवत इति वक्तव्यम्। केचिदत्र यण इति पञ्चमी मय इति षष्ठीति व्याचक्षते । तेषामुल्क्का, वाल्म्मीक इत्युदाहरणम्। अपरे तु यण इति षष्ठी मय इति पञ्चमीति तेषां दध्य्यत्र, मध्व्वत्रेत्युदाहरणम्। शरः खयो द्वे भवत इति वक्तव्यम् । अत्रापि यदि शर इति पञ्चमी खय इति षष्ठी तदा स्त्थातः स्त्थातेत्युदाहरणम् । अथवा खय उत्तरस्थ शरो द्वे भवतः । वत्स्सराः । अप्स्सरा । अवसाने च यरो द्वे भवत इति वक्तव्यम् । वाक्क् । वाक् । त्वक्क् । त्वक् । षट्ट् । षट् । तत्त् । तत् ॥

३९६६. नादिन्याक्रोशे पुत्रस्य ॥ ४८ ॥

आदिनी शब्दे परत आक्रोशे गम्यमाने पुत्रशब्दस्य न द्वे भवतः । अनचिचेति प्राप्तिः प्रतिषिध्यते । पुत्रादिनी त्वमसि पापे । आक्रोश इति किम्? तत्त्वकथने द्विर्वचनं भवत्येव । पुत्रानत्तीति पुत्त्रादिनी-शिशुमारी व्याघ्री । तत्परे चेति वक्तव्यम् । पुत्रपुत्रादिनी त्वमसि पापे । वा हतजग्धपर इति वक्तव्यम् । पुत्त्रहती । पुत्रहती । पुत्त्रजग्धी । पुत्रजग्धी । चयो द्वितीयाः शरि पौष्करसादेः । चयो द्वितीया भवन्ति शति परतः पौष्करसादेराचार्यस्य मतेन तकारस्य थकारः - वथ्सः । ककारस्य खकारः - अक्षरम् । पकारस्य । फकारः - अफ्सराः ॥

३९६७. शरोऽचि ॥ ४९ ॥

नेति वर्त्तते । शरोऽचि परतो न द्वे भवतः । अचो रहाभ्यामिति प्राप्तिः प्रतिषिद्ध्यते। कर्षति । वर्षति । आकर्षः । अक्षदर्शः । अचीति किम्? दश्श्यते ॥

३९६८. त्रिप्रभृतिषु शाकटायनस्य ॥ ५० ॥

त्रिप्रभृतिषु वर्णेषु संयुक्तेषु शाकटायनस्याचार्यस्य मतेन द्वित्वं न भवति । इन्द्रः । चन्द्रः। उष्ट्रः । राष्ट्रम् । भ्राष्ट्रम् ॥

३९६९. सर्वत्र शाकल्यस्य ॥ ५१ ॥

शाकल्याचार्यस्य मतेन सर्वत्र द्विर्वचनं न भवति । अर्कः । मर्कः । ब्रह्मा । अपह्नुते॥

३९७०. दीर्घादाचार्याणाम् ॥ ५२ ॥

दीर्घादुत्तरस्याचार्याणां मतेन न द्वित्वं भवति । दात्रम् । पात्रम् । मूत्रम् । सूत्रम् ॥

३९७१. झलां जश् झशि ॥ ५३ ॥

झलां स्थाने जशादेशो भवति झशि परतः । लब्धा । लब्धुम् । लब्धव्यम् । दोग्धा । दोग्धुम् । दोग्धव्यम् । बोद्धा । बोद्धुम् । बोद्धव्यम् । झशीति किम्? दत्तः । दत्थः । दध्मः ॥

३९७२. अभ्यासे चर्च्च ॥ ५४ ॥

अभ्यासे वर्त्तमानानां झलां चरादेशो भवति चकाराज्जशश्च । चिखनिषति । चिच्छित्सति। टिठकारयिषति । तिष्ठासति । पिफकारयिषति । बुभूषति । जिघत्सति । डुढौकिषते । प्रकृतिचरां प्रकृतिचरो भवन्ति । चिचीषति । टिटीकिषते । तितनिषति । प्रकृतिजशां प्रकृतिजशो भवन्ति । जिजनिषते । बुबुधे । ददौ । डिड्ये ॥

३९७३. खरि च ॥ ५५ ॥

खरि च परतो झलां चरादेशो भवति । झल्ग्रहणं नानुवर्त्तते पूर्वसूत्रे चानुकृष्टत्वात् । भेत्ता। भेत्तुम् । भेत्तव्यम् । युयुत्सते । आरिप्सते । आलिप्सते ॥

३९७४. वाऽवसाने ॥ ५६ ॥

झलां चरिति वर्त्तते । अवसाने वर्त्तमानानां झलां वा चरादेशो भवति । वाक् । वाग् । त्वक् । त्वग् । श्वलिट् । श्वलिड् । त्रिष्टुप् । त्रिष्टुब् ॥

३९७५. अणोऽप्रगृह्यस्यानुनासिकः ॥ ५७ ॥

अणः प्रग्रुह्यसंज्ञस्यावसाने वर्त्तमानस्य वानुनासिकादेशो भवति । दधिँ दधि । मधुँ मधु । कुमारीं कुमारी । अण इति किम्? कर्तृ । हर्तृ । अप्रगृह्यस्येति किम्? अग्नी । वायू ॥

३९७६. अनुस्वारस्य ययि परसवर्णः ॥ ५८ ॥

अनुस्वारस्य ययि परतः परसवर्ण आदेशो भवति । शङ्किता । शङ्कितुम् । शङ्कितव्यम् । उञ्छिता । उञ्छितव्यम् । कुण्डिता । कुण्डितुम् । कुण्डितव्यम् । नन्दिता । नन्दितुम् । नन्दितव्यम् । कम्पिता । कम्पितुम् । कम्पितव्यम् । इह कुर्वन्ति वृषन्ति इत्यत्र णत्वस्यासिद्धत्वात्पूर्वं नकारस्यानुस्वारः क्रियते । तस्यापि परसवर्णेन पुनर्णकार एव भवति । तस्याप्यसिद्धत्वत्पुनर्णत्वं न भवति । एवमनुस्वारीभूतो णत्वमतिक्रामतीति । ययीति किम्? आक्रंस्यते । आचिक्रंस्यते ॥

३९७७. वा पदान्तस्य ॥ ५९ ॥

पदान्तस्यानुस्वारस्य ययि परतो वा परसर्वणादेशो भवति । तङ्कथञ्चित्रपक्षण्डयमानन्नभः स्थम्पुरुषोऽवधीत् । तं कथं चित्रपक्षं डयमानं न भःस्थं पुरुषोऽवधीत् ॥

३९७८. तोर्लि ॥ ६० ॥

तवर्गस्य लकारे परसवर्ण्णादेशो भवति । अग्निचिल्लुनाति । सोमसुल्लुनाति । भवाँल्लुनाति । महाँल्लुनाति ॥

३९७९. उदः स्थास्तम्भोः पूर्वस्य ॥ ६१ ॥

सवर्ण इति वर्त्तते । उद उत्तरयोः स्था स्तम्भ इत्येतयोः पूर्वसवर्णादेशो भवति । उत्थिता । उत्थातुम् । उत्थातव्यम् । स्तम्भेः खल्वपि-उत्तम्भिता । उत्तम्भितुम् । उत्तम्भितव्यम् । स्थास्तम्भोरिति किम्? उत्खनिः । उदः पूर्वसवर्णत्वे स्कन्देश्छन्दस्युपसंख्यानम् । अग्ने दूरमुत्कन्दः । रोगे चेति वक्तव्यम् । उत्कन्दको रोगः । कन्दतेर्वा धात्वन्तरस्यतद्रूपम् ।

३९८०. झयो होऽन्यतरस्याम् ॥ ६२ ॥

झय उत्तरस्य हकारस्य पूर्वसवर्णादेशो भवति अन्यतरस्याम् । वाग्घसति । वाग्हसति। श्वलिड्ढसति । स्वलिड्हसति । अग्निचिद्धसति । अग्निचिद्हसति । सोमसुद्धसति । सोमसुद् हसति । त्रिष्टुब्भसति । त्रिष्टुब् हसति । झय इति किम्? प्राड्हसति । भवान् हसति ॥

३९८१. शश्छोटि ॥ ६३ ॥

झय इति वर्त्तते अन्यतरस्यामिति च । झय उत्तरस्य शकारस्याटि परतश्छकारादेशो भवति अन्यतरस्याम् । वाक्छेते । वाक्शेते । अग्निचिच्छेते । अग्निचित् शेते । सोमसुच्छेते। सोमसुत् शेते । श्वलिट् छेते । श्वलिट् शेते । त्रिष्टुप्छेते । त्रिष्टुप् शेते । छत्वममीति वक्तव्यम् । किं प्रयोजनम् ? तच्छ्लोकेन, तच्छ्मश्रुणेत्येवमर्थम् ॥

३९८२. हलो यमां यमि लोपः ॥ ६४ ॥

अन्यतरस्यामिति वर्त्तते । हल उत्तरेषां यमां यमि परतो लोपो भवति अन्यतरस्याम् । शय्या इत्यत्र द्वौ यकारौ क्रमजस्तृतीयस्तत्र मध्यमस्यात्र वा लोपो भवति । शय्या । शय्य्या। अदितेरपत्यमादित्य्य डुत्यत्र तकारात्पर एको यकारो यणो मय इति क्रमजो द्वितीयः । तत्र मध्यमस्य वा लोपो भवति-आदित्यः । आदित्य्यः । आदित्यो देवता अस्य स्थालीपाकस्येति आदित्य्यः । आदित्य्य इत्यत्रापि द्वौ यकारौ क्रमजस्तृतीयः । तत्र मध्यमस्य मध्यमयोर्वा लोपो भवति । हल इति किम्? अन्नम् । यमामिति किम्? अग्ग्निः । अर्य्यम् । ममीति किम्? शाङ्गम् ॥

३९८३. झरो झरि सवर्णे ॥ ६५ ॥

हल इति वर्त्तते अन्यतरस्थामिति च । हल उत्तरस्य झरो झरि सवर्णे परतो लोपो भवति अन्यतरस्याम् । प्रतत्तमवतत्तमित्यत्र त्रयस्तकाराः । क्रमजश्चतुर्थः । तत्र मध्यमस्य मध्यमयोर्वा लोपो भवति । मरुतत्त इत्यत्र चत्वारस्तकाराः क्रमजः पञ्चमस्तत्र मध्यमस्य मध्यमयोर्मध्याप्रानां वा लोपो भवति । मरुच्छब्दस्य ह्युपसंख्यानसामर्थ्यादच उपसर्गात्त इति तत्त्वं भवति । झर इति किम्? शाङ्गम् । झरीति किम्? प्रियपञ्च्ञः । अल्लोपस्य च पूर्वत्रासिद्धे न स्थानिवदिति स्थानिवद्भावप्रतिषेधादत्र चकारस्य अकारे लोपः स्यात् । सवर्ण इति किम्? तर्प्तुम् । तर्प्तव्यम् । सवर्णग्रहणसामर्थ्यासंख्यातानुदेशो न भवति । सवर्णमात्रे लोपो विज्ञायते । तेन शिण्ढि, पिण्ढि इति ढकारे डकारस्य लोपो भवति ॥

३९८४. उदात्तादनुदात्तस्य स्वरितः ॥ ६६ ॥

उदान्तादुत्तरस्यानुदात्तस्य स्वरितादेशो भवति । गार्ग्यः । वात्स्यः । पचति । पठति । अस्य स्वरितस्थासिद्धत्वादनुदात्तं पदमेकवर्जमित्येतन्न प्रवर्त्तते । तेनोदात्तस्वरितावुभावपि श्रूयेते॥

३९८५. नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम् ॥ ६७ ॥

उदात्तोदयस्य स्वरितोदयस्य चानुदात्तस्य स्वरितो न भवति, पूर्वेण प्राप्तः प्रतिषिद्ध्यते, आगार्म्यकाश्यपगालवानां मतेन । उदात्त उदयो यरमात्स उदात्तोदय उदात्तपर इत्यर्थः । एवं स्वरितोदयः । उदात्तोदयस्तावत्-गार्ग्यस्तत्र । वात्स्यस्तत्र । तत्र शब्द आद्युदात्तः तरिस्मिन्नुदात्ते परतो गार्ग्यशब्दः स्वरितो न भवति । स्वरितोदयः - गार्ग्यः क्व। वात्स्यः क्व । क्वशब्दः स्वरितः तरिमन् परतोऽनुदात्तः स्वरितो न भवति । अगार्ग्यकाश्यपगालवानमिति किम्? गार्ग्यस्तत्र । गार्ग्यः क्व । तेषां हि मतेन स्वरितो भवत्येव। उदात्तपरस्येति वक्तव्ये उदयग्रहणं मङ्गलार्थम् । अनेकाचार्यसंकीर्तनं पूजार्थम् ॥

३९८६. अ अ इति ॥ ६८ ॥

एकोऽत्र विवृतोऽन्यः संवृतस्तत्र विवृतस्य संवृतः क्रियते । अकारो विवृतः संवृतो भवति। वृक्षः । प्लक्षः इह शास्त्रे कार्यार्थमकारो विवृतः प्रतिज्ञातस्तस्य तथाभूतस्यैव प्रयोगो मा भूदिति संवृतप्रत्यापत्तिरियं क्रियते । दीर्घप्लुतयोश्चानेन विवृतेनाकारेण ग्रहणं नेष्यते । तेन तयोः संवृतो न भवति । संवृतेन च सर्वगुणस्य मात्रिकस्य ग्रहणमिष्यते । तेन सर्वगुणः प्रत्यापद्यते॥

[इष्ट्युपसंख्यानवती शुद्धगणा (१) विवृतगूढसूत्रार्था ॥
व्युत्पन्नरूपसिद्धिर्वृत्तिरियं काशिका नाम ॥ १ ॥
व्याकरणस्य शरीरम् परिनिष्ठितशास्त्रकार्यमेतावत् ॥
शिष्टः परिकरबन्धः क्रियतेऽस्य ग्रन्थकारेण ॥ २ ॥]

इति श्रीवामनकृतायां काशिकावृत्तावष्टमाध्यायस्य तुरीयः पादः ॥

समाप्तश्चायमध्यायो ग्रन्थश्च ॥ ८ ॥ ४ ॥